DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most

BORROWER'S No	DUE DTATE	SIGNATURE

राजस्थानस्याधुनिकाः

संस्कृत कथालेखकाः

•

राजस्थानस्याधुनिकाः संस्कृत कथालेखकाः

सम्पादक- डॉ० [illegible]

राजस्थान साहित्य अकादमी, उदयपुर

RAJASTHANASYAADHUNIKA SANSKRIT KATALEKHAKA

© Edited By: Dr. Pushkardatta Sharma

प्रकाशक : राजस्थान साहित्य अकादमी, उदयपुर
मुद्रक : मेसर्स महावीर प्रिन्टिंग प्रेस, उदयपुर
संस्करण : मार्च, 1980
मूल्य : सत्रह रुपये मात्र

प्रकाशकीयम्

'राजस्थान साहित्य अकादमी' राज्ये हिन्दी, संस्कृतयोस्तथा राजस्थानी भाषायाः साहित्योन्नत्यै सर्वथा समर्पितं संस्थानं वर्तते।

एतत् संस्थानं स्व नानाविध प्रवृत्तीनां माध्यमेन प्रदेशे साहित्यस्योन्नयनाय, जागरणाय साहित्यसर्जनाय च पूर्णरूपेण प्रयत्नशीलमस्ति।

संस्थानस्यैका विशिष्ट'वृत्ति राजस्थान प्रदेशस्य साहित्य सर्जनशीलानां विदुषां कृतीनां प्रकाशनमप्यस्ति। अस्या योजनाया अन्तर्गताद्यावधि शताधिक ग्रन्थानां प्रकाशनं सम्पन्नम्। प्रकाशितेष्वनेकेषु ग्रन्थेषु संस्कृत वाङमयस्याप्यनेके ग्रन्था सम्मिलिता सन्ति।

राजस्थानस्याधुनिक साहित्य-सर्जकानां संस्कृत लेखकानामिदं सकलनं पाठकेभ्य प्रस्तुतं कुर्वदिदं संस्थानं परमं हर्षमनुभवति। राजस्थानस्य संस्थानस्य संस्कृतज्ञ मचारि जनजीवनेन सह संयुज्य गाम्भीर्येण, तल्लीनतया सूक्ष्मदृष्ट्या च यदनुभवति तत् सुचारुतया अभिव्यक्तं विधाय जनमानसेषु स्थानं विदधाति अस्मिन् सकलने प्रकाशिता कथा अस्य प्रमाणमस्ति।

साहित्य अकादमी आशास्ते संस्कृतज्ञेभ्य विद्वद्भ्य एतत् सकलनं रोचिष्यते, येनसंस्थानं प्रोत्साहितमुत्तरोत्तरं कार्यं भूयोऽपि द्विगुणोत्साहेन कुर्यात्।

उदयपुर
मार्च १९८०

राजेन्द्र शर्मा
निदेशक

सम्पादकीयम् / १

कथानुक्रम

१. भ्रातृस्नेहः २७
नवलकिशोर काङ्करः

२. सापराधः ३५
गणेशराम शर्मा

३. आत्मवेदना ५१
प्रभाकर शास्त्री

४. नाटकभवनम् ४७
विश्वनाथ मिश्र

५. पङ्गुः ६३
श्रीमती मंजु शर्मा

६. स्मारकम् ७१
चन्द्रमौलिः

७. दिग्भ्रमः ७७
कलानाथ शास्त्री

८. मूल्यान्यमूल्यानि ८८
शशिगुप्ता

९ स्वीकृता ९५

नन्दकिशोर गौतम 'निर्मल'

१० राष्ट्रनिर्माता ९८

ईश्वरानन्द शर्मा

११ द्वौ शास्त्रिणौ १०२

मनोहर शर्मा

१२ भग्न-विरोण १०८

मेवाराम कटारा 'पङ्क'

१३ सत्यस्यान्वेषणम् १२०

कुमारी प्रभा

□

सम्पादकीयम्

समस्तेषु काव्याङ्गेषु गद्यं खलु श्रेष्ठमिति सुधीवरैरालोचकैर्बहुधा आगतम्। गद्ये हि कथनस्य वा भावस्य गद्यमितमतया सूक्ष्मयाऽप्यभिव्यक्तेः सर्वाधिकं सामर्थ्यमस्यामेव काव्यविधायां मन्यते। भवतु नाम पद्यं लोकप्रियं मादकं च, परमभिव्यञ्जनाकौशलं वर्णनाबाहुल्यं गहनं च विश्लेषणं गद्यमाध्यमेनैव सम्भवम्। वस्तुतस्तु छन्दोमयत्वाधारितं श्रुतिमाधुर्यं स्मरणसौकर्यं च पद्यानां लोकप्रियत्वाय कल्पते। अन्यथा त्वस्मिन् काव्याङ्गे समग्राभिव्यक्तिसामर्थ्यं न कदापि सम्भावनीयम्। अधमकाव्यत्वेनाभिहिता चित्रकाव्यात्मकतापि पद्येष्वेवोपलभ्या। नैतन्नाम्पृक्तं गद्याधारितं काव्यं कदापि स्पृशति।

गद्यस्य समुद्भवः

गद्यस्याऽस्य समुद्भवः पुरातने युगे वैदिकसंहितोदयेन साकमेव समजायत, इत्यस्मिन् विषये न कोऽपि विवादो विपश्चिज्जनेषु सर्वेषु। गद्यस्याद्यः स्वरूपस्तु कृष्ण-यजुर्वेदस्य तैत्तिरीयसंहितायां प्रत्यक्षीकर्तुं शक्यते। तत्र खलु गद्यस्य प्रयोगः पद्यभागादेव न्यूनः। तदनन्तरं चाथर्ववेदेऽपि गद्यस्य समावेशः प्रभूतमात्रायां दृष्टिगोचरोऽस्ति। तदीयः षष्ठो भागस्तु गद्यनिबद्ध एव सन्दृश्यते। स्पष्टतस्तत्र च गद्यं सुप्रतिष्ठितमिवाभाति। अनेनैव हेतुनोत्तरकाले ब्राह्मणारण्यकोपनिषदां सर्जना गद्यविधायामेव समजायत। व्याख्याविश्लेषणादीनि तु गद्यमाध्यमेन विधेयानीति तु तथ्यमनेनैव निर्णेतुं पार्यते।

परं वैदिकेऽस्मिन् गद्ये कृत्रिमतान्याभिव्यञ्जकालङ्कारबहुलता समस्त-पदात्मकता च नैवाऽनुसन्धेया। श्लेषालङ्कारसमुद्भासितं पाण्डित्यप्रदर्शनसम्पन्नं वै गद्ये सर्वथैवाप्राप्यम्। वस्तुत एतद् गद्यं तु सहजमकृत्रिमं प्रसादगुणेन च समन्वितं दृश्यते। "सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः" इत्येतादृशाः प्रयोगा वैदिक-

व्यवहारक्षमा भाषाया नैसर्गिकता प्रतिपादयन्ति । पद्यसुलभ लयाधारित-श्रुतिमाधुर्यं स्मरणसौकर्यं चाऽन्वेष्टुकामाः सहृदयास्तु न जातु प्रहृष्येयुरलङ्कृतिशून्येनाऽनेन गद्येन । न तेषां मनस्तत्रानुसन्दधाति । गद्यस्य विरामोऽनेन हेतुना विष्टम्भमिवाऽयात् ।

तथाप्येतन्नाशङ्कनीयं यदेतद् गद्यं सर्वथैवानादृतमासीत् । प्रत्युत व्याख्य कृते तु गद्यस्यालम्बनमेवाऽश्रियत । तथ्यस्यास्य पुष्टिस्तु सर्वथैव अधुनातनसदृशे गद्ये सरचितेन यास्काचार्यस्य निरुक्तेन महर्षिपतञ्जलेश्च महाभाष्येण सहजमेव विधीयते, यथा —

"एवं हि श्रूयते । बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच । नान्तं जगाम । बृहस्पतिश्च प्रवक्तेन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम ।"

(महाभाष्यात्)

सूत्रसाहित्यं तु समग्रमेव गद्यविधामेवाऽऽश्रयते । पाणिनिरचिताऽष्टाध्यायीनाम्नि विश्वविश्रुते व्याकरणग्रन्थे तु "अदर्शनं लोपः" 'साधकतमं करणम्' "कर्तुरीप्सिततमं कर्म" इत्यादिभिः सूत्रैर्गद्यस्य नैसर्गिकी संक्षेपणोपेता निसर्गदिग्ध-मेवाभिव्यज्यते । कौटिल्यकृतेऽर्थशास्त्रेऽपि लघुतरैर्वाक्यैः सरचितं गद्यं किमपि रमणीयत्वमाधत्ते, यथा—

'दर्शने प्रसीदति । वाक्यं प्रतिगृह्णाति । आसनं ददाति । विविक्तो दर्शयते । शङ्कास्थाने नातिशङ्कते । कथायां रमते । परिज्ञाप्येष्ववेक्षते । पथ्यमुक्तं सहते । स्मयमानो नियुङ्क्ते । हस्तेन स्पृशति । श्लाघ्येनोपहसति ।"

अभिव्यञ्जनाक्षममेतादृशं गद्यमाङ्ग्ललेखकस्य फ्रां.सि.स. बेकनमहोदयस्य विश्रुत गद्य सर्वथैव व्यक्तरोति ।

अस्मिन् युगे समस्तपदावलीनां प्रयोगोऽपि यदा कदा विधीयते स्म । नातिदीर्घं बौद्धविदुषाऽऽर्यशूरेण रचितायां जातकमालायां द्रष्टुं पार्यते, यथा—

"अथ कदाचित्तस्य महासत्त्वस्य भोजनकाले स्नानानुलिप्तगात्रस्य सुगन्धोदारसूपोपकल्पिते समुपस्थिते वर्णगन्धरसस्पर्शादिगुणसमुदिते विचित्रे भक्ष्य-भोज्यादिविधौ तत्पुण्यसम्भाराभिवृद्धिकामो ज्ञानाग्निनिर्दग्धसर्वक्लेशेन्धनः प्रत्येक-बुद्धस्तद् गृहमभिजगाम भिक्षार्थी ।"

दर्शनशास्त्रसदृशे शुष्के विषयेऽपि यादृशं गद्यं प्रयुक्तं, तत्तु सर्वथैव सरलं रोचिष्णु च, यथा—

"इच्छयाऽऽत्मानमुपलभामहे। कथमिति? उपलब्धपूर्वे ह्यभिप्रेते भवतीच्छा। यथा मेरुमुत्तरेण यान्यस्मज्जातीयैरनुपलब्धपूर्वाणि स्वादूनि वृक्षफलानि न तानि प्रत्यस्माकमिच्छा भवति।"

(शङ्कराचार्यस्य भाष्यात्)

नैयायिकानां विवेचनेष्वपि यदा कदा लालित्येन समन्विता व्यङ्ग्योक्तिभिश्चालङ्कृता वाक्यरचना दृष्टिपथमायाति यथा—

"आः क्षुद्रतार्किक! मदेवाऽनभिज्ञोऽसि ब्रह्मैव जीवात्मानो नहि ततोऽन्ये। नहि दहनपिण्डाद् भेदेनापि भान्तः स्फुलिंगा अग्निस्वरूपा भवन्ति। तत् किं ब्रह्मण एवाविद्या? न च ब्रह्मणोऽविद्या?"

(जयन्तभट्टस्य न्यायमञ्जरीतः)

पौराणिकं गद्यमपि न खलु काव्यसुषमया विरहितम्। प्रत्युत तस्मिंस्तु प्रसादगुणोपेतमलङ्कृतञ्च गद्यं साक्षात्कर्तुं शक्यते यथा श्रीमद्भागवते रम्यप्रकृतिवर्णनाय समायोजिता मृदीत्रललितपदसमासावली द्रष्टव्यनामेति—

'तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धि बहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति। यदुपजोषणाद् भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति।'

गद्यकाव्यस्य समारम्भः

सुबन्धु-दण्डि-बाणादिभ्यः प्राक् कानिचिद् मनोहारीणि गद्यकाव्यान्यविद्यन्त, परमधुना तु तेषां नामोल्लेख एव समुपलभ्यते। यथा खलु कात्यायनेन स्ववार्तिके कस्याश्चित् "दाक्षायणिकायाः" पतञ्जलिना 'वासवदत्ता सुमनोत्तराभैमरथीनाम्," भोजेन शृंगारप्रकाशे "मनोवतीसातकर्णीहरणयो" दण्डिना दशकुमारचरिते 'मनोवत्या' श्रीपालितेन 'तरङ्गवत्या' रामिलसौमिलाभ्यां कस्याश्चित् 'शूद्रककथायाः' बाणेन च "भट्टारहरिश्चन्द्रस्य' उल्लेखः कृतोऽस्ति—किन्तु साम्प्रतं स्वेतासु नैकाऽपि कृतिरवाप्यते। तथाप्येतत्तु स्पष्टं यद् बाणादिभ्यः प्राक् ललितगद्यस्य काऽपि सुदीर्घपरम्पराऽविद्यत यया खलु दण्डिसुबन्धुबाणादयोऽनुप्रेरिता अजायन्त।

द्वितीयख्रीष्टशतके समुत्कीर्णेन रुद्रदाम्नः गिरनारशिलाप्रशस्तेः समस्तपदावलिनिर्मितस्य च गद्यस्य प्रणयनं समूह्यते यथा—

प्रमाणमानोन्मानस्वरगतिवर्णसारसत्त्वादिभिः परमलक्षणव्यञ्जनैरुपेतकान्तमूर्तिना स्वयमधिगतमहाक्षत्रपनाम्ना नरेन्द्रकन्यास्वयंवरानेकमाल्यप्राप्तदाम्ना महाक्षत्रपेण रुद्रदाम्ना सेतु सुदर्शनतरं कारितम्।

गद्यकाव्यस्य विकासः

उत्तरवर्तिषु शिलालेखसमुत्कीर्णाभिः प्रशस्तिभिस्तु समासान्तरस्य गद्यस्य प्रौढिमाऽऽश्रियते। तासु हरिषेणरचिता समुद्रगुप्तप्रशस्तिर्विशेषत उल्लेखमर्हति। श्रुतिमाधुर्येणालङ्कृतं तस्याः गद्यं काममपि मनोज्ञतां धत्ते। अनया गद्यशैल्या प्रायशः सर्वे बहुशः उत्तरवर्तिनो गद्यरचयितारः उपकृता स्युरिति निर्णीतम्। तत्कृतिषु शब्दार्थालङ्कृतिः सुगौष्ठी श्लिष्टा च समासानां निपुणप्रयोगतया प्राशस्त्या नितरां प्रभाविताऽस्ति। निश्चप्रचमेषा काव्यशैली गद्यकाव्यं पुनः प्रतिष्ठितं सुप्रतिष्ठितं चाकरोत्। एतामेव विधामाश्रित्य बाणभट्टादिभिः गद्यकाव्यमरच्यत। अर्वाचीनेष्वपि सहस्राब्देषु तादृशीयं रमणीयता सर्वैरपि सहृदयैः मानितमास्ते।

उत्तरवर्तिना दण्डिना कृता स्वकीया गद्यशैली सर्वथाऽनुकरणीया मन्यते। परं दुष्करं तदनुकरणमिति मत्वाऽऽचार्यः लक्षणकारो गद्यरचनायां स्वकीयं कवित्वं निष्कासयति। तदनु सूक्तिरियं प्रसिद्धिमाजगाम—

'गद्यं कवीनां निकषं वदन्ति।'

गद्योदयः

वस्तुतस्तु सुबन्धुप्रभृतिना वासवदत्ताप्रणेत्रा यादृशं गद्यं रचितं तत् गद्यचरमोत्कर्षेण ख्याततराम्। अतिशयमनुसरन्न कोऽपि समाजः। सर्वैरपि गद्यरचनाकारैस्तद् गद्यमादर्शं स्वान्तीक्रियते। बाणभट्टेन तु स्वकीये हर्षचरिते आदर्शगद्यस्य लक्षणमपि समुपस्थापितम् यथा—

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्॥

न केवलमेतावता तथ्यमेतदेव समग्रमनवद्यगुणमूर्तिर्भिन्नस्य वैविध्यपरस्य रचनासु सरसैव समुच्यते।

सुबन्धोर्वासवदत्ताया प्रत्यक्षरश्लेषालङ्कारस्य प्राचुर्येण विचित्रमिव काव्यस्वरूपं प्रस्तूयते। क्लिष्टता तु तत्रेदृशी विद्यते यद्विद्वद्वरेण्या अपि क्वचित् क्वचित् शब्दसोपानालोकयितुं प्रबाध्यन्ते। सभङ्गाभङ्गोभयविधश्लेषस्तेन प्रयुक्तोऽस्ति, यथा—

"बालिनमिवाङ्गदोपशोभितं, कुहूकण्ठमिव हारिकण्ठं, वनमृगमिव रामाकर्षणनिपुणं, जयन्तमिव वचनामृतनन्दितवृद्धश्रवसं, कृष्णमिव कं सहर्षं न कुर्वन्तम् "

अन्येऽपि विरोधाभासोत्प्रेक्षादयोऽलङ्कारास्तत्र चमत्कृतिमुत्पादयन्ति। समासबाहुल्यजनिता पदानां सुदीर्घता तु तत्र प्रतिपृष्ठमाभाति, यथा—

"यत्र मदकलकलहंससारसरसितोद्भ्रान्तभा कूटविकटपुच्छच्छटा—व्याधूनविकचकमलखण्डविगलितमकरन्दबिन्दुसन्दोहसुरभितसलिलया "

सत्यमेव "कला कसायै" इत्येष सिद्धान्तो वासवदत्तायां प्रतिपदं प्रत्यक्षीकर्तुं पार्यते। पाण्डित्यप्रदर्शनस्य त्वियत्येव न विद्यते तत्र। बाणभट्टस्त्वनया कृत्याऽभिभूतमनाः कथयामास—

"कवीनामगलद् दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्॥"

सुबन्धोस्तुलनायां दशकुमारचरितस्य लेखको दण्डी श्लेषविरहितं बोधगम्यं च गद्यं प्रयुङ्क्ते। एतदीये गद्ये सारल्यं सुबोधता च सर्वत्रैव वरीवर्ति। पदलालित्येन त्वेषा कृतिः जगति प्रसिद्ध्यति। संस्कृतसाहित्ये त्वेतत् पदलालित्यं दण्डिनं कालिदासादिसमत्वमेवानयति, यथा—

"उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥"

एतदीयं गद्यं प्रसादगुणेनोपेतम्, श्लेषादिना विरहितम्, भावाभिव्यक्तिवैशद्येन सम्पृक्तं रसनिर्भरं च विद्यते, यथा—

"अहमपि देवस्यान्वेषणाय महीमटन् कदाचिदम्बरमध्यगतस्याम्बरमणेः किरणममहिष्णुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशम्। मम पुरोभागे दिनमध्यसंकुचितसर्वावयवः कूर्माकृतिर्भानुपच्छाया निरीक्ष्योन्मुख-

गगनतलान्महारयेण पतन्तं कञ्चिदन्तराल एव दयोन्नतहृदयोऽहमवलम्ब्य शनैरवनितले निक्षिप्य त भृगुपतनकारणमपृच्छम्।

कथाऽऽख्यायिकायो चरमोत्कर्षः

सम्राजो हर्षवर्द्धनस्य समकालीनो बाणभट्टस्तु सर्वानेव गद्यलेखकान् निस्सन्दिग्धमतिशेते। स खलु गद्यसाहित्याकाशे भास्कर इव दीप्यते। न कोऽपि विषयोऽवशिष्यते, यस्तेन कादम्बर्यां हर्षचरिते वा नैव वर्णित। अतएव कथितम्—

"बाणोच्छिष्टं जगत् सर्वम्।"

तदीया कादम्बरी तु रसज्ञाना कृतेऽनाहारमिव जनयति, यथा—

"कादम्बरीरसज्ञानामाहारोऽपि न रोचते।"

गद्यकाव्यस्य कथाख्यायिकेति द्वे रूपे बाणभट्टेनैव सर्वप्रथम प्रस्तुतीक्रियेते। आत्मकथाया समारम्भोऽपि तेनैवाऽऽश्रियत। उभयोरपि गद्यकाव्यादर्शयोः काचनोदात्तप्रतिभा, मौलिकोद्भावना, विशदा च वर्णनशैली साक्षात्कर्तुं शक्यते। नात्र केवल पदलालित्य प्रत्यक्षर वा श्लेषमयत्वमनुसन्धेयम्। अत्र तु सुबन्धुदण्डिनो गद्यशैली कञ्चनाद्भुत समन्वयमवाप्य भृश चकास्ति। पर यदा स बाणभट्टो ताण्डताण्डव प्रस्तुतीकरोति, तदा तु साक्षाद् वाग्देवी प्रागल्भ्यमवाप्य बाणरूपेऽवतरितेवाभाति। यथा च कथितम्—

''जाता शिखण्डिनी प्राक् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तु वाणी बाणो बभूवेति।''

यदा च स ललितपदावलीमाश्रित्य माधुर्यगुण प्रयुङ्क्ते, तदा तु वाग्देवी रुचिरस्वरवर्णपदा तरुणीव जगन्मनो हर्तुं कल्पते, यथा—

"रुचिरस्वर वर्णपदा रसभाववती जगन्मनो हरति।
सा किं तरुणी ? नहि, नहि, वाणी बाणस्य मधुरशीलस्य।"

तदीय गद्य सौन्दर्यं कियदनुपमेयमिति प्रदर्शयितु विरोधाभासालङ्कारस्यैकमुदाहरण प्रस्तुतीक्रियते। तद्यथा—

'यत्र च मलिनता हविर्धूमेषु, न चरितेषु मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु चञ्चलता कदलीदलेषु न मनःसु, चक्षुराग

कोकिलेषु न परकलत्रेषु, कण्ठग्रहः कमण्डलेषु न सुरतेषु, मेखलाबन्धो व्रतेषु नेर्ष्याविलहेषु, स्तनस्पर्शो होमधेनुषु न कामिनीषु, पक्षपातः शुकवायुषु न विद्याविनोदेषु, भ्रान्तिरनल प्रदक्षिणासु न शास्त्रेषु, वसुसङ्कीर्तनं दिव्यकथासु न तृष्णासु, गणना रुद्राक्षवलयेषु न शरीरेषु, मुनिबालनाशः ऋतुदीक्षया न मृत्युना, रामानुरागो रमायणेन न यौवनेन, मुखभङ्गविकारो जरया न धनाभिमानेन ''

समस्तपदावल्याश्च मनोहारिता दिव्येऽच्छोदसरसि स्नानार्थं गतस्य चित्ररथेनाऽभिगन्तु शक्यते, यथा—

मधुमदविडम्बित मधुकरवदम्बकसवाह्यमानलतादोलेषु, उत्फुल्लपल्लवलवलीलीयमानमत्तकोकिलोल्लासित मधुशीकरोद्दामदुर्दिनेषु, प्रोषितजनजायाजीवोपहारहृष्ट मन्मथास्फालितचापरवभयस्फुटितपथिक हृदयरुधिरार्द्रीकृतमार्गेषु, अविरत पतत्कुसुमशर पतत्रिपत्रमूत्कार बधिरीकृतदिङ्मुखेषु, दिवापि प्रवृत्तमदनरागान्धाभिसारिकासार्थ सङ्कुलेषु, उद्वेलितरमसागरपूरप्लावितेषु, सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेष्वेकदाऽहमन्यया सह मधुविस्तारशोभ प्रोत्फुल्लनवनलिन कुमुद कुवलयकल्हारमिदमच्छोद सरः स्नातुमभ्यपतम् ।''

लघुतमानां वाक्यानां निर्माणेऽपि बाणभट्टो विचक्षण इवाभाति । एतदर्थमेकमेवोदाहरणमत्र प्रस्तुतीक्रियते —

''न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते, न त्यागमाद्रियते । न विशेषज्ञता विचारयति । नाचारं पालयति । न सत्यमनुबध्यते । न लक्षणं प्रमाणीकरोति ''

सत्यमेवेदृशं प्रवाहमयं नैसर्गिकं च गद्यं प्रणेतुं न कोऽप्यन्यो गद्यलेखकः कदापि पारयामास । एतादृग् वैदग्ध्यं कलात्मकश्चोत्कर्षोऽद्भुता च वाक्यसंयोजना न कुत्राप्यन्यत्र समवाप्तुं शक्यते । वस्तुतो बाणभट्टस्य गद्यकाव्यं प्रकाशमानो दीपस्तम्भ इव सन्तिष्ठते । तत्प्रकाशेनेतरा कृतयो मार्गान्वेषणमिव विदधाति । निष्प्रपञ्चं बाणभट्टः सर्वेषां गद्यलेखकानां श्रेष्ठः । तदनुकरणं तु सर्वथैवासाध्यम् ।

परवर्तिषु चम्पूकाव्येष्वपि पद्येन सार्द्धं गद्यमप्युपलभ्यते । गद्य-पद्याभ्यां मिश्रितेष्वप्येतेषु परिष्कृतं बहुशोऽलङ्कृतं च गद्यं वरीवर्तते । विशेषतस्तु [त्रिविक्रम भट्टस्य 'नलचम्पूकाव्यम्' भोजस्य 'रामायणचम्पूकाव्यं' वेंकटाध्वरेः ''विश्वगुणादर्श-

चम्पूकाव्यम्', सोमदेवस्य "यशस्तिलक चम्पूकाव्यम्', हरिश्चन्द्रस्य जीवन्धर चम्पूकाव्यम्" तथा च अनन्तकवे 'भारतचम्पूकाव्यम्' उल्लेखनीयानि विद्यन्ते। एषु सर्वेषुसुबन्धु दण्डि बाणभट्टादीनां गद्यशैल्याः प्रभावः सर्वत्र दरीदृश्यते। एवमेवैतादृश गद्यमत्रोदाह्रियते—

'यस्मिननवरतधर्मकर्मोपदेशशात समस्त व्याधिव्यतिकराः पुरुषायुषजीविन सकल संसार सुखभाज प्रजा। तथाहि-कुष्ठयोगो गान्धिकापणेषु स्फोटप्रवादो वैयाकरणेषु सन्निपातस्तालेषु प्रहसंग्रहिज्ज्योति शास्त्रेषु भूतविकारवाद साङ्ख्येषु क्षयस्तिथिषु गुल्मवृद्धिर्वनभूमिषु गलग्रहो मत्स्येषु गण्डकोत्थान पर्वतवन भूमिषु शूलसम्बन्धश्चण्डिकायतनेषु दृश्यते न प्रजासु।' (नलचम्पूत)

कादम्बरीमाधृत्य लिखितासु गद्यकृतिषु धनपालस्य तिलकमञ्जरी' वादीभसिंहस्य गद्यचिन्तामणि', सोड्ढलस्य उदयसुन्दरी', वामनभट्टबाणस्य वेमभूपाल चरितम्', विश्वेश्वर पाण्डेयस्य 'मन्दारमञ्जरी' चोल्लेखमर्हति। एतासु कृतिषु रम्यमपि तत् गद्य मौलिकता तु नाऽभिव्यञ्जयति। सुदीर्घा समस्त पदावली विरोधाभासश्लेषाद्यलङ्कारवत्ता चात्र भूरिशः समुपलभ्यते, परं सर्वत्रैवैतद् गद्य बाणभट्टादिना प्रभावितमवाप्यते। मन्दारमञ्जरीतो गृहीत एको गद्यांशोऽत्र समुदाह्रियते –

अथाऽप्रसन्नसत्त्वतया वीररसोद्रेकेण च तादृशव्यतिकरानौचित्य ज्ञानेन च तद्रूपलिमालनोद्भवनाद्भुतेन च त्वरितरमादाय, शरासन संधाय चाजिह्मगम-मोघं त्रिपुरवधोद्यतो भगवान्मृगाङ्कमौलिरिव संस्थानविशेषशालिना शरीरेण स्थित्वा, शिखावैलक्षण्येन रक्षन्नेव कन्यका दाशरथिरिव दशास्य लक्ष्मण इव मेघनाद, नील इव प्रहस्त, हनुमानिवाक्ष शत्रुघ्न इव लवण कर्ण इव घटोत्कच, भीम इव बक त राक्षसापसदमवसानमनयत।'

आधुनिकगद्यम्

आधुनिकगद्यस्य समारम्भोऽम्बिकादत्त व्यासरचितस्य शिवराज विजयस्य प्रणयनादङ्गीक्रियते। एषा कृतिर्वर्तमानशताब्द्या आरम्भेऽरच्यत। नूतनोपन्यास-परम्पराप्यनयैव कृत्या प्रारब्धेति विषये विद्वांस मतैक्यमत्र दधति। शिववीरा-वरङ्गजीवाऽ ऐतिहासिक पात्राण्याधृत्य विरचित एष उपन्यासोऽभिनव कथाशैली माविष्करोति। ऐतिहासिक-वृत्तेन सार्द्धं देशकालवर्णनमेनमभिनवां कृतिमतीव रुचिकरां विधत्ते। शिववीरादीनां चरित्र चित्रण त्वत्र सर्वथैव सशक्तता व्यनक्ति।

समस्तपदावल्या सह लघुवाक्य संयोजनमप्यत्र बहुशो दृष्टिं प्रसादयति। उर्दू प्रभृति संस्कृतेतर भाषाणां शब्दा अपि नवीन संस्कृत रूपमाधृत्य कामपि चमत्कृति मिवोत्पादयितुं क्षमन्ते। तदीया गद्यशैली कियद् रम्येति द्रष्टव्यमत्र—

"न वयं मीनानिव पीनान् इभानिव तुन्दिलान् भेकानिव निर्विवेकान् वृषदंशानिव कपटस्निग्धान् काकानिवात्मोदरदुर्विधान् बलीमुखानिव चञ्चल मुखान् शृगालानिव कलितवञ्चनाजालान् द्विजिह्वानिव च द्विजिह्वान् सजीवानिवो-पबर्हान् आत्मस्तुतिमात्ररुचीन् मूर्तिमत इवाभिमानान् विद्याशून्यान् गुणिगण-ग्रहणासमर्थान् मिथ्याडम्बरान् वाराङ्गनाचरणपातासक्तान् मद्यकीटान्, दुःशासनान्धभक्तान् नृपम्मन्यान् स्वप्नेऽपि समुपास्महे।

श्लेषाद्यलंकृतेयं गद्यशैली नितरां भाषासौष्ठवेन कार्योत्कर्षेण च समन्विताऽस्ति। एषा खलु सर्वैरेवाधुनिकैः कृतिकारैरनुसरणीया।

आधुनिकेषु लेखकेषु पण्डिता क्षमारावनाम्नी यशस्विनी समुल्लसति। तया लिखिता कथा 'कथा-मुक्तावली'-ति सङ्कलने संगृहीताः सन्ति। एतासु कथासु वर्तमानयुगस्य विविधं चित्रमुपलभ्यते। भाषायामभिनवान् प्रयोगान् विधातुं सदैव क्षमाऽन्यतमा पण्डिता क्षमा। नवैवास्याः शैली विचारणा च नितान्तसम्पन्ना। समग्रतया तदीयं सर्वं माधुर्येण वैविध्येन च पाठकहृदयानि समाकृष्य प्रीणयितुं च कल्पते।

विशिष्टनाम्ना उपन्यासकारेषु श्री के के श्रीनिवासशास्त्री मेधाव्रता-चार्यस्तथा ए० रत्नपारखी विशेषेण उल्लेखनीयाः। श्रीनिवासशास्त्रिणः "चन्द्रमहीपति"रित्युपन्यासो रहस्यरोमाञ्चादिना परिपूर्णोऽस्ति। मेधाव्रताचार्यस्य "कुमुदिनीचन्द्र" इत्युपन्यासस्य कथावस्त्वनल्पमीदृग्विधमेव वरीवर्तते। उभावप्येतौ हिन्दीभाषाया रहस्योपन्यासैः स्तुतनीयौ स्तः। रत्नपारखिलिखित 'कुसुमलक्ष्मी'रित्याख्य उपन्यासस्तु निजया मनोवैज्ञानिकतया बहुशः प्रशंसितः। अत्रोन्मुक्तप्रेम्णो वर्णनं सामान्या-न्नैतिकादर्शात् सर्वथैवातिक्रमते। तथापि न किमपि कुत्सितमिवाभाति। तदेव कृतिकारस्य साफल्यम्। विवाहार्थं प्रस्तुतयोरपि प्रेमिणोरुद्वाहे समागता बाधा कृतिमेनां तामसीं न करोति। कतिपयान्युदाहरणान्येताभ्यः कृतिभ्यो द्रष्टव्यतामर्हन्ति, यथा—

'बिन्दुभूषितभ्रूमध्या, रक्तापाङ्गस्पर्शिप्रफुल्लपुण्डरीकनयना पद्मरागजटित-स्वर्णकर्णपूरा, उन्नतस्निग्धमसृणतीक्ष्णघोणा, रक्तोन्नतकपोला, कलङ्कमुक्ते-

न्द्रनाविमलहीरकशकरसोदयरदनवदना शुभ्रहारिहारवक्षस्थला दाडिमीपल-वकोरकुचा प्रमपूर्णनाभिवनावताराय त्रिवलीसोपानभ्या प्रमपयोधो नीदण्ड वितत करयुगलन मत्तग्येया निश्चिन निर्विवाद ललाम ललनासु ।

(चन्द्रमहीपन)

वम नतावणनमतस्त्विय मनोहारि सजानमिति द्रष्टव्यम्—

अथ माकन्दमञ्जरी मकरन्दविन्दु दानि स्वाद स्वाद सानन्द मञ्जुल मानपतीना कानिनाना कलनीरलकलन दिङ्मण्डन मुखरयन, चन्दनपरिमलभृता मलयानिलेन रमागनिलक चम्पकादिमहीरहालिङ्गनजनितानन्दनव कोकिलाभगय-पिकामुद्वहन्तीना वामनाना ललितलतानामुत्तमाङ्गानि मन्दमन्दमान्दोलयन्निहार शिरयनिव दर्दरामुदरन्दोवरमरन्दतुन्दिलाना मिलिन्दजालाना मञ्जुलगुञ्ज-नैर्निकुञ्जकुञ्जषु विश्रान्तिसुखार्थं निषण्णाना पान्थजनाना मोहनिद्रा जनयन वननिहाराय रसिकजनमनासि समुत्सायन पुष्प समय समुपनत ।

(कुमुदिनी चन्द्र)

दयिना प्रत्यपा स्वापराधस्वीकृति लज्जागर्भिता ग्लानिबहुलता व्यनक्ति, यथा—

'किं क्रन्दसि कुसुमलक्ष्मि मादृश दुराशन्द जनमुद्दिश्य ?' मा क्रन्द । वस्त्र यनु मादृशा अमयमग्धा जना ये हि त्वादृश्युपकारिणि विग्रन्धे शुद्धमनो च जन तद्विधानि समाचरन्ति नृशसनराणि पापानि यथा कृत नास्ति कश्चनापि मार्ज नोपाय । न वचि वर्धमय भगवती वसुधा तावपि जनान वमाला वर्गा । ।'

(कुसुमलक्ष्मीत)

गद्यस्थानप्रदेश प्याधुनिकगद्यलेखकानां न कार्पण्यमावोऽस्ति । महा-महोपाध्याय गिरिधर शर्मा चतुर्वेद, मथुरानाथभट्ट सूर्यनारायण शास्त्री वृद्धिचन्द्र शास्त्री रामेश्वर शास्त्री लक्ष्मण शास्त्री शिवप्रसाद शास्त्री च तेष मुख्या सन्ति । म० म० गिरिधरशमण सन्निभृत कृति 'निगुणदेशमच' निबन्धाद्वर्मनिग्रशमनायमस्ति । भट्टमथुरानाथन तु विविधविषयानाधृत्याधशतमिव कथानामतिशयानम् । तासु सामाजिककथासु दयनीया 'धनाम्ना च' आदर्शा सरामु चन्द्रहास परिहासास्मिरासु ललना प्रयोग , मनन्दुर शिष्या फागुनगारी' गनिहासिमासु अत्याचारिण परिणाम', सिहदर्श सिहविपाक , पुष्पराजस्य पौरुषम्' 'मनुलिमानभ', मनोविज्ञानिकासु

"विषमा समस्या" "अद्भुतचिकित्सा" च, प्रेमाख्यायिकासु "एकवार दर्शनम्", भक्तिकथासु च 'बालकभृत्य' सविशेषमुल्लेखनीया ।

सूर्यनारायणशास्त्रिणो "दुर्लभदाम्पत्यम्" वृद्धिचन्द्रशास्त्रिण "उमा" रामेश्वरशास्त्रिण 'पतिव्रता', लक्ष्मणशास्त्रिणो यादृशी त्वं तादृशोऽहम्', शिवप्रसादशास्त्रिणश्च कृष्णाशिलफलम्' इत्युल्लेखमर्हन्ति ।

एतासु कथासु व्यवहृता रचनाशैली किञ्चिदाह्रियतेऽत्र यथा—

अस्ताचलं चुचुम्बिषति भगवान् मरीचिमाली । कुलायाभिमुखमुड्डीयन्ते विहगा । भगवतो विश्वनाथस्य पुर्यां काशीनगर्यां राजमार्गे सर्व एव प्रायेण गङ्गा तटाभिमुखा विलोक्यन्ते । केचित् सन्ध्यामुपासितुम् अन्ये गङ्गातरङ्गसीकरशीतल समीरमासेवितुम्, परे सुरसरिद्वीचिषु प्लवमानमिव शोणवर्णां भगवतो भुवन-भास्करस्य प्रतिमामालोकयितुम्, इतरे परिश्रमक्लिन्ना स्नानेन शान्तिमवाप्तुम् बहवो विदुषां दर्शनेनात्मानं पावयितुम्, अनेके च संस्कृतछात्राणां प्रवहन्तीं सुरसरस्वतीधारां श्रवणपुटेन पातुं प्रचलन्तो दरीदृश्यन्ते ।'

(पितुरुपदेश)

अन्यच्च —

"परिमितमधुरे प्रकाशे स्थितायां अस्य वस्त्रच्छटा साधारण्यपि हारिणीव सवृत्तासीत् । साधारणमूल्यन्त्वेऽपि स्वच्छसुन्दरसूक्ष्मवसननिर्मितमध परिधानीयम् । उपरि च हारिहरितवर्णसूक्ष्मसुन्दरमुत्तरीयवस्त्र प्रावृतम् अग्रतोऽवलम्बितेन यतास्या वदनं साम्प्रतमवगुण्ठितमभूत् । परं वस्त्रस्य सूक्ष्मतया तन्मध्यगतद् गात्रमुपमा स्फुरमभित प्रसरन्तीवाऽऽसीत् । किशोर्या अस्या वय क्रमोऽष्टादश वर्षेभ्यो नासीदधिकं । अनाख्योज्जृम्भमाणनवयौवनमांसलऽस्या वक्षसि निविड-निबद्धा पाटलकौशेयकञ्चुलिका उत्तरीयवस्त्रान्तरितापि स्वाच्छाययोरतुङ्गताम-नश्वर घोषयन्त्यासीत् ।"

(शिष्या)

अन्यच्च —

"प्रियतम, भगवत्या गङ्गायास्तरङ्गा समाह्वयन्तीव मां स्नेहेन । ते तरङ्गा, यैः सर्वतः पूर्वं त्वदीय सुकोमल स्पर्श प्रापितो मत्सविधे, ये ह्यावा प्रणयसूत्रे ह्यबध्नन्, येषां च सविधे क्रीडा कुर्वतो "को जानीते निभृतमुभयोरावयो स्नेहसारम्" संवत्सरा व्यत्यगुर्नौ । किन्तु तद्दिनमद्यैव व्यतिगतमिति प्रतीयते ।

जगौ । कीदृश्यस्ता गमभवन् मधुरा ? अद्य पुनरपि समागता मधुमयी शारदी च कौमुदी । हृदयं मम चलति किञ्चिदस्तु भगवत्या तस्या भागीरथ्यास्तीरे ।'

(उमा)

—इत्येभिः स्पष्टमवगम्यते यदाधुनिका संस्कृतगद्यरचना कथं संस्कृतेतरवर्तमानभारतीयसाहित्यस्य प्रभावेण प्रभाविता । भाषायाः प्रायशः समासविहीनत्वमत्र शिथिलत्वञ्च विशेषतः उत्पादनमतेनैव प्रभावेण दरीदृश्यते मामकानाम् । कतिपयानां हिन्द्यादिकथानां संस्कृतरूपान्तरणमप्येतत् तथ्यमुद्घाटयति । अनेन हेतुना वर्तमानासु कथासु सरसपठनीयतावद् बहुशः समाविशत । सर्वं सरलतां संस्कृतगद्यस्य समुन्नतिं विकासाय च प्राबल्येन तु केवलं नापेक्षते ।

आधुनिकगद्यस्य वैशिष्ट्यम्

आधुनिकासु कथासु कथानिकासु वा दृष्टिविषयः स्पष्टतः प्रतीयते । कतिपये कतिकारास्तावदादर्शवादिनामाश्रयन्ते अन्ये च यथार्थवादिताम् याचते । उभयोः मिश्रणमपि क्वचित्क्वचिद्दृश्यते परं तत्रापि यथार्थस्यैव प्राधान्यं दृष्टिपथमायाति ।

आदर्शोन्मुखासु कथानिकासु नायकाः सर्वगुणसम्पन्ना एव चित्र्यन्ते । नाप्नुवन्ति ते कदाप्यसाफल्यम् । उद्देश्यानपि साधयन्त तदर्थं दुष्कराणि विदधते । परिस्थितीनां तु दासा न भवन्ति ते न च कदापि तासां स्वामिनः । एतद्दृष्ट्या तेषां विपाकस्यापि निर्धारकादिनापि बहुशः प्रतिपाद्यते । सत्पथवर्तनादृशा नायका आदर्शस्य प्रतिष्ठार्थं प्रयतन्ते यतः पाठकाः प्रेरिताः स्युः । एतासां सुखान्तता गुणान् प्रति श्रद्धापुरस्सरमनुभवेयुः इतराम् ।

एतद्विपरीतं यथार्थवादाधारितासु कथानिकासु नायका इतराणि च पात्राणि प्रायशः गुणावगुणैः संयुज्यन्ते । विशुद्धया दृष्ट्या न ते भवन्ति गुणिनः न वा अगुणिनः । परिस्थितिवशादेव सहसा निकृष्टता वा तत्र समायाति । मानवस्य दैनिकावश्यकताभ्यः परिस्थितेः प्राबल्यमनिवार्यं चापाद्यन्ते । भोजनवस्त्राद्यावश्यकतानां मानवस्य दैनिकः संघर्षोऽपि विशिष्य विवृण्यते । एवं एव वर्गसंघर्षं लक्ष्यता विधीयते । तत्र तु धनिकनिर्धनयोः पारस्परिकं संघर्षं प्राधान्यं धत्ते । इयत्तु सर्वत्रैव प्राप्यते यत् धनिका न कश्चिद्भावमनुभवन्ति । आरक्षाश्च नियताः सर्वेषामेवानुरज्यन्ते ।

आदर्शमुद्दिश्य यथार्थस्य चित्रणमपि इतीव दृष्टिकोणमुपस्थापयति ।

एतदनुप्राणितासु कथानिकासु पात्राणि प्रायशो दौर्बल्याऽनैतिकताऽनास्था-दिभ्यो ग्रस्ता इव प्रदर्शिता । परं कथान्ते तान्येवाऽनुतापभयानि सजायन्ते मन स्थितावेतादृश परिवर्तनमादर्शं नैतिकता वा प्रति कामप्यास्था ससूचयन्ति । सुधार वादिताऽप्यनेन तथ्येन स्पष्टमेवाऽनुमीयते ।

अतियथार्थवादोऽपि कतिपयासु कृतिषु निरूपितोऽस्ति । तत्र तु यथार्थस्य घट्टतम जुगुप्सित वा रूप न केनापि विधिना प्रच्छाद्यते । एतादृशीसु रचनासु मानव-मनसो गहनतलमुद्घाटयितु प्रयत्यते । अतस्तत्र प्रय श्रेयो वा नैव विचारणीयम् । स्पष्टमेवैतादृग्विधमतियथार्थचित्रणमाङ्गलसाहित्यस्य सस्कृतेतर-भारतीयभाषाणा च प्रभावेणैव विधीयते । परिणामत एतादृशीना कृतीना सख्या परिमितैव विद्यते । तथाप्येतत्तु स्वीकरणीय यदाधुनिक सस्कृतलेखक स्वकीयपरिस्थितेर्वातावरणाच्च नैवाऽपरिचित । यथार्थस्यातियथार्थस्य वा चित्रणाय स बाध्यतामिवाऽनुभवति । पर सस्कारै प्रभावित एव लेखक समस्याया समाधान त्वादर्श एव गवेषयति ।

आधुनिकासु गद्यरचनासु भाषाऽपि सारल्यमिव जगाम । परम्परिता सुदीर्घसमस्तपदावली प्रायशो न्यूनेव गतवती । साम्प्रत तु भाषाया सौकर्य सक्षेपश्च समाविश्यते, यथा—

"चक्षुषी अमृदनाम् । अजम्भे । कक्षाद् बहिरायाम् ।"

(कुसुमलक्ष्मी)

अन्यच्च—

"यस्य वस्त्राणि मलिनानि । शुष्क मुखम् । यष्टिहीनो हस्त भग्ने च पादत्राणे आस्ताम् ।"

(साधु-समीक्षा)

अपि च—

"समीपस्थैव सरसी । स्वच्छ पय । मधुरो भ्रमरझङ्कार । पावन पवन । परम कुसुमसौरभम् । अरे । मम पच्छन्देन पलायितोऽय भ्रमर । महदपराद्ध मया ।"

(मामकीन स्वप्न)

एभिरुदाहरणै स्पष्टमिद यदाधुनिको लेखक प्रायश सरलपदावलिमेव प्रयुङ्क्ते । सत्यमेवानेन सारल्येन सस्कृतगद्ये काऽपि गतिमयतेवाऽऽधीयते । पर यदा कदा लेखकेनेदमप्याशङ्क्यते यद् दुरूहा समस्तपदावलि विना तदीय पाण्डित्य

न स्वीकरिष्यन्ते पाठकवृन्देन । अतस्तेन मया सर्वे दुरूहाः शब्दाः समस्ता च पदावली प्रयुक्ता । सर्वो खल्वेतद् भाषायाः सरलीकरणमार्जवं च प्रतिपादयति । भाषायाः माध्यमेन पाण्डित्यप्रदर्शनस्य प्रवृत्तिरपि सततं परिक्षीयते । आधुनिकः लेखकस्तु साम्प्रतं नैजं कथ्यं सम्प्रेषयति । तच्च भाषाया आर्जवेन गतिमयत्वेन च सम्भाव्यते ।

जनसामान्यस्य चित्रणम्

समसामयिके संस्कृतगद्यकाव्ये प्रायशः सर्वेषामेव वर्गाणां चित्रणमवाप्यते । वीरपूजा प्रत्युपेक्षा वृत्तिश्च बहुशो लक्ष्यते । आधुनिको गद्यलेखकस्तु सहस्राब्देभ्य उपेक्षितं वर्गमेव निरूपयितुमीहते । वामधर्मो मतेऽस्मिन् युगे पीडितवर्गस्याङ्कनं सर्वथैव समुचितमाभाति । किन्त्वस्य वर्गस्य कृते लेखकीया सहानुभूतिस्त्वेव पीयमेव प्रतीयते । एतत् खलु परम्परितामुपेक्षामवमाननां चाऽभिव्यनक्ति । परं रचनास्वेतस्य वर्गस्य समावेशेन तदीया दुरवस्था कदर्थना च प्राकाश्यं गच्छति ।

प्रस्तुत कथानिका-सङ्कलनम्

एतादृशि पृष्ठभूमौ राजस्थानस्य साम्प्रतिकानां कथा-लेखकानां कतिपया कृतयोऽस्मिन् सङ्कलने प्रस्तुतीक्रियन्ते । सीमितावधि कारणेन सङ्कलितकथानिकानां सङ्ख्यां तु वर्धितुं नाशकम्, परमेतासु कृतिषु ।

किमपि प्रत्यग्रत्वं नवत्वं वाऽऽभासयितुं शक्यते । यथार्थचित्रणं तु प्रायः सर्वासु कथानिकासु वरीवर्ति । भाषाक्षेत्रे च वैविध्यस्य न कोऽप्यभावोऽस्ति । एकत्र तु प्रौढिं समलङ्कृतं गद्यं दृष्टिपथमवतारयति अपरत्र च लघुपदावल्या सज्जितं गतिमयत्वं सम्प्रेषणीयत्वं चाऽभिनवं रचनासामर्थ्यं प्रकटीकरोति । सत्यमेवोभयविधाप्येषा रचनाशैली सहृदयानां मनः प्रीणयितुं क्षमिष्यते इत्याशास्यते ।

सङ्कलितानां कथानिकानां विषये न किमपि आवश्यकमपरिहार्यमिवास्ति । यतो ह्यनेन खलु कोऽपि पूर्वाग्रहो जनिष्यते इत्यनुमीयते । तत्रैव सम्प्रधार्यं कथानिकानां कथ्यविषय एव पुरस्करणीयोऽस्ति । अयञ्च सर्वो सुधीवरैः पाठकैः स्वयमेवाऽवबोधनीयम् विश्लेषणीयं च ।

(१) भ्रातृस्नेहः

म. म. शङ्करमहोदयैर्निखितायामस्यां कथानिकायामवरजः तु स्वमहोदर-स्याऽमर्यादितमाचरणमग्रजं प्रति नितरां च प्रातिकूल्यं निरूपितम् अपरत्र चानुजं

सत्यं वाऽग्रजस्य नैसर्गिकः स्नेहः, तितिक्षा, अन्तर्दमनहङ्कारस्याऽभिव्यक्तिः । अनुजस्तु वारम्वारमग्रजं तिरस्कर्तुमेव प्रयतते, लोकाचारं परिभावयति, सुहृदादीनां परामर्शं च स्वोत्सिक्ततया न्यक्करोति । अग्रजस्तु सान्त्वयितुं प्रसादयितुं च भृशं चेष्टते । नैजमवमानं तु सः पौनःपुन्येन तितिक्षति । अन्ते च तदीयाः प्रयत्नाः साफल्यं भजन्ते । अत्र खलु 'यत्नो नैव परित्याज्यः' इत्येतत् प्रतिपादितमस्याः रचनायाम् । अमुष्याः कथाभाषाशैलीनिदर्शनार्थमेकमुदाहरणं पुरस्क्रियतेऽत्र ।

'शब्दानेतान्निशम्य तु मां शतशः वृश्चिका एव युगपददशन्नूनम् । अनुतापतप्ते दन्दह्यमानदेहोऽहं लज्जयाऽवाङ्मुखोऽभवम् ।

अन्वशोचमहं हन्त हन्त ! कथमहं कर्त दुर्विपाकेन कस्य वा दुहृदः समर्थनेन देवनिर्विशेषस्य समर्चनीयस्य ज्यायसो भ्रातुर्नवनवनीतमृदुलं हृदयं तुदन्नानैतुदम् । अहं दुष्टोऽस्मि, महान् नीचोऽस्मि परमं पापीयाश्चास्मि । ममेदृशं दुर्व्यवहारं दर्शं दर्शं मध्येसुरलोकं विराजमाना पितृचरणा अपि हन्त तपन्त्येव ।"

उदाहरणेनानेन प्रौढिरसयुक्तं समलङ्कृतं च भाषासौष्ठवं सहजतया प्रशंसितुं शक्यते । वाग्विचारयोश्च प्रवाहो न कुत्राप्यवरुध्यते । सत्यमेव

'सुखोदर्कं हि मर्षणम्"

(२) सापराधः

विद्याभूषणस्य श्रीगणेशरामशर्मणोऽस्यां कृतौ यथार्थवादमाश्रित्य कोशाध्यक्षस्थापकेन कृतश्छलनापहारः चित्रितोऽस्ति । सुप्रतिष्ठितो विपिनविहारी स्वाधिकृताद् वैरमस्थानाद लक्षरूप्यकाण्यपहरति, तत्कृते च कारावासदण्डमपि भुङ्क्ते । परं दारैः सहोपजातो विश्वासघातः साफल्यमेव जगामेत्येतन्निरूपणं सापराधानां कृतेऽपि नैव तुष्टिदायकम् । वस्तुतस्तु कारागृहे सापराधस्य निवासविधिर्न केवलमपराधिवर्गं तर्जयति, अपि तु सर्वनिवापराधिनस्तादृशोऽपराधकार्याद् बहुशो वर्जयति । विपिनविहारिणः एतद्व्याजकथनमप्यपराधिनां कृते नयनोन्मीलनं विदधाति—

"श्रीमन् ! कथमिवापक्षपयामि तानेतान् दण्डभोग्यान दुर्दिवसान् । क्षणोऽपि च युगायते । स्वकुलप्रतिष्ठा, जीविकावृत्तिः, सर्वमपि मे विनष्टम् । चौर्यकलङ्कश्च मम शिरस्यापतितः । मम गृहिणी, बालकाश्च सर्वेऽनाथाः क्षुत्क्षामकण्ठाः करुणकरुणमवसीदन्ति । ("एवं वदन् स दीर्घमुष्णं च निःश्वस्य तत्कण्ठावरोधं सगद्गदं रुदन् नेत्राभ्यां स्थूलस्थूला अविरला अश्रुधारा प्रवाहयति ।")

विपिन विहारिणोऽभिनयकौशलमेतत् सर्वथैव प्रशस्यतामर्हति। न तदीये कथने कोऽपि सत्यांश आसीत्। सम्प्रति तद्गृहेऽभावाना स्वस्तित्वमेव नाविद्यत। तस्य भार्या सन्ततिश्च न खल्वनाथा क्षुत्क्षामकण्ठा दाऽऽसन्। धनापहरणमपि तेन विमर्श कृतमित्यपि विचारणीयम्। दायभागातिरिक्त स कोशव्यवस्थापकोचित प्रभूत वेतनमपि प्राप्नोति स्म। एतादृक्स्थितौ न काऽप्यपरिहार्यताऽविद्यत धना पहरणाय। सवानिवृत्तौ या विपुला राशिस्तेनाप्तव्या आसीत् साऽपि पदच्युतिवशात् प्रध्वंस गता। प्रतिष्ठाहानिस्तु न कदाप्यपाकरणीया आसीत्।

परमेतत् सर्वं विदुषा लेखकेन साऽभिज्ञानमुपेक्षितम्। तदीय कथ्य तु विपिनमद्दशाना कृतापराधाना साफल्यमेवोद्घोषयति। अत खलु सापराधोऽपि विपिनविहारी कारागारान्निर्मुक्त सन् स्वनन्दनादिवससमारोह मधुरजनीमिवोद्यापयितु प्रस्तौयेवम् —

'सर्वेऽपि नागरिका लोकास्तमिममुत्सवमुद्यापयितु स्त्रीदामा इव गद्गरिका प्रवाहमनुसरन्तस्तन्मनस्कास्तद् गतप्राणश्वासोच्छ्वासास्तच्चेष्टास्तत्समर्पिताशेषमनोवृत्तयस्तत्रैव जीवनसाफल्य विन्दमाना मोमुह्यन्ते। आवातावत्स्वगृहमेवाधिवसतावद्य रात्रौ तमिम महोत्सवसमारोह सानन्द ससुख च द्विरागमनसमय मधुरजनीमिवोद्यापयाव यमुत्सव निमित्तीकृत्याह कारागारान्निर्मुक्तोऽत्र त्वामुपनयोऽस्मि, मृणालिके! बाले! मुग्धे!'

सत्यमेवेद गद्य सुन्दर प्रवाहमय सजीव च प्रतीयते। कथात्र चैनाद्भुतरसामन्द विशेषत समुल्लसति। निश्चप्रचमनेन लेखकस्य गद्यकलाप्रावीण्य भूरिशोऽभिव्यज्यते।

(३) आत्मवेदना

डॉ० प्रभाकरशास्त्रिण कृतिरेषा बहूसख्यकानामन्त्यजाना विषन्नघनीभूता मनोवेदना च निरूपयति। उद्यमासक्ता अपि धोबलसदृशोऽन्त्यजा प्रतिवासर द्विवार भोजनमप्यवाप्नु न क्षमन्ते इत्येतदपि कथानिकायामस्या बहु चित्रितम्। विदुषा लेखकेन राधासदृशीनामन्त्यजकुमारिकाणा वैवल्यमपि सकरुणमेव पश्यन्तमत्र। रङ्कानामपि वाचन प्रतिष्ठा भवतीति सवर्णैर्न खलु विस्मरणीयम्। स्वात्मजाया शीर्ण रश्मिकुसुमम इव धोबल स्थिदुद्विग्नता भेजे, इत्येतदत्र द्रष्टव्यम्—

'श्रुत्वैतत् स भृश प्रकुपित पर नाऽक्षमत स प्रतिकर्तुम्। न शक्यते

ग्रामणी क्षणमात्रमप्यन्तरं । स तु राधामेव गर्हयिष्यति । तदनुसारं तु राधया एव तमाकृष्टुं प्रवर्तितं भवेत्, प्रत्याख्याने च कृते सति सर्वदा सरक्षिता स्यात् । सत्यं तत्रापि ग्रामणी स्वात्मानं नैव गर्हयिष्यति । स खलु न स्वीकरोति यदन्यजनानामपि काचन प्रतिष्ठा भवति । स तु मन्यते गौरवमिति यत् भवनानां गृहस्वामि-नाऽस्पृष्टा पावनतामापद्यन्ते ।"

सपरिवारं ग्रामात् पलायितोऽपि धौंकल स्वीयं ग्रामं प्रत्यावर्तितुं विवशीक्रियते कैश्चनाज्ञातैर्हेतुभिः । एवं खलु स न तु ग्रामे स्थातुं न च ततः प्रस्थातुं शक्नोति । ग्रामे निवसता च तेन स्वप्रतिष्ठापि रक्षितुमशक्या । चेत् स ग्रामणीं शरणं व्रजति, तदा तु तस्य प्राणरक्षणमपि सन्दिग्धमिव जायेत । धौंकल-स्यैषा कारुण्येनाप्लाविता मनःस्थितिर्द्रष्टव्यामिति—

'किं करोमि क्व गच्छामि ?' स्वपरिवारमपृच्छत् धौंकल । सन्ततं किञ्चिदेव हीनमासीत् तस्य वचनम् । नैराश्येन च पूरिता आक्रान्ताऽस्मीत्याकृतिस्तदीया । न स्थातुं न च गन्तुं शक्नुवन्तः किं कुर्युस्ते वराकाः । दौर्भाग्येन समुत्पीडितास्ते परिश्रान्तिवशाद् भूमावेवाऽस्वपन् ।"

वस्तुतोऽस्याः कथानिकाया नायको न केवलमसवर्णोऽपि तु सर्वथैव विपन्नः प्रपीडितश्च विद्यते । विरोधिसाम्मुख्यमपि स नैव विदधाति । पलायितुकामश्च स स्वकीयं पराभवमेवाङ्गीकरोति । इत्थं तु कथानायक एव नायिकोचितौचित्यात् पतितोऽसफलमिवाप्नोति । परमाधुनिककथासु भूरिशः चित्रितं नायकत्वमेवात्र परिलक्ष्यते । अत एवैषा कृतिर्निश्चप्रचं साफल्यं भजते ।

(४) भाटकभवनम्

आचार्य विश्वनाथ मिश्रेण लिखितायामस्यां कथानिकायां हास्यरसस्य स्फुटत्वं सहजमेवानुभूयते । विदुषा लेखकेन भाटकभवनस्य जीर्णत्वं शीर्णत्वं वा बहुधा प्रतिपादितम् । कथामुखे एव भवनवर्णनं पाठकान् स्मितदिशं नयति, यथा—

'प्रत्येकं ऋतौ परिवर्ततेऽस्य स्वरूपम् । वर्षर्तौ तु भवनमिदं तादृशं भवति जलक्लिन्नं येन पदे पदे स्खलनं पतनं च स्वाभाविकम् । शीतकाले तु छिन्नताऽन्यथाधिक्यात् प्रचुरकम्बलादिके सत्यपि दन्तानां कटकटायमानताऽपाकर्तुमशक्या । ग्रीष्मकालस्य तु वर्णनैवान्या । महता यत्नेन क्षणं कथमिह विश्रम्यताम्, क्षणानन्तरं तु कथमिह वर्ततामित्यन्वेषणीयो विषयः ।"

तस्मिन्नेव गृहे प्रयस्या अतर्कितागमनेन कथानायकस्य वपुषि स्वेदोऽजनि लभिन्न तदीया जिह्वा च शुष्कतामगाम। पर किमपि चातुर्यमिव प्रदर्शयन स प्रोवाच—

मा भैषी प्रिय! विवाहात पूर्वमेव परिष्कृतमिद भवन मनोजनिवास कल्पमवलोकयिष्यसि। सवसाधनसम्पन्न निश्छिद्रकेऽत्र भवन्मूरगकाणा प्रेमाऽमानो पि नावलोकयिष्यन्ते। का खलु कथा वराकाणामाखूनाम ?'

निश्चयेन एव। रसना वयमानयुगस्य भाटकभवनेव मिना दुःस्थिति बहु चिन्तयति।

(४) पङ्गु

श्रीमत्या मञ्जुशर्माडियया लिखिता का ानिका प्रेमाकाशनमाश्रयते। अत्र यो नायक प्रेम्णि निराश सन्नात्महत्यायै चेष्टते पर तथापि साफल्य नाप्नोति। वाष्पयानाऽऽहत स केवल पादार्द्धेनैवाऽऽहीयते। एव खलु पंगुत्वमापन्न एष नायको मासमेक यावत् चिकित्सालये निवसन् स्वप्रयासस्य साफल्य स्वीकरोति। पर चिकित्सालयान्मुक्ति प्रतीक्षमाणेन तेनान्तिम दिवस स्वस्थितौ विपर्यास इव प्रत्यभिज्ञायते। यत खलु तस्मिन्नेव क्षणे तदीया प्रेयसी तत्रागच्छति नायक त गृहमानयति। सायन्तन काल तयोरुद्वाहो भविष्यतीत्यनेन सह कथैषा समाप्तिमेति।

कथानकस्य साधनेऽस्मिन् युगस्य त्वराबाहुल्य तस्या दुष्परिणामश्च चित्रितौ। चित्रकार्थी स्वप्नमाणो नायक प्रयस्या अस्वीकृतिमात्रस्य सद्य एवात्महननाय प्रचचाल। एष दुष्प्रयासो मानसिकरुग्णतामेव व्यनक्ति। स्वस्थमनसा तु न काऽप्येव खलु मुमूर्षति। नायकस्यैतज्जिजीविषाराहित्य सरला कथया बलवत्तया प्रकटीक्रियते यथा—

साम्प्रत यानागमन निकटतरमाभाति स्म। धराप्रकम्पनकरो भयावहो निनाद तत्र कर्णान्तर्गौर्न्नमिव सजनयति स्म। पर मुमूर्षुस्य मुग्धमुद्रया न प्रतीयते स्म काऽपि विरोधिता तदविचार वीथौ। तेन प्रक्षिप्ता स्वीया दृष्टिर्यानागमनदिशि। विज्ञाय च तदागमनक्षण स सावरमेव लोहमार्गे शय्यामिव विधाय तदुपरि स्वच्छन्दमते निषण्ण। सर्वविमुक्तये च स निमीलयामास स्वनेत्र। एव स्थितेन तेन श्रवसाम्य पिवान्धौ।

कथानिकया युवकयुवतीना मनोभावान् क्रिया प्रतिक्रियाश्च प्रकटयितु सम्यक प्रतीयते। एतदीया भाषा सहजसरलास्ति। परम्परया सहजनेव गतिमयतायां

वर्त्तनेऽत्र। युवावस्थोचित भावुकत्वं तु समग्रतो भ्राजतेऽस्यां कथानिकायाम्। नवत्वेन सरसत्वेन चालङ्कृतैषा रचना सामति प्रशस्यतामर्हति।

(६) स्मारकम्

हिन्दीसंस्कृतयोर्विशिष्ट कथाकारस्याचार्यचन्द्रमौलेरेषा कृतिरस्पृश्यता-निवारणसमस्यां पुरः स्थापयति। स्वतन्त्रताप्राप्तेरद्यावधि समस्यायाः समाधानं नोऽजनि। अस्यां दिशि कथाकारस्येयं रचना सर्वथा प्रत्नैव विभाति। अनया कथया लेखकस्य राष्ट्रियदृष्टिकोणस्य पर्याप्तपरिचयो मिलति।

कथातत्त्वदृष्ट्यापीयं कथा समाजनीया वर्तते। अस्याः कथानकं न केवलं सामाजिकमपि तु सामयिकमप्यपि। प्रारम्भत आसमाप्ति अस्य सामयिकत्वस्य सम्यग् निर्वाहोऽपि विहितः। सर्वाण्यपि पात्राणि स्वस्वचरितस्य प्रतिनिधिभूतानि सन्ति। यत्र कृष्णदत्तः प्रतारणपरायणोऽस्ति, तत्रैव मेघसिंहः सत्यनिष्ठकर्मकर्तृरूपे निर्दिष्टोऽस्ति। दयारामस्योत्समानमन्यत्र दुर्लभम्। सम्यगत्र सर्वेषां चरित्रचित्रणं साधुसम्पन्नम्।

कथोपकथनस्यापि सम्यग् निर्वाहो विलोक्यते। वातावरणनिर्माणे कथायां वर्तते किमप्यसाधारणं वैशिष्ट्यम्। ग्राम्यवातावरणचर्चातिरिक्तं विशेषाधिवेशनस्य देशकालनिर्वाहः साधु प्रतीयते। शैलीविषये नो किमपि बहु वक्तव्यमपेक्ष्यते। कथाकारस्य हृदयग्राहिणी वैदर्भी शैली कथानकं परिणतिं नयमाना दरीदृश्यते। उद्देश्यविषयस्तु स्पष्ट एव। सामायिकास्पृश्यसमस्याया समाधानमेवात्र विराजते प्रधानं लक्ष्यम्। बलिदानमन्तरेण किमपि कार्यं नो सम्पद्यते, इति तु तथ्यमेवास्ति। अस्पृश्यहरिजनानां कृते सवर्णैः कूप उद्घाटितः, किन्तु बलिदानानन्तरमेव, न पूर्वमिति मोद्देश्येयं कथेति साधिकारं वक्तुं पार्यते। भाषासौष्ठवकृते दयारामस्य भाषणेन सञ्जनिता प्रतिक्रियोदाह्रियतेऽत्र—

"सहसाऽन्तरिक्षं चकम्पे। मन्ये मेदिनी चचाल। दयारामस्य निवेदनं व्यर्थं जातम्। धर्मध्वजिनः प्रलयं कर्तुं कटिबद्धाः। कृष्णचन्द्रस्य मौनं सङ्केतमाप्य तज्जना निर्दयं प्रहर्तुं तत्परा जाताः। अनवरुद्धो यष्टिप्रहारो ननर्त। नृशंसताया नग्नताण्डवं प्रवृत्तम्। एकत्र हिंसा परत्राहिंसा। एकत्रास्त्रं परत्र रिक्तहस्तता। अस्ति कीदृशं वैचित्र्यम्। पशुतामेव तामसीवृत्तिरारूढा। सर्वे परस्परं रुधिरस्य पिपासवो जाताः। मिथो हस्ताहस्ति, दण्डादण्डि, केशाकेशि, कुन्ताकुन्ति प्रहरणं प्रवृत्तम्।"

(७) दिग्भ्रमः

श्रीकलानाथशास्त्रिणा लिखितैषा कथानिका विश्वविद्यालयेषु प्रवर्तमान

वातावरणं वर्तते। तत्र यानि छात्राणां दैनिक क्रियाकलापानि विशेषतश्च छात्राभिः सह तेषां सम्मिलनादिकमोऽत्र किमपि वैशद्यमेति। नाटकादिमञ्चनावसरस्तु तेषां कृते प्रमोदातिरेकमावहति यत्र स्वच्छन्देनानुशेषु क्षणेषु न केवलं छात्राभिः सह तेषामालापो ऽपि तु स्पर्शात्मकं किमप्यनिर्वचनीयं सुखमप्यासाद्यते। नाटकस्य नायकत्वं तु प्रायशः सर्वैरेव काम्यते। नायकत्वेन च वृता व्यक्तिः ते भाग्यशालिनं गणयन्ति विद्यन्ति।

एतादृशं कथानकमाश्रित्य गद्यकाव्यानिर्माणाय लेखकेन सुधागिरीशयोः प्रणय एवं प्रसनमाकर्षणमस्याः कथानिकायाः सुवर्णितम्। विवाहं प्रति सर्वथैवानुत्सुको गिरीशः सुधायाः सामीप्यलाभेन भृशं मोदते। तस्मिन्नाटकनिशीथेऽपि तावुभौ सम्येमागमावसन्। अन्योऽन्यस्य छात्रावासीये कक्षेऽपि तयोः संलापो मध्यगतः याव। प्रचलति। यो गिरीशश्छात्राभिः सह संलापं न कदाप्यकरोत् स एव साम्प्रतं सुधया भावमानपितुं न कमप्यवसरं तत्याज। दिवसत्रयं यावदेका तयोरसमिवाश्रित्य स विवाहार्थं कृतनिश्चयो बभूव। भार्यारूपे कां तत्र वृणोति तु सुखेनानुमेयम्। सुधैव तस्य पत्नी भवितेति निश्चित्य स पित्रोरनुमत्यर्थं स्वगेहं प्रतिष्ठते।

इत्थमेतदीयं कथानकं सर्वथैवाधुनिकं रोचिष्णु च प्रतीयते। अतिरञ्जनया विरहितमप्येतत् प्रत्यग्रं केन केनापि समाविष्टम्। अस्याः कथायाः चित्रितं वातावरणं परिवेशश्च प्रत्याययतीव पाठकान् सर्वान्। युवकयुवतीनां कृते त्वेषा कृतिर्बहु रोचिष्या स्यादनुमातुं शक्यते।

शुद्धरचनायाः दृष्ट्या त्वेषा रचनातीव काम्या। अत्रत्यं शब्दचयनं पदविन्यासश्च किमपि वैशिष्ट्यं धत्ते। संवादितेषणमपि प्रभूतमात्रायां विहितमस्यां कथानिकायाम्। परिवेशसर्जना तु शनैः शनैः पाठकानां मनांसि परितः आवर्जयति। इत्थमेषा कृतिः समग्रेवाभाति।

साम्प्रतं गिरीशस्य मनसि परिवर्तितस्य चित्रणमत्रोदाह्रियते—

'किन्तु नाटकस्य पूर्वाभ्यासेऽस्य मानसे क्षणेन किञ्चिता तरिक परिवर्तनमिव विधीयते इत्याशङ्कते स्मायम्। दत्तानि च नाशकानिमानि दूरमपसरन्ति। कथं तदिदमभवत्? क्षणिकाऽस्यै व्याजेन सुदीर्घपरिश्रमानन्तरं विश्राममवाप्य मनोविनोदोऽयं का वा हानिं सम्पादयेत्? नायं तत्र कामपि हानिमन्वभवत्। सुधापि तु प्रथमश्रेणिका छात्रैवाऽभूत्। साऽपि तु नाटकस्मिन् भूयांसं समयं यापयति। साऽपि गभीरा समाहिता च छात्राऽस्ति। द्वयोरन्यथाविधं साम्यं गुणगणस्यैव। तस्मिन्नायकानां

होरात्रये पूर्वाभ्यासैर्व्यतियापिते को वा दोष समापतति ? सर्वमिममन्तर्द्वन्द्व निरन्तरमन्वभवदसौ ।"

सक्षेपतोऽस्या रचनायामनुभूते प्रामाणिकता, सम्प्रेषणीयता चाभासयितु शक्यते ।

(८) मूल्यानमूल्यानि

डॉ० (श्रीमती) शशिगुप्ता अस्या कथाया लेखिकाऽस्ति । अस्यामपि कथानिकाया छात्र-छात्रादीना कथानक सगृहीतम् । युवकयुवतीना हासपरिहासादारभ्य हेमाया विशृङ्खलितमिवाचरणमत्र चित्रीयते । विजयस्तु तदाचरण तद्वचनानि च सर्वथैव विश्वसिमिति । स स्वकीये कक्षे समग्रा रात्रि तया सह यापयति । मात्रा च निर्भर्त्सितोऽय युवा हेमामुद्वोढुमुपकल्पते पर न केवल हेमाया पिता, अपि तु स्वय हेमा तमुपहसत । प्रेमस्यैव प्रवञ्चित स मातु समीपमागत्य क्षमा याचते ।

इत्थ सन्त्यस्या कथाया यौवनोचित उत्साहातिरेक सवर्णित । नैतिकताया स्खलने च यत्परिवर्तनमाधुनिके युगे समागत तदपि कथानिकायामत्र प्रत्यक्षीक्रियते । काश्चन सम्पन्ना युवतयस्तथाविधाचरणाय पितृभिरप्यनुज्ञाप्यन्ते, इत्यत्र विस्मयमिवावर्जित । परमेतत् सर्व युगसत्यमाभाति । प्रवञ्चनमेतादृश न तु युवकैन च युवतिभि करणीयमित्येव सदिश्यतेऽनया रचनया ।

भाषाशैलीमुदाहर्तु मेष एवाशो द्रष्टव्य —

"सन्ध्याकाले विजयस्य सुहृद आगन्तुमारेभिरे । पञ्चसु तेष्वेका युवतिरप्यविद्यत । हेमेत्यभिधानमासीत् तस्या । नैसर्गिक तदीय सौन्दर्यम् । वेशभूषा चातीव रम्या । युगानुकूल तस्या नेपथ्य बलादाकर्षति स्म युवकान् । त परिवृता सा मुक्तभावेन स्मितान्यकिरत् । यदि कोऽपि तस्या हस्त धर्तु प्रयतते, तदा सा नैव क्षपते । पर केनापि व्याजेन हस्त तु शीघ्रमेव प्रत्याजहार सा । स्पष्टत तदीयोपस्थित्या स्मितैश्च सर्व एव युवका हृष्यन्ति स्म ।"

स्पष्टमेव किमपि नवत्व धत्ते कथानिकेयम् ।

(९) स्वीकृता

डॉ० नन्दकिशोर गौतमेन लिखितायामस्या कथाया यौतुकसमस्या वर्णिताऽस्ति । राधाया विवाहो यौतुकाभावेन सपन्नता न याति । मध्येविवाह वरिष्ठयक्ता

च सा दास्यकर्म स्वीचकार। परं गृहस्वामिनः क्रूरदृष्टिमालक्ष्य सा तदपि परित्यक्तवती। ततश्च भृतिकार्यं तया आरब्धम् किन्तु तत्परित्यागायापि सा दुष्टयुवकैः विवशीकृता। एवं सातीव सतप्ता सा गृहान्निर्गत्य रेलगन्त्या प्रथमश्रेणिकक्षमुपातिष्ठत्। यात्राप्रमाणपत्राभावे निरीक्षकेण प्रताडिता सा रोदितुमारेभे। ततश्च तत्रैवासीनेनापरिचितेनैकेन युवकेन तस्याः कृते प्रमाणपत्रं क्रीतम्। युवकस्तु स राधायाः पतिरेवासीत्, येन सा मध्येविवाह परित्यक्तासीत्। ततस्तु सर्वथैवानाथापि सा पुनरपि सनाथाऽजायत।

एवमस्याः कथायां कौतुकाभावेन प्रपीडितायाः युवत्याः अरुन्तुदं जीवनं चित्रितम्। अस्याः भाषा-शैली त्वतिसुगमा प्रतीयते।

(१०) राष्ट्रनिर्माता

डॉ॰ ईश्वरानन्दशर्मणा लिखितैषा कथा कामपि सुषमां विशेषतां चाश्रयते। अन्तर्द्वन्द्वात्मिकायामस्यां कृतौ देशनिर्मातॄणां शिक्षकाणां दुर्दशाऽभिवर्णितास्ति। आजीवनं समाजदेशादिनिर्माणे तिलशः आत्माहुतिं विदधाना अपि शिक्षकाः सेवानिवृत्तिं समवाप्य कीदृशीं कारुणिकस्थितिं प्राप्नुवन्ति इति त्वत्र वैशद्येन प्रकटीकृतम्। जनार्दनो यदा सेवानिवृत्तो भवति, तदा तत्समीपे नासीत् कोऽपि सुरक्षितो धननिधिः। लघीयानपि तदीयः परिवारः सर्वथाऽभावमेवाऽनुबभूव। एवं खलु जनार्दनस्य जीवनसन्ध्यायां दयनीया दशा सर्वातिशायिनीवासीत्।

एतत्कथानकमासमाप्ति गतिमदवलोक्यते। वातावरणनिर्माणे तु कथाकारस्य सिद्धहस्ततैव प्रत्यक्षीभवति। एवं खल्वेषा कथा सोद्देश्या सूक्ष्मेक्षिकया च ग्रथिता विभाति।

साम्प्रतं कथा शैल्याः एकमुदाहरणमत्र प्रस्तुतीक्रियते—

“नागता अर्थेति दिवं पश्यन् जनार्दनो दीर्घं निश्श्वासं तत्याज। स्वकीयार्थिकदशया स भृशं विव्यथे। सोऽचिन्तयत्—समाजं जीवनपर्यन्तं सेवमानस्य मम कृते स किमकरोत्। मह्यं राष्ट्रनिर्मातुर्दीयमानं पदमुपहासास्पदमिव प्रतिभाति। मम शिष्याः सर्वक्षेत्रेषु कर्मसम्पृक्ता वर्तन्ते। परं तैरपि किमहं कदापि सध्यातः? पुरस्काररूपेऽवकाशप्राप्तवेतनेन शतमात्रमुपलक्षितमेवाहम्? समाजस्य दृष्टौ मदीयं मूल्यमेतावदेव।”

आशास्यते यदनया कथया राष्ट्रनिर्मातॄणामध्यापकानां दयनीयां दशामपाकर्तुं प्रयतिष्यते।

(११) द्वौ शास्त्रिणौ

डॉ० मनोहरशर्मणा लिखितायामस्यां कथायां द्वयोः सहपाठिनोः दीर्घकालान्तरं पारस्परिकं सम्मिलनं चित्रीकृतम्। तयोरेकस्तु ज्ञानशास्त्री, द्वितीयश्च पाकशास्त्रीति नाम्नाऽऽकार्यते स्म सखतोनेऽध्ययनकाले। साम्प्रतमपि भानु पाकक्रियानिरतः सन् स्वनाम सार्थकं चकार। ज्ञानचन्द्रस्त्ववर्जनाभावे ज्ञानशास्त्र्येवातिष्ठत्। ततस्तु भानुना स्वमित्राय ज्ञानशास्त्रिणे कस्यापि श्रेष्ठिनो गृहे पूजकपदमुपकल्पितम् एवं स मित्रधर्मं निर्वहन् ज्ञानशास्त्रिणः कष्टान् झटिति दूरीचकार।

अत्र खलु ज्ञानस्य तुलनायां कर्मणो महत्त्वं प्रतिपादितम्। शास्त्रिणा स्वयमपि स्वीक्रियते यत्—

"भ्रातः! तव पाकशास्त्रैव मां पण्डितमकरोत्, अन्यथा मम विद्या व्यर्थैव स्यात्।"

नैराश्येनाभिभूतस्य पण्डितस्येयमात्मस्वीकृतिरद्यतनस्य वृत्तिराहित्यस्य दुष्प्रभावं व्यनक्ति। अधुना न जाने कतिसंख्यका उच्चशिक्षयापि युवकयुवतयो वृत्त्यभावे तादृशेनैव नैराश्येनाभिभूताः सन्ति।

सत्यमेवेयं रचना करुणभावस्य अद्भुतं रूपमभिव्यनक्ति।

(१२) भग्नत्रिकोण.

श्रीमेवाराम कटारा' पङ्क्तयेयं कृतिरेकं त्रिकोणं प्रस्तुतीकरोति। दीपकस्य प्रथमा पत्नी ज्योतीतिनाम्ना प्रथिताऽऽसीत्। सा रूपवती सुशिक्षिता चाऽप्यासीत्, किन्तु विवाहस्य दशवर्षानन्तरमपि सा सन्ततिं न लेभे। अनेन हेतुना तदीया श्वश्रूरतिसंतप्ताऽजायत। तया वारंवारं प्रेरितो दीपको ज्योतिमपरित्यज्याऽमितानाम्नीं द्वितीयां पत्नीमानिनाय स्वगृहम्। अमितापि बहुकालं यावन्न कामपि सन्ततिमाप। अत्रान्तरे ज्योतिं प्रति दीपकस्य स्नेहो न्यूनत्वं न जगाम। एतदालक्ष्य पितृसम्पन्नतया गर्विता साऽमिता दीपकं परितत्याज। दीपकेनापि तत्किञ्चित् कार्यालयात् त्यागपत्रं प्रदत्तम्। परं यदा स गृहं प्रत्यावर्तत, तदैव तेन ज्ञातं यज्ज्योतिस्तु गृहे शान्तिमानेतुं ततो गतासीत्। परं तया स्वपत्रे एतदपि सङ्केतितं यत् सा गर्भवती आसीत्। अथ खलु दीपकः उभाभ्यामपि पत्नीभ्यां विरहितः सन् बालकान् पाठयितुमारेभे। ज्योतेः स्मृतिस्तु तं नैवात्यजत्।

एकदा स कस्मिंश्चिन्निर्जने स्थले अमितां ददर्श, प्रत्यभिज्ञातवान् च ताम्।

परमस्मितया तु स नाऽभिज्ञात । तया निवेदितं यत्तत्पितुरुद्योगालयस्य भग्नतया काऽपि श्रमिको मृत । ततस्तु अमितया सह तज्जनको तत्र पलायित । तदनन्तरं दीपकस्त्वमिता स्वमित्रगृहमानिनाय । मित्रं स्वा रक्षाधीशक आसीत् । स च ज्योतेरेव भ्राता । ज्योतिरपि सपुत्रा तत्रैवाऽविद्यत । एतद् दृष्ट्वा अमिता भृशमतप्यत । स्वमपराधमाचिन्त्य सा रोदितुमारभत । ततस्तु त्रिकोणस्य तिस्र रेखा पुनर्मिलनं गता । स लग्न तस्मिंस्त्रिकोणसङ्गमे प्रयाग इवासीत् ।

इत्थमेषा कथानिका सन्तत्यभावेन जनितं त्रिकोणं प्रस्तुतीकरोति । न केवलं भारतेऽपि तु सर्वस्मिन्नेव जगति स्त्रिया वन्ध्यात्वं विवाहोच्छेदाय कल्पते । द्वितीयोऽपि विवाहो यदा कदा सन्ततिप्रदानसामर्थ्यं भजते । एतदेव कथायामस्यामुपकल्पितम् । प्रथमां भार्यां प्रति दीपकस्य दृढ स्नेहोऽपि भूरिश आख्यात । अमितायाः मात्सर्यमपि प्राचुर्येण निरूपितम् । तदीय पत्र तु दर्पोत्सेकनिदर्शनमेवास्ति ।

नास्ति बहु कथनीयमस्याः शैलीमधिकृत्य । स्पष्टमेवेयं केनाप्यार्जवेन संयुक्तेवाभाति ।

(१३) सत्यस्यान्वेषणम्

कुमारी प्रभा खत्री अस्याः कथायाः लेखिकाऽस्ति । अस्यां कथानिकायां सत्यस्याऽन्वेषणाय कृता प्रयोगा विशदतया प्रस्तुतीकृता ।

विज्ञानस्याध्येता विशालः सत्यमन्वेष्टुं प्रायतत, परं तस्य सुहृत् प्रकाशस्तमेव निरर्थकमिव मार्गं त्यक्तुं सदैवोपदिशति स्म । विशालस्य तद्विषयाग्रहविशेषं च दृष्ट्वा प्रकाशेनैक प्रयोगोऽभिकल्पित । तस्मिंश्च विशालस्य सहयोगोऽप्यपेक्षितस्तेन ।

ततस्तु मित्रे ते डाक्टर-वैद्य-ज्योतिषाचार्य-पीरादीन् समुपगते । उदर-पीडायाः शमनं च सर्वत्र प्रार्थितं विशालेन । डाक्टरादिभिश्च पीडायाः चिकित्सा भिन्नतया प्रतिपादिता । तैराख्यातं निदानमपि बहु रोचकमासीत् ।

सर्वमेतत् प्रकाशयित्वा प्रकाशेन निष्कर्ष एष प्रस्तुतीकृतो यत् सत्यं त्वनुभूतेरेव विषयोऽस्ति । तदन्वेषणं च स्वात्मन्याश्रय विनैव स्वाभ्यन्तरे एव करणीयम् । एतत् संश्रुत्य विशालोऽपि प्रत्ययमाप । प्रसन्नमुद्रया स निजगाद यत् सोऽपि निजेनैव प्रयासेन सत्यमन्विष्यति ।

इत्थं सुन्दरैषा कथानिका सत्यान्वेषणसदृशं कथानकमाश्रयते । स्वयं

लेखिकाऽपि स्वीकरोत्येतत् तथ्य यत् सृष्टेः सर्वे प्राणिनोऽनन्तकालत सत्यस्यान्वेषणाय प्रयतन्ते, पर न केनाप्यस्या दिशि साफल्यमवाप्तम् ।

पर प्रकाशेनोद्घोषितो निष्कर्ष सशक्तता धत्ते । निश्चयेन स्वय स्वनुभूतेरेव विषयोऽस्ति । न तत् खल्विन्द्रियगम्यम् । तस्य स्वरूपमपि न खलु निश्चितम् । एतत्त्वस्तित्वस्य पर्याय एव । वैज्ञानिकैः प्रयोगैः सत्यमन्वेष्टु नैव शक्यते । एतदन्वेषण तु स्वान्त करण एव विधेयम् । एतद्दृष्ट्या कथालेखिकाया निष्कर्ष सर्वथैव प्रशस्य ।

कथाशैली सर्वथैवाधुनिकी । भाषाया सारल्य गतिमयत्व चोल्लेखमर्हति ।

समाहृति —

एतस्मिन् कथासकलने त्रयोदश कथानिका सकलिता । आसा लेखक लेखिका शैल्यादिदृष्ट्या किमपि वैलक्षण्यमिव निदर्शयन्ति । तत् खलु न केवल व्यक्तिभिन्नताऽऽधारितमपि तु युगवैभिन्न्याधारितम् । अत एव शब्दचयने पदविन्यासे च कोऽपि विशेषो दृष्टिपथमायाति । एतत् सर्व कथारसस्य चर्वणाया न खलु बाधकम् । सर्वा एवैता कथानिका विमर्शमितयत्व प्रत्ययत्व च पुरस्कुर्वन्ति, सहृदयमनासि चाकष्टु सर्वथैव क्षमन्ते, इत्याशास्यते सम्पादकेनाऽनेन । आशास्यते यदिद सकलने राजस्थानीयलेखकाना कथासु पाठकाना विशेषामभिरुचिमाधास्यते ।

डॉ० पुष्कर शर्मा

भ्रातृस्नेहः

नवलकिशोर काक्कुर

वयं चत्वारो भ्रातरः तिस्रो भगिन्यः पितरौ च । पञ्चवर्षेभ्यः पूर्वमस्मासु ज्येष्ठो भ्राता तयाऽङ्ग पाणिगृहीत्याऽपि सयोजितौ । मम पत्न्या अङ्के तु पुत्ररत्नमप्येश्वमदेवयत् । एतावानेवास्माकं परिवार आसीत् । पितृचरणाः परमप्रख्यातिजुषो विदितवैदुष्या विद्वांसः समवर्त्तिषत । जातौ, समाजे, विद्वत्क्षेत्रे चामीषां महान् सम्मानः प्रासरीसरीत्

मम ज्येष्ठभ्रातुर्जन्मकाल एव प्रसवपीडया सतीलोकं प्रस्थितवत्या प्रसवित्र्या यथागमयं पितृपादाः पुनरागतदाराः सञ्जाताः । वयं त्रयो भ्रातरो भगिन्यश्चास्या एव गृहीतजन्मानः स्म । अस्मन्माता नातिशिक्षिता भूत्वाऽपि गेहव्यवस्थासञ्चालने विचित्रं वैदुष्यं वहति स्म । परमसौ प्रकृत्या परमकोपनाऽप्यवर्त्तत । मदीयं पूर्णं नाम पूर्णचन्द्र आसीत् किन्तु स्नेहातिरेकेण सर्वे मां "पूर्ण पूर्ण" इत्येव कीर्तयन्ति स्म ।

विद्या-वैभवमेव सर्व-श्रेयस्करं मन्वानाः श्रीपितृचरणा अविगणय्यात्मन आर्थिकीं परिस्थितिं दूरे चापास्य निखिलं लौकिकं सौख्यं रात्रिंदिवं परिश्रम्य तनयांस्तनयाश्च सममपीपठन् । ज्यायान् भ्राता मे सुरभारत्यां नदीष्णतामवाप्य प्रथमश्रेण्यामाचार्योपाधिञ्च गृहीत्वा पाश्चात्यानां वाच्यपि एम ए परीक्षामुत्तीर्यैकस्मिन् महाविद्यालये प्राध्यापकपदं प्राप्तवान् । भगिनीषु प्रथमा बी ए–प्रथमवर्षे, द्वितीया दशमवर्गे तृतीया चाष्टमश्रेण्यामपठन्ती समवर्तिष्ट । अनुजौ साम्प्रतं शैशवमध्यजन्नावेवास्ताम् । अहं तु विज्ञानविषये विशेषमतिमादधानो द्वितीयश्रेण्याम् 'एम एस सी' इत्युपाधिनाऽऽत्मानमलङ्कृत्यापि सेवावृत्तिमलभमानः सवयोभिः सहेतस्ततो भ्रमणे प्रवृत्तः ।

मम ज्यायान् भ्राता यावान् शान्तः, सरलः, मधुरः, सुशीलः विनम्रः सदाचरणपरायणश्चासीत् अहं तावानेवोग्रः, प्रतीपप्रकृतिकः, दुःशीलोऽनुशासनशून्यश्चा-

भवम् । कुटुम्बे निरन्तरं मङ्गलानि मधुरानन्दाश्च अनतिदूरदर्शने नाति
गिरौ महाप्रमाणं पितृभ्रातृभ्यां कन्याविवाह द्रव्यस्य च विनाशाय व्ययमेवोपार्जनम्
इत्यादौ सर्व मम तैरेव कृतपूर्वं प्रभुत्वमासीत् । मदीया जननी भ्रातरौ
अग्रजोऽपि च निरपेक्षो मदीयमातृमेव सम्बन्धजनानितरां भयेन चिन्तिता
अवर्तन्त । अनुदिनमेव कदाचित् नातिदूरं कस्मिंश्चिद् भ्रातृवर्यो मामुपदिशति
स्म बहिर्गमनान्निषेधति स्म च । परन्तु तेनाभ्युक्तपदं जनः पितुरिव न तदुपदेशं
कश्चन मम मनसि समस्थित । अथ पुनः प्रतिदिनं मातुरकार्यं श्रावयन्ति स्म यथा
भूत्वापि ताः पुत्रस्य शत्रवः अपि मदर्थम् पय पुत्र नाव श्रमलनिपत । विस्मृत,
एतत्तु मम मानसं तं प्रति विद्रोहभावनां प्रवर्तयत् । अद्य पुनः स्वपदं जनयित्वा
प्रकृत्या प्रतिष्ठानिगमनम् ज्येष्ठभ्राता च पितृनिवासं ननु गति स्म । मिथः प्रकृतिरिदं
मदाननुरूपत्वम् मात गृहे तस्य निवासमभूत् ।

मदीया जननी न वात्सल्य प्रकृतिः पञ्चाशत् मती प्राय प्रतिदिनमेव वसति
विपरीत व्याजीकृत्य विशपनो ज्येष्ठस्य तस्य नाम्ना रुग्णीकृत्य गृहं नह परीरगी
नितम । यद्यप्यमुष्याः स्वभावेन सर्व एव कष्टमानीनिवृ पर अद्य प्रातरितु मशान
दुःखमावोऽस्य मम जातम् । असौ मनस्वी मातरं तस्य मम दुःखावेगेन गृहव्यवस्था
मञ्चानतनं च परमनुत मन नित्य श्रीरामायणाय स्थातव्योऽभि क्षयरोगस्य
पाणिगतो भूत परन्तु परमेश्वरस्यानुपमेनानुग्रहेण तानवस्थानामपरिमितेन परि
श्रमेण मम धनव्ययेन प्रजावत्याः सूभगान सौभाग्यनामो पुण्यचरित्र पुनर्जीवनमिव
लब्ध्वा दशमासानन्तरं पुनः पूर्णं स्वास्थ्यमलभत । अस्मत्प्रियतमाग्रजानपि
स्वस्थ तस्मिन् पुनः रोगाक्रमणभीत्या तस्वास्थ्य नित्य चिन्तयति स्म सा । ज्येष्ठस्य
ज्येष्ठस्य तनयस्य स्वास्थ्यचिन्ता ममानुजमनागपि मुखेन पत्या कर्मशस्त्रभारता
रथ गान्धविवाह मनाप्यथातिवेरता शाव शोच प्रतिपन्न नितान्त चिन्ताधानया
दह्यमानस्यास्य दीर्घरोगशय्यामशिश्रियत । रोगशय्यायां स्थपूर्भिष्टं कतनानुरूपे
वासीयत । पथ्यानचिकित्सा•वस्थया हि तस्याः प्रजननेन व्याधिना बधिरत्वं
वाभूयत ।

रोगशय्यामधिशयानाया ताततामानां व्यतीताः षण्मासा न तथा स्वास्थ्य
स्याशा हि सञ्चार समदृश्यत । प्रतिदिनं क्षीणानि गात्राणि भृशमस्य जीवन वि
वैराग्यमवाप्नुयत तदनु माय तेन तस्मि कस्याः मात्रा स्वास्थ्य लिखन्दा धीत ।
कस्याश्च सूर्यस्यस्तत्र विवक्षमाणा प्रातात्पूर्वाणिगत ज्येष्ठभ्राता नु पित
चरणान कतिचन दिवस नामव प्राधणिकान विलोक्य प्रकाम स्वयमागमनाय पार्श्व
एव स्थित आसीत बहि अयात्र भ्रातृभ्यां सह मन्त्रनिष्ठार्थ तत्र स परितु

गताऽवर्त्तत। भाग्यादहमपि निखिलं दिनं परिभ्रम्य दिवसावसानेऽनाकुलाये शकुन्त इव तत्र गृहं समागच्छम्। मां वीक्ष्य किमपि वक्तुकामाः पितृपादाः सर्वथाऽसमर्था अपि पूर्णवेगेन शयनादुत्तिष्ठन्तो मध्य एवाधोमुखीभूय निपतिताः। पतनेन मस्तकं च तेषां कापरस्यामप्रहारो महता वेगेनाभिघातः। रोगवेगातिशायितामसहमाना प्रमी पुत्रस्यादर्शनं तस्य परित्यजन्त इव लोचने मनाङ् निमील्य मूर्च्छाभिभूता भूता। एतेषामनया दशयाऽनवधानमाशङ्क्य धमद्धमद्धमनी-धावमान-शोणितस्य ममापि तदानीमपच्यन्त इवाङ्गानि अनश्यन्त इव सर्वेन्द्रियाणि अच्छिद्यन्त इव च विविलानि देहबन्धनानि। स्थितिमेतामालोक्य शिशवोऽपि च रोदसी रोदयन्त उच्चैः प्रलपितुमारभन्त। एवंविधे ध्वनिकरे भ्रातरमहमुच्चैराहूय यत्न सा रश्मिबद्धेव वायुना समानीतव च तत्र झटिति समुपस्थित तदीयां दशां दृष्ट्वा च किमप्यनर्थजातं चिन्तयन्ती सोऽप्यश्रूणि विमुञ्चन्तो सुभृशं त्रस्यन्ती च सा माध्वम परवशाऽभूत्। अहं तु तेषां मनोभावमवगम्य तत्पार्श्वे कृतापराध इवाधोमुख उपाविशम। तदानीं तेषां नयनयोरश्रुविप्रुष आसन। वक्तुकामा अपि कण्ठावरोधेन स्पष्टं कथयितुमसमर्थाः शनैः शनैरव्यक्तया गिरा मामवमम्बोधयत—

"वत्स पूर्ण! साम्प्रतं मे नदिष्ठ एवान्त्यक्षणसमयः। सर्वैः भ्रातृभिरच्छेद्येन स्नेहेन वर्त्तितव्यम्, न स्वल्पोऽपि विवादो विधेयः। मा कार्षीः कदापि मातुः भ्रातुर्वाऽवहेलनम्। ज्येष्ठभ्रातरमेवेदानीं सर्वं मत्स्थानेऽवगच्छतु। अयं साधुस्वभावः सर्वेषामेव स हितैषी वर्त्तते। अतो नायमुपेक्षणीयः कदापि। सम्प्रति भगिनीनां विवाहभारोऽपि युष्माकं शिरस्येव समापतितः। नेमाः पितृविहीना भूत्वा शोचनीयाः स्युरित्यवधेयम। युष्मन्माता सर्वशस्वभावाऽपि न कदाचन केनचन तिरस्करणीया। नेयं वराकी वार्धक्ये प्रतिपन्नमन्यमानसा मां संस्मरन्ती रोदं रोदं जीवनं यापयेद्' इति। वक्तुकामानामपि तेषां नातोऽधिकं वचः प्रासरत। श्रुत्वेदं स्नेहसिक्तं पितृचरणानामन्तिममुपदेशं दुःखावेगमवरुन्धतोऽपि ज्येष्ठभ्रातुर्नयनयोः सहसा श्रावण एव समायातः, अहमपि पितृपादानां पुत्रवात्सल्येन द्रवीभूतो जातः। अविरलमश्रूणि पातयन्ती नातिदविष्ठं पतिवियोगञ्च विभावयन्ती माताऽपि मे सत्त्वोद्रेकादात्मस्वभावं धिक्कुर्वती, मसेदं नि:श्वसन्ती नितान्तमनुतपन्ती साश्रुं भर्त्तुश्चरणौ संस्पृशन्ती, स्वकीयेनोत्तरीयाञ्चलेन च तान् वीजयन्ती परिव्यथितहृदया तेषां पादाब्जयोरवापतत। हन्त हन्त!! अस्मिन्नेव क्षणे पूज्याः पितृपादाः एकवारं करुणापूर्णदृष्ट्याऽस्मानवलोक्य चिरकालाय दीर्घनिद्रायामस्वपन् हाहाकारश्च सर्वतः प्रावर्त्तत।

पितृचरणानां द्वादशाहक्रियापि सावन्न सञ्जाताऽसीदं गृहे कलहारोपण

प्रारभन। सत्य सत्यमहमेवास्य हेतुरासम्। गृहे पैतृकी सम्पत्ति लक्ष्यीकृत्य मयैवेयं कलहवार्ता समुत्थापिता। यतो मह्यं ज्येष्ठभ्रातु शासनं नारोचत, सहैव तत्सुखमवासमपि नाहमभ्यनन्दम्। जीवत्सु तातपादेषु तु मया भ्रातु सर्वमनुशासनमसह्यत, न कदापि स्पष्टरूपेण तद्विरोधाऽश्रियत। परमधुना विज्ञानविषये द्वितीयश्रेण्यामाचार्यतामुपगतस्य स्वतन्त्रप्रकृतिकस्य मे भ्रातृशासनस्वस्थानं क्व सम्भवमासीत्? अतोऽहं पितुरन्तिममप्युपदेशं कूपे निक्षिप्य स्वां प्रवृत्तिमेवान्वसरम्।

मया निरचीयत, मम वयस्यैरपि तथैवाकथ्यत यत् पितुरनन्तरमपि यद्यहं भ्रात्रा सह निवत्स्यामि तर्हि स मरणपर्यन्तं मम स्वातन्त्र्यावरणं रोत्स्यति। अतो न मया कदापि साम्प्रतं भ्रात्रा सह वासो विधेय — इति। अत एव मया दृढनिश्चयपूर्वकमपरस्मिन्नेव दिने ज्येष्ठभ्राता सूचितो यद्दिनत्रयावधानेन भवान् आनन्दपूर्वकं सर्वैः सह मन्त्रणां विधाय यथाभागं पैतृकसम्पत्तेर्विभाजनं विदधातु, अन्यथा विवशेन मया न्यायालयस्याश्रयो ग्रहीष्यते। एतच्छ्रवणसमकालमेव भ्रातृवर्यश्चकितानिर्वचन इवाश्रौषीत् तत्पादतलाद् भूमि स्खलितेव प्रतीयते, न च तन्मुखात् किमपि वचो न्यसरत। तन्मौनभावमन्यथा सम्भाव्य मया पुनः स्पष्टं कथितम्— 'क्व भवता मौनमवलम्ब्यते? न मह्यं भवदादिभिः सह साम्प्रतमेकस्मिन्नपि दिने वस्थानं रोचते, अतो गृह एव यथाभागं सम्पद्विभाजने भवतां श्रेयः, अन्यथा न्यायालयस्तु वर्त्तत एवेति' साग्रहं सञ्चिन्त्य भ्रात्रोदितम्— 'पूर्ण! पूज्यपादानां द्वादशाह-श्राद्धसमाप्तौ त्वत्कथनानुसारं कस्मिंश्चिदपि दिवसे सर्वमिदं त्वदनुकूलमेव वयं सर्वं सम्पादयिष्यामः। किञ्चिद् विचारय लोकाः किं कथयिष्यन्ति साम्प्रतम्?

मयोक्तम् नाहं लोकेभ्यो बिभेमि न च मम पार्श्वे तथा वार्त्ता श्रोतुं समयः यन्मया निगदितं तदक्षरशः सत्यमवगच्छतु भवान् नाहं द्विवारं कथनं जानामि" इति। नास्य भ्रात्रा किमप्युत्तरितम्। अधोमुख एव स बहिः प्रकोष्ठेऽगच्छत् न च पुनर्विषयस्यास्य कापि चर्चा गृहे तेन प्रसारिता।

दिनत्रयं प्रतीक्ष्य मयाऽऽत्मनिश्चयानुसारं न्यायालये विभाजनाभियोगः प्रास्तूयत, सूचितश्च गृहजनः। इदमवगम्य तु विस्फारिताक्षिपुटो गौ स्तब्धेन मनसा मामवेक्षमाण एतदेवावोचत्— "पूर्ण! नैतत्तव पुरोचितं कर्म। किं पितृचरणानामन्तिममप्युपदेशं सम्प्रत्येव व्यस्मरः? का शीघ्रताऽऽसीदिदानीमेव? अस्तु यादृशी तवेच्छा।"

अस्मत्तातपादानां प्राणैः सह मातुः प्रकृतेः क्रौर्यमपि न जाने सहसैव कुत्र विलीनम्। मर्तुकामा सा सदैवैकस्मिन् गृहकोणे दुःसह पतिशोक-ज्वालाभिर्ज्वलन्ती, अविरतमश्रूणि पातयन्ती चावतिष्ठत। न खादनं, न वा पानं तस्यै किमप्यरोचत। अभूतपूर्वैव तस्याः स्थितिरदृश्यत। का कथा पुनरस्याः गृहस्थितिनिरीक्षणस्य तु। किन्तु ज्येष्ठभ्रातुर्गुप्तेनामावपि मामवाबोधत परमहं तामपि स्पष्टमवादिषं "यज्ज्येष्ठभ्रातृमहोदया दिनत्रयपूर्वमेव मया सूचिता परन्तु ते तु मां बालिशमेवावगच्छन्ति, न किमपि मम कथने ध्यानं ददति। विवशेनैव मया न्यायालयः प्रार्थितः"— इति। श्रुत्वैतद् भृशं दूयमाना माता मन्मुखदर्शनेऽपि पापमाकलयन्तीव चेलाञ्चलेन स्वमुखमाच्छाद्यास्थात्। भ्रातृवर्योऽपि ततो न किमप्यचकथत्।

द्वितीयस्मिन् दिने मदीयो मातुलः समागत्य मामवादीत्— "अपि त्वं गृहविभाजनं वाञ्छसि? मयाऽऽकर्णितं यत्त्वं न्यायालयेऽभियोगं कृतवानसि" इति। यथाऽहं पूर्वं भ्रातरं मातरञ्चोदतरं स्तथैव मातुलमपि स्पष्टमबोचं यन्न मया साम्प्रतं भ्रात्रा सह स्थातुं शक्यते।

मातुलो भूयोऽपि प्रेम्णा मां पर्यपृच्छत्— पूर्ण! तव ज्येष्ठो भ्राता तु देवतुल्यो विद्यते, सुशीलः शान्तप्रकृतिश्चैव दृश्यते। कथं पुनस्त्वं तं परित्यक्तुमिच्छसि?

मयोक्तम्, इयमस्ति मे मानसी वाञ्छा, मदीयमनोवाञ्छायाञ्चापरेषां हस्तक्षेपस्य कोऽस्त्यधिकारः?

आत्मीयत्वं प्रदर्शयता विपश्चिता मातुलेन पुनः कथितम्— "वत्स पूर्ण! अवधेहि, अवधेहि। त्वदीयाः पितृपादाः अस्मदावृत्ताः समाजे क्रियन्तो लब्धसम्मानाः अवर्तन्त। किं तवानेन कृत्येन तेषां कीर्तिचन्द्रिका मलिना न भविष्यति? किं सुमनसा पुराजुषा तेषामात्मा ग्लानिं नोत्स्यति? सर्वत्र तव महती निन्दा भविष्यति, सर्वे च त्वामपवदिष्यन्ते। अतः साम्प्रतममास्मिन् तथेदं कर्म।"

"नास्ति ममास्य चिन्ता" इति कथयन्नहं ततश्चलितः। मातुलोऽपि पराजित इव निःश्वसन् स्वगृहानगच्छत्।

एवं न जाने मम पार्श्वे कियन्तः सम्बन्धिनः समायाताः प्रतिगताश्च, परमहं न स्वपथो विचलितोऽभवं पदमपि। अहं तु तस्मिन्नेव दिने मयि पत्नीमुपरि प्रासादपृष्ठे भिन्नप्रकोष्ठे स्वनन्त्रमेव भोजनं सम्पादयितुमादिशम्। सा तु बहो

कालादेतदेव प्रतीक्षमाणाऽऽसीत् । मया तत्कालमेव तत्सर्वमभिहितम् । रात्रौ यदा भ्रात्रेदं सर्वमाकर्णितं तदा स तत्क्षणमेवोपरि समागत्य तामेव पुराणीमात्मन उपदेश साहस्त्री श्रावयितुमुपाविशत् ।

न तत्र मह्यं भ्रातुरागमनमरोचत । क्रुध्यन्नहं तमवोचम्— "नाह-मिदानीं भवता सह कस्याञ्चिदप्यवस्थायां स्थातुं शक्नोमि । यदा च महावस्थानमेव न तदा सहभोजनं तु बहुदूरम् । अतो न भवता कदापि पुनर्मदुपदेशदात्रा भवितव्यम् ।"

अपमानभारमिमं शिरसि वहन् भ्राता येन पथाऽऽगतस्तेनैव प्रतियातः । द्वादशाहंनिशाल्लं न काचन विशेषघटना घटिता । क्वचित् क्वचिल्लोकः प्रवदितुं समवेता लोका अवश्यमेतस्य विषयस्यापि चर्चां वितन्वन्ति स्म । परं मम विचारेष्वो-ऽपदपि परिवर्तनं नाभवत् । पश्चात् भ्रातुरनेन नाहं पुनः कदापि किमपि अवोचम् । भ्रातृवर्योऽपि भूयो न मां किमप्यवादीत् ।

पितृपादानां द्वादशाहश्राद्धभोजनादि-क्रियाकर्माणि सर्वाणि समाप्तानि । सान्त्वयितुमागन्तुकानां तादृशः समवायोऽपि नावर्तत । वराकी जननी जरातुरा प्रतिपलमश्रुबिन्दून् पातयन्ती सर्वदा समझदृनेनानुरोधेनैकमर्धमोदनकवलं भुञ्जाना स्वजीवनञ्च धिक्कुर्वती कथमपि कालयापनं विदधत्यत्रावतिष्ठत । पितृहीना शिशवोऽपि मातुर्दशां लोकं लोकं रुदन्त इवादृश्यन्त । एवं सर्वं एव गृहप्राणिन उपरते पितरि महता कष्टेनैव जीवन्ति स्म ।

अस्तु । न मया न्यायालयादभियोगपत्राणि प्रत्यानीतानि । शीघ्रमेव च विभाजनं मदनुकूलं जातमेव । न तत्र ज्येष्ठभ्रात्रा स्वल्पोऽपि मद्विरोधोऽभिहितः । यदा वयं न्यायालयाद् बहिरागतास्तदा भ्रातृवर्यो मे समीपं समागत्य मत्स्कन्धे च स्वहस्तं निधाय स्निग्धया गिरा मामवोचत् 'पूर्ण ! त्वदिच्छानुसारं विभाजनं तु जातमेव परमस्य सम्बन्धावयोः स्नेहे न कश्चन विच्छेदः समागच्छेदिति सर्वदा सर्वथा चावधेयम्' इति नाहं भ्रातरं किमप्युत्तरं गेहञ्च समागमम् ।

विभाजनानुसारं नीचैस्तनो विशालो भवनभागो ममाधीनतामायात्, उपरित-नश्च ज्येष्ठभ्रातुः पार्श्वे समायात, मध्यवर्तिनि गृहभागे च माता स्वैः पुत्रतुल्यै र्दिभिः सह निवासं स्वीकरोत् । न्यायालयात् प्रत्यावर्त्य सम्यमेऽहं भ्रातृदेवेन भोजनं न गृहीतं, न वा केनचन गृहजनेन वार्तैव विहिता । प्रजावत्या भृशं प्रार्थ्य-मानः स केवलं स्वल्पं जलं निपीयास्वपीत् ।

सायं यदाऽसौ स्वरुचितया भोजनं कर्तुमुपाविशत्तदा स एकाकी भोक्तु-मशक्नुवन् पत्नीमवोचत्—"नीचैर्गच्छ, शिशून् पुत्रञ्च समानय, तेऽत्रैव मया सह भोक्ष्यन्ति, तदनन्तरं जननी त्वया सह खादिष्यति। एतान् विना मम गलप्रदेशा-देकोऽपि कवलो नीचैर्न विनरति।" तयोक्तम्, अद्यैव तु तेन न्यायालये स्वेच्छानुसारं गृहादिविभागेन कारितम्, अद्यैव च भवांस्तस्मिन्नीदृशं स्नेहं प्रकटयति। असम्भव खलु दर्शयसि स्नेहं सर्वान्। भ्रात्रोक्तं भद्रे! इयन्तमनेहसं मया महोपितृत्वाऽपि त्वं मत्प्रकृतिं नाज्ञासीः। मातृदत्तानुज्ञो वा यत्नेन विहितं न तस्यायमर्थो यत् सोऽस्मत्स्नेहभावादपि वञ्चितो भवेत्। तद् गच्छ गच्छ उच्चैः शब्दापय, कथय च त्वां त्वद्भ्राता समाह्वयति भोजनाय। भूयस्तया निवेदितं नाहं तु तदाह्वानं स्वल्पमपि लाभं सम्भावयामि वदामि च न स मम वचनैरेति। भ्रात्रा मानितोऽपि पुनस्तया शब्दापितो मां मामुच्चैराह्वयत।

तस्मिन् दिनेऽस्माकं पाकशालायां ज्येष्ठभ्रातरं लज्जयितुमस्वास्थयितुञ्च मिष्टान्नव्यञ्जनानि मत्पत्न्या यानि वाढमाहृतानि माताऽपि तत्रैव स्थिता विद्यते। अहञ्च भ्रातृपत्न्या आह्वानरवं श्रुत्वा झटिति स्थाल्यां व्यञ्जनानि गृहीत्वा भोक्तुं संलग्नो मम जननीं प्रोक्तवान्— कथय स इदानीं भोजनं कुर्वन्नस्तीति।

मया विचारितं यद्भ्रातरसौ मां वञ्चयितुमाह्वयति अथवा विभाजनानन्तर-मपि स मां स्वाधिकार एव रक्षितुं चेष्टते। अन्यथा कोऽयमवसरो मदाकारणस्य? न यास्यामि न यास्यामि कदापि अहमधुना तेन सार्धं नैव खादिष्यामि।

भ्राता यदा जननीवचनं कर्णे कृतवांस्तदा तत्क्षणमेव स भोजनासना-दुत्थाय प्रजावतीमब्रवीत्— नाहमिदानीमिह भोजनं करिष्ये। त्वमत्र तिष्ठ, अयमहमागच्छाम्येव झटिति। श्रुत्वेदं सा विस्मयमादधाना किमपि नोक्तवती, भ्राता च सत्वरमस्माकं सदनमुपसृत्य मत्पत्नीं सम्बोध्य सस्नेहं प्रोक्तवान्— "स्नुषे! अहमधुनाऽत्रैव भोक्ष्यामि।"

अहं तु ज्येष्ठभ्रातुः सहजस्नेहपूर्णं पीयूषाञ्चितं वात्सल्यसंवलितञ्चेदं वचो निशम्य भूमिमवेक्षमाणो वाचंयमो मिष्टान्न-भक्षणे दत्तचित्तमिवात्मानं प्रदर्शयन्न-तिष्ठम्। शरीरिणी मनोव्यथेव जनन्यपि विस्मयमावहन्ती न किमप्युक्तवती।

मदीया जाया यदैकस्यामन्यस्यां स्थाल्यां मिष्टान्नव्यञ्जनानि सज्जयितुं समारब्धा तदा भ्रात्रोक्तम्— "तिष्ठ तिष्ठ, पूर्णं पूर्णं एव भोजनं करोतु, एतद-नन्तरमहं भोक्ष्ये।"

अहं मुनिरिव मौनमवलम्बमाना भोजनं कुर्वन्नासम्।

यदा च भुक्त्वोदतिष्ठत्तदा भ्राता मदर्धभुक्तां स्थालीं गृहीत्वा पत्नीमादिशत्— "वत्से स्नुषे! एतस्यामेव स्थाल्यां मह्यमपि भोजनं देहि। बाल्ये नित्यमावाभ्यामेवं भुक्तमासीत्। आशैशवात् सहवासिनावावामीश्वरोऽपि दूरं कर्तुं न शक्तः, का कथा पुनर्विभाजनस्य"?

शब्दानेतान्निशम्य तु मां शतशो वृश्चिका इव युगपददंशन्नूनम्। अनुतापतपने दह्यमानस्त्रपयाहं लज्जयाऽवाङ्मुखाऽभवम्। अवशोचमहं "हन्त हन्त!! कथमहं केन दुर्विपाकेन कस्य वा दुर्हृदः मन्त्रणेन देवनिर्विशेषस्य ममवन्दनीयस्य ज्यायसो भ्रातुरीदृग्वान् मृदुलं हृदयं व्यथितवत्यस्मि। अहं दुष्टाऽस्मि महान् नीचाऽस्मि, परमपापीयसी चास्मि। ममेदृशं दुर्व्यवहारं दर्शं दर्शं स्वर्गलोके विराजमानाः पितृचरणा अपि हन्त तप्स्यन्ते।

तदानीं मम नेत्राभ्यामश्रुधाराः प्रावहन्। अहं किंकर्तव्यविमूढाऽभवम्। किमपि तु कथयितुं मे वाक् न प्रावर्तत। मन्ये भ्रातः अहो मम भ्रातः! अहो मे भ्रातः!!" इत्यस्फुटस्वरेण तच्चरणयोः पतितम्। अन्तर्निगूढवेदनाव्यथा माताऽपि च सर्वमिदं दृश्यं दृष्ट्वा सन्तोषमन्वभूत्।

तत्कालमेव प्रीतियोगस्य सम्पादयित्री भ्रातृचरणा पादयोः पतितां मां प्रसारितबाहुभ्यां स्वबाहुपाशे धारयन्। तयोरपि नयने नेत्रधारानन्दाश्रूणि विलसन्तमासन्। अपूर्व आसीत् स कोऽपि स्वर्गीयः समयो द्वयोर्भ्रातृस्नेहबन्धनस्य।

तदाप्रभृति निश्चप्रचमावयोः स्नेहनिबन्धनं पूर्वापेक्षयापि सुदृढमभूत् यद्धि न कदापि शैथिल्यमवाप्नोत्।

1/ राजस्थानस्याधुनिका मरुभूमि कथ्यते।

सापराधः

गणेशराम शर्मा

(१)

अस्ति विपिनविहारी नाम वणिग्वैश्यसमाजस्य कोऽप्यवस्थापकः। महाधनवान्महाजनत्वाच्च तन्नगरमध्ये सुप्रतिष्ठितः मन्यते। तस्य परिवारो विस्तृतो महान् वटवृक्ष इव शाखाप्रशाखासनाथो वर्तते। तत्पितामहः पितामही, मातामहो, मातामही, मातापितरौ, मातुलो, मातुलानी मातुल्या पितृव्यो भ्रातरो, भगिन्यः सर्वेऽपि च सुशिक्षिता दीक्षिता विद्वांसः। प्रायस्सर्वेऽपि चास्य कुटुम्बस्य सदस्याः पुमांसो ललनाश्च राजकीयसेवासु नियुक्ताः सन्ति। अधिकांशास्तु महापदान्यधितिष्ठन्तः प्रोच्चैः स्तरीया वरिष्ठाश्चाधिकारिणो वर्तन्ते। परिवार-स्यास्य वध्वः कन्यकाश्चान्यापि सर्वाः गृहीतशिक्षा व्यवहारकुशला गम्भीरस्वभावा स्मितपूर्वं मधुरकोमलभाषणाश्च विद्यन्ते। संयुक्तोऽसौ परिवारो जनप्रियोऽस्ति। राज्यकार्येषु सामाजिकेषु प्रसङ्गेषु धार्मिकोत्सवेषु, सभा समितिसम्मेलनेषु, दिन-चर्यासु च तासु तासु सदा सर्वदा तथामैत्र्या सर्वानुकूल व्यवहरणात् सदाचारादि गुणैः सर्वजनसहायकत्वाच्च सर्वेऽपि नागरिका जनाः, सामाजिकाः सभ्याः शासना-धिकारिणश्चैतैः सन्तुष्टाः सुप्रसन्नाः हितैषिणश्च विद्यन्ते। अभिजनवता महति कुले समुत्पन्नास्त एते हिन्दुत्वाभिमानिनो वणिजः स्वस्वैकतन्त्रविद्याः सद्गुण विशिष्टाः लौकिकेषु कर्मकलापेषु परमचातुर्येण व्यवहरन्तो मोमुद्यमानाः सन्ति। कुटुम्बेऽत्र विचारस्वातन्त्र्यं व्यवहारवर्तनस्वाधीनता, व्यक्तिगता सर्वतन्त्रस्वतन्त्रता च विलोक्य तेषां जीवनयात्राप्रणाली च विशिष्टगुणा वीक्ष्य लोकास्तमेतं कुटुम्बमेकमादर्शरूप-मिव मन्यन्ते, समाद्रियन्ते च। अत्र परिवारे कश्चनार्यसमाजस्य सदस्यतां परिपालयति, कश्चिदन्यः सनातनवर्णाश्रमधर्मानुयायी, परः शाक्तीशाक्तीशिष्योऽन्यश्चान्यो वैष्णवीं भक्तिमर्यादामनुसरति, कश्चन योगिजनभक्तोऽन्यः परो विज्ञानवादी, कश्चिद्गोभक्तोऽन्यो व्यापारव्यवसायनिपुणः, परो नास्तिकशिरोमणिः सर्वथा भौतिकवादी, कश्चनामिष-भोजी, कश्चिच्छाकाहारः, कश्चन क्रीडारसिकः शिक्षकश्च वर्तते। सर्वेऽपि चैत

वणिक्परिवारस्य कन्या स्वाभाविकाविश्वासानुरूपं जीवनपद्धतिमनुसर्तुं यथेच्छं व्यवहर्तुं न स्वतन्त्रा सन्ति । सत्यप्येवं तदिमे सुसङ्गठिता ऐक्यगुणसम्बद्धा दृश्यन्ते शिष्टजुष्ट-मार्गस्यानुसरणेन च व्यवहरन्ति, येन तेषां कदापि कस्मिन्नपि च विषये मतभेदो वा विप्रतिपत्तिर्वा भवति । तथामेवंविधं विचारस्वातन्त्र्यं पुरुषाणां स्वाधीनतामेव, मतभेदराहित्यं, पारस्परिकं स्नेहसद्भावं च नागरिकाः सर्वे निःसंशयमसुलभं पुण्यशतैरपि दुर्लभ्यं किमपि स्पृहणीयं सौभाग्यगुणमिव मन्यन्ते ।

(२)

अथात्र देशे भारते स्वराज्यप्राप्त्यनन्तरं विपिनविहारिणः पितामहो वैराग्यभावमापन्नो हरिद्वारं गत्वा तत्रैव गङ्गातीरे पर्णकुटीं निर्माय शेषं जीवनं भगवत्स्मरणे यापयितुं कृतनिश्चयस्तत्रैवाध्युवास । तस्य मातापितरौ तीर्थसेवनेच्छया काशीं जग्मतुः । परिवारत्यागात् पूर्वमेव हि तौ स्वोपार्जितं धनं भूमिगृहापणादि सम्पदं सर्वमपि भौतिकं परिग्रहं चलमचलं च स्वापत्येभ्यो यथायोग्यं समभागं विभज्य स्वपुत्रेभ्यः सर्वेभ्यः प्रापयताम् । स्वोपयोगक्षमं द्रव्यं तौ स्वाभ्यां सार्धमनयताम् । ततः प्रभृत्येव ते वैश्यकुलबान्धवाः पृथग्भूता यथेच्छं स्वगृहाश्रमान् स्थिरीकृत्य निवसन्ति । प्राचीनं राज्यशासनं विलयं गतं, नवीनं प्रजातन्त्रात्मकं च प्रवर्तितं विपिनविहारिणोऽपि राज्यसेवातो निवृत्तिसमयो दिने दिने निकटमुपगच्छन्नभूत्, नवे शासने दिनानुदिनं जायमानानि परिवर्तनानि स्वगतनीत्या वृद्धिमापन्नो जीवनस्योत्तरार्द्धे वृद्धिंगच्छन्ती महार्घतां गार्हस्थ्यं चापचीयमानं प्रभूतं धनव्ययमवलोक्य विपिनविहारी स्वजीवनस्योत्तरकालविषये, मुग्धतोपशमितजनसुलभस्वभावात् किञ्चिच्चिन्ताकुल इव भवितुमारेभे । एकदा रात्रावेकान्ते शयानः स स्वमनस्येव चिन्तयामास—

दायभागे मया स्वभागो न्यूनं धनमेवोपलब्धम् । तस्मादपि बहु भाग-धनमपि क्षयं जगाम । वंशवृद्धिश्च न जायमानास्ति । सर्वेषां दुहिता विश्वविद्यालये स्नातकोत्तरकक्ष्यामधीयमानास्ते द्वितीयावर्षेऽस्मिन् स्नातकपरीक्षां दातुमिच्छति । अन्यास्तिस्रः कन्याः पञ्चगुप्ताश्रमे प्रारम्भिकमाध्यमिकपाठशालास्वधीयाना वर्तन्ते । मुद्रास्फीतिर्महार्घता पदार्थजातानामावश्यकानामनिवार्याणां दुर्लभतापि दिने-दिने विवर्धमाना विद्यते । शासनेऽस्थिरतानुतापस्यैव भ्रष्टाचारराजकता विजृम्भमाणेव दृश्यते । राजतन्त्रेऽस्मिन्नवीने शिक्षाभिक्षैव दुर्लभा सम्पन्ना । न्यायो द्रव्येण पक्षपातेन वा लभ्यते । चिकित्सौषधालयेष्वपि धनैकशरणानि सन्ति । सुरक्षा नाममात्रैव प्रजाजनानाम् । प्रतिदिनं शासननियमसंहिता परिवर्तन्ते विविधैः

च । राज्यसेवकानां स्थितिरपि क्षणस्थायिन्यनिश्चिताऽविश्वसनीयैवास्ति पुनर्ममैते द्वे पुत्र्यावपि सद्यो विवाहयोग्ये स्त । अत्र कर्मण्यपि च बहुधनमपेक्ष्यते नाम नूनम् । अद्यत्वे कुलीना सुशिक्षिता दीक्षिता सदाचारिणो वराः प्रभूतयौतुकदानेन विना नोपलभ्यन्ते । अस्यां हि विषमायां लोकस्थितौ मम गृहाश्रमस्थितिः प्रभूतधन विना कथमिव कुशलिनी निरापद् स्यादागामिकाले ? अहह ! महती हि विडम्बनेयम् !! विशेषतो मादृशां मध्यमश्रेणिकानां स्वल्पवित्तानां राज्यसेवामात्राश्रयिणाम् !!! पत्नी च मम मृणालिनी माध्वी सुशिक्षिता सौम्यस्वभावापि च पूर्वाभ्यासवशात्तैस्तैः संस्कारैः पूर्ववत् प्रणोदिता मुक्तहस्तं धनमपव्ययति । स्थानान्तरमपि चेतो मम सम्भ्रामयति, यतो सहकारिणो मेऽधिकारिणो मुखाच्छलेनैव कर्णानपि कथयन्ति माम् । अथ पुनर्गृहमधीयेषु नित्यमेव हि कर्मकलापेषु नन्ववश्यकर्तव्येषु व्ययाधिक्यं महार्घतावशाद्द्विगुणं दशगुणादपि चाधिकं वर्धमानमास्ते । वस्तुतस्तदेतत् सर्वं पश्यतो मे गार्हस्थ्यपरिस्थितिस्तावद् बहिस्तु शोभनेव परिदृश्यमानापि चान्तः परिक्षीयमाणा दुर्बलेव मे प्रतिभाति । अहो ! कथमिवाहं तमेतं दुर्वहं कर्तव्यभार-मनिवार्यमुपढौकयितुं समर्थः स्याम् ? कुलप्रतिष्ठा कुटुम्बप्रतिपत्तिं, सुविस्तृताञ्जागतिकान् व्यवहारान् वत कथमहं परिपालयेयम् ? तन्मया किं कर्तव्यमिदानीम् ? केनोपायेन, केन विधिना, किं कृत्वा चाधुना जीवितव्यं भो । हा, हन्त ! भविष्यं ममान्धकाराच्छन्नमिवैव दृश्यते !!!'

एवमत्यर्थं यादन्दह्यमानहृदयस्य विपिनविहारिणो जीवनसमयो व्यतीयमानोऽस्ति । अथैकदा रात्रौ मृणालिनी विपिनविहारिणं सुखमुपविष्टं पप्रच्छ— 'कथमिव भवान् सचिन्तः सशोक इवालक्ष्यते ? दिने दिने भवत्स्वास्थ्यमपहीयमानमिव परिपश्यामि, प्राणनाथ ! भवन्मुखेऽभूदिव सा नैसर्गिकी सौम्यता, प्रसन्नता स्वभाव-माधुरी, स उत्साहः, सा शान्तिः कान्तिः श्रीश्चेदानीं ननु क्वापजगाम ? विवर्णं, विच्छायं, निस्तेजो, म्लानमिव मुखमालोक्य भवतस्तदेतन्मया पृष्टम् । यदि नातिगूढं रहस्यं भवेत्तदा निर्भयमुच्यताम् ।'

सोऽब्रूत— 'प्रिये ! मृणालिनि !! माध्वि !!! नास्त्येव किमप्यन्याहितं नाहमम् । परन्तु'

मृणालिनी— 'परन्तु किम् ? प्राणवल्लभ ! निर्विशङ्कमुच्यताम्, यद्भवन्मनसि विततं चिन्ताकारणम् ।'

यद्यपि गम्भीरहृदयो विपिनविहारी तद्दिने तु मृणालिन्या मुहुर्मुहुः पृष्टोऽपि न स्वाशङ्कां गार्हस्थ्यसम्बन्धिनीं नोक्तवान्, परमस्ततोऽगच्छत्सु दिनेष्वेकदा रहसि

स्वकनीयान् तस्मै समर्पयामास । यदि च नतरकिञ्चारणं स्यात् तर्हि विचार्य वाच्यम् तु मिवानु भवन्ती जीवमवनस्थी । एवं स्वयमानसोऽन्तर्गोढ याऽस्यायो समयोऽतियामित्र न्नास्ति ।

(३)

अथ गच्छत्सु दिवसेषु एकदा स्वकार्यान्निवृत्तिसम्पन्न गृहमागतो विपिनविहारी स्वकान्तया मृणालिन्या पुरतः एकान्ते निशीथिनीसमये एकान्ते मनोभावं स्पष्ट मुद्राणां पार्श्वे निधायाब्रवीत्— प्रिये मृणालिनि ! यत् निवेदयामि । निभृतं परिशृणु । गुप्तमन्त्रस्तावत् धनमतः प्राणपणेनापि सावधानं त्वया गोपनीयम् । कुतो वा किमर्थं च धनमेतदत्र मेलितम् इति त्वया न पृष्टव्योऽहम् । प्राप्तव्यं सवमपि च सम्यगनुष्ठेयम् स्वयमेव हि ज्ञास्यसि त्वम्, परन्तु क्वापि स्वामित्वं नैवागारमपि कदापि वाच्यम् । नो चेदनर्थो महान् भावी । अतः मनसा वचसा कर्मणा च तदिदं मे वचनं त्वया परिपालनीयम् । अपि च बुध्यसे कथनेन मम परमार्थम् ? मानुषस्य मन्त्रो वै गोपनीयो हि यत्नतः ।'

मृणालिनी— प्राणनाथ ! सर्वात्मना परिपालयिष्य एव भवद्वचनं । परन्तु मामबलामेकाकिनीमत्र किमर्थं भवान् गुप्तेऽस्मिन् दुष्करे महदुत्तरदायित्वपूर्णे कर्मणि हृदयदुर्बलस्वभावामनिच्छन्तीमपि नियुङ्क्ते ? भवानेव स्वाधीनं किमर्थं न रक्षति स्वतन्त्रतया सावधाने ? कदाचित् मम भीरुस्वभावा मनोवेगाद्वा स्त्रीजनसुलभं धनमन्त्रं गोपायितुं न प्रभवेयम् तदा

विपिनविहारी— तदा मरणं शान्तिं प्रपद्यताम् । त्यज त्वं क्षुद्रहृदयदौर्बल्यम् ! मा भैषीः !! रमस्व । अहो । नैव कापुरुषोऽहं सदा नरमहतां सुजनानां सुकृतपथानि निजानि अनुगच्छामि । मानवानां स्वानुभवे गार्हस्थ्ये जागतिकेषु निगूढेष्वपि सम्बद्धरहस्येषु नरसंकेतविज्ञानिनां माननीयानां निपुणस्वरूपाणाम् । कथं स्त्रीणां मनो न नाम्नि निर्मलाचित्तानां गाम्भीर्याणि कर्माणि कृतवतीनां मनीषिणीनां शान्तिकारिणीनां सुदर्शनानां प्रबलसाहसधर्मणां पतिव्रतानां दुरवस्थारहस्यमयप्रवृत्तीनां निराशामेव तदानीन्तनयुगानां चरित्राणि तद्वनो वर्णनीयम् । किं सहनशीलाः गुप्तचराः रहस्याः स्वाद्यासयम्भवीदर्शनानि । एवं सति का मानसम्य स्वल्पतमस्य धनरागस्यापि रहस्यरक्षणस्य ? शुभे ! कल्याणि !! प्रिये !!! ममाप्यसि हि प्राणशक्तिमाता मनो विश्वासम् !!! स्वच्छ समयान्तरमितो निविड्यसर्गो यथा नभो मण्डलमिव सम्पूर्णं कृतहृदयतां गत स्रोतस्वदाविवभारगूढ सुस्थीरं निमग्नं च भावि सुधे ! तदागमवत्प्रस्व !

धैर्यं धत्स्व !! वज्रनिष्ठुरं विधेहि स्वहृदयम् ! कार्ष्णायसनिर्मितमिव स्वकीयं भौतिकविग्रहं परिभावयस्व ! अयि ! देवि !! मृणालिके !!! त्वं तु पुनरधुना-तस्या दुःसाहसवत्या दस्युदलशिरोमणेः पुत्तलिकायाश्चेष्टितमपि सुदृढं रहस्यरोमाञ्च गभीरम् साहसपूर्णं चरितं सम्वादपत्रेषु पठित्वा सर्वमाद्यन्तपर्यन्तम् जानासि ! तदिदानीमात्मनो दुर्बलभावं सर्वथापहाय त्वया चण्डीरूपमाचरणीयम् ! आमय हि ते योग्यतायाः, परिपक्वानुभवप्रौढेः, सर्वशिक्षायाः, विवेकस्य, चातुर्यस्य, कर्म-कौशलस्य धैर्यगुणस्य च परीक्षासमयोऽवितर्कितसम्भवोऽप्यापतितः ! सुदृढीया-नस्ति मेऽविचलो हि विश्वासो यत्त्वमत्र परीक्षायामवश्यमेव प्रथमश्रेण्यां सर्वश्रेष्ठत्वे-नोत्तीर्णा भविष्यसीति । सावधाना भव ! लभस्वात्मचेतनाम् ! किमिव हि दुष्करमत्र संसारे मानवानाम् सुदृढसङ्कल्पानामद्यतनयुगीनानामिदानीन्तनेऽस्मिन् सुशासने यन्त्रिकेन्धनवादित्वराजके सर्वथा स्वतन्त्रे युगे ? विशेषतस्तु त्वादृशीनां सचेतसां नारीणाम् ! अवधत्स्व ! सत्यं मे विश्वासं सर्वात्मना कुरुष्व !'

एवं वचनशतैर्हितोपदेशैस्तैस्तैश्च प्रभावोत्पादकैः सुचिरं प्रबोध्य स्वपत्नीं, विपिनविहारी निशीथोत्तरं स्वकक्षं गत्वा सुष्वाप, परन्तु रात्रिभरं निद्रां नो लेभे ।

(४)

अथ सप्ताहाभ्यन्तरे नगरेऽस्मिन् प्रवादोऽयं प्रससार यद्धि राजकीये बैङ्कसंस्थाने केनचिल्लक्षरूप्यकमुद्राप्रायं धनं चौर्येणापहृतमिति । 'मुण्डे मुण्डे मति-र्भिन्ना तुण्डे तुण्डे सरस्वतीति' नगरे नवा वाणी श्रूयमाणास्ते यद्यपि दुर्घटनाया अस्या विषये प्रत्यक्षं न कोऽपि किमपि श्रुते, तथापि गृहकुड्यान्तर्गतं तत्र सर्वत्र प्रच्छन्नभावेन महान् हि कलकलो वर्ण्यमानो वर्तते । लोका विषयमिममधिकृत्य नानावाद-विवादान्, तर्कवितर्कान् मोहापोहान् युक्तीरनुमानानि च कुर्वाणा दरीदृश्यन्ते । मण्डलाधीश आरक्षिविभागाध्यक्षादयोऽन्येऽपि च न्यायालयाधीशप्रभृतयोऽनेके वरिष्ठाधिकारिणोऽपि सर्वं तद्धनापहारकं चोरमभियुक्तमन्वेष्टुं सयत्नाः सन्तीति जनरवो महान् सर्वत्र श्रूयते । एतदपि च श्रुतं यदस्य बैङ्कसंस्थानस्य तस्य सर्वेऽपि कर्मचारिणोऽत्र चौर्यकर्मसन्देहे निगृहीता वर्तन्त इति । केचिन्नागरिकाः कथयन्ति, 'बैङ्ककर्मचारिणामेवान्यतमस्य कस्यचिदेतस्य हस्तकौशलचिकीर्षितमेतद्भवितुमर्हति ।' अन्येषां केषाञ्चिदपि वार्ताऽनुश्रूयते, 'युगेऽस्मिन् धनलोलुपानां मानसी दुष्प्रवृत्तिमति-निगूढा को नु खलु वेत्तुं प्रभवति ? परन्तु वराकस्य कुलीनस्य विपिनविहारिणः शिरसि महतीयं विपत्तिर्निष्ठुरोल्कापातोपमाऽकस्मादापतिता ।' अपरे कथयन्ति,— 'मैवं ब्रूत ! विपिन' प्राणात्ययेऽपि नैव कदापि तथाकर्तुमपचेष्टेत ! यत सहि

सदाचारवतां सुशिक्षितानां शीलविनयदयादाक्षिण्यवतां प्रतिष्ठितानां श्रेष्ठानाम् नागरिकाणां श्रेष्ठिवर्याणां सुपुत्रौ वर्तेते ।' केचिदेवं धारयन्ति 'वस्तुतस्तु इमे नगरवासिनो बैङ्कसंस्थानस्य कर्मचारिण एवापराधिनो भवेयुस्तेषामेव सविधे कोषधनं सदैव सन्तिष्ठते ।' इत्थं नानाविधा धारणा नगरवासिनामधिकारिणां सर्वसाधारणानां च हृदि बद्धमूलाः सन्ति । सत्यमेतत् केनापहृतं धनमेतदिति याथातथ्येन न कोऽपीदमिति वक्तुं पारयति स्म । यद्यपि तदानीम् परन्त्वन्यैर्बैङ्ककर्मचारिभिः साकमेव विपिनविहारी चाप्यभियुक्तत्वेन सन्देहे निगडित इति कोलाहलो व्याततान ।

अथ प्रारम्भिकान्वेषणानुसन्धानादनन्तरं सर्वेऽप्येतेऽभियुक्ता विधिविधाननियमानुसारमावश्यकत्वेनाभियोगस्थापनपुरस्सरं न्यायालयस्य निर्णयार्थं प्राहीयन्त । आरक्षिविभागाध्यक्षेण न्यायानुसन्धानाय रहस्योद्घाटनाय चात्राभियोगे ते ते सर्वेऽपि चाभ्युपाया प्रयत्नाश्च विहितास्तैर्वास्तविकश्चौरो निर्णीयत । अनेकेषां साक्षिणां, कर्मचारिणामधिकारिणां, सर्वकारपक्षस्य वाक्कीलानामभियुक्तानां च वक्तव्यानि न्यायाधीशेन यथायथं लिपिबद्धान्यक्रियन्त । अभियुक्तानां, तत्सम्बन्धिनां सुहृन्मित्राणां, कौटुम्बिकानां बन्धुबान्धवपरिचितानां गृहेष्वपि चान्वेषणानुसन्धानकर्म व्यधीयत । निभृतं गुप्तचरा नियोजिताः । नात्र प्रसङ्गे कोऽपि चाभ्युपायः प्रयत्नो वाऽत्राशिष्यत । परन्तु स्पष्टतया तदसिद्धं रहस्योद्घाटनं बभूव । राज्यशासनं विपक्षैश्च बहु पुरुषार्थो विहितः । अधिकारिणो भर्त्सिता धर्षितास्तिरस्कृताश्च । केषाञ्चित् पदोन्नतयोऽवरुद्धाः, केषाञ्चन पदावनतयः कृताः, केचन निलम्बिताः, केचन स्थानान्तरिताश्च पुरस्कारोऽपि भूयो भूयो घोषितः परन्तु चौरकर्मणोऽस्य रहस्यं चिरायानुद्घाटितमेव यथापूर्वं तस्थौ । अन्ते पञ्चवर्षानन्तरं स्वोत्तरदायित्वपरिपालने प्रमादानवधानापराधे विपिनविहारी तथा द्वावन्यौ तत्सहकर्मिणौ कनिष्ठाधिकारिणौ न्यायाधीशेन दोषभाजावपराधिनौ चावाप्य वर्षत्रयभोग्येन कठिनकारावाससदण्डेन दण्डिताः । तदनन्तरं त्रयोऽप्यपराधिनो बन्दित्वेन स्वदण्डं भुञ्जाना वर्तन्तेऽधुना । मासद्वयानन्तरं वरिष्ठन्यायालये पुनः प्रार्थनां कृत्वा स्वाभियोगस्य पुनर्निरीक्षणं कारयित्वा तौ द्वावपि अधिकारिणौ निर्दोषौ घोषयित्वा निर्मुक्तौ मुहू राज्यसेवान्तर्गृहीतौ स्वनियोगस्य पूर्वपदयोर्नियुक्तिमाप्तवन्तौ । विपिनविहारी दण्डं भुङ्क्ते ।

(५)

तदिदं राजकीयं कारागारमासीत् । सर्वेऽपि बन्दिनो नित्यं नियमानुसारं प्रातःकालीनं शौचस्नानदन्तधावनादिकं दिनचर्याक्रमं निर्वर्त्य स्वकार्यमनुदिन-

केषु मनागा दृग्गोचरयन्ते । केचन बन्दिनः कारागारस्य तस्याभ्यन्तरोद्याने वृक्षलतागुल्म-पादपानामालवालेषु जलमिञ्चन्ति । केचिज्जलप्रवाहप्रणालीं परिष्कुर्वन्ति । अपरे कारागारस्य कर्मशालाया कक्षान् सम्मार्जयन्ति । केचनोद्यानवीथीरुभयतो मार्ग-परिष्करणाय तृणदूर्वादीनि कृन्तन्ति । अन्ये वृक्षमूलेषु मृत्तिकया साकं खाद्यं व्यामिश्रयन्ति । परे कक्षेषु हस्ताभ्यां वस्त्राणि वयन्ति । केचित् कम्बला-न्यूर्णासनानि, दर्भासनानि च निर्मान्ति । अन्ये जलकुण्डसमीपं वस्त्राणि प्रक्षालयन्ति केचन मुद्रणालयप्रकोष्ठे पुस्तकानि मुद्रयन्ति पुस्तकबन्धनानि च साधयन्ति । केचन कर्मचारिणो बन्दिनामेतेषां कार्यकलापानां निरीक्षणं कुर्वाणाः सन्ति । प्रहरिणश्च यत्रतत्र शस्त्रहस्ता इतस्ततः सावधानमटन्तः सूक्ष्मेक्षिकया स्वनियोगं परिपालयन्ति ।

तत्रैव कारागारान्तःप्राङ्गणे वर्तमाने सुविशाले खलु भवनेऽध्यक्षस्यैकं कार्यालयप्रकोष्ठोऽस्ति । तस्मिन् मध्यभागे सर्वोच्चे काष्ठमञ्चेऽध्यक्षमहोदयो निषण्णो वर्तते । तत्पार्श्वयोर्द्वयो सम्मुखे चानेके कर्मचारिणो लेखकाः पत्रङ्कनकर्मकरा कोषाध्यक्षादयः पत्रसंहतीनां मध्ये स्वस्वकार्याणि सम्पादयन्तो विद्यन्ते । अत्रैव कार्यालयस्यास्मिन् प्रकोष्ठस्यैकस्मिन् कोणे काष्ठफलकस्य सम्मुखमवाङ्मुखमासीनः किमपि लेखनकार्यं कुर्वाणो बन्दी स्थूलसज्जकमेकं काष्ठासनमधिष्ठितो विपिनविहारी चापिवर्तते । स खल्वन्येषां कर्मचारिणामपेक्षया मनाङ्मलिनवेशः प्रवृद्धश्मश्रुकूर्चो विवर्णदीनमलिनमुखमण्डलो मौनमास्थितः कांश्चित् कर्गदसंहतीर्गृ-हीत्वा कारागृहाध्यक्षस्य हस्ताक्षराणि कारयितुम् विनम्रभावेन प्रतीक्षमाणोऽध्यक्षस्य मञ्चाग्रे समुपतिष्ठते । क्षणानन्तरं तं तत्रोपस्थितमालोक्याध्यक्षोऽब्रूत—

अध्यक्ष — 'आगः, विपिन ! आयाहि, संसिद्धानि तानि कर्गदानि ? अपि त्वमधुनामे हस्ताक्षराणि तेषु कृतानि कामयसे ??'

विपिन — 'श्रीमन् भवदाज्ञानुसारं साधितानि सर्वाणि सेवकेन मया । भवद्धस्ता-क्षराण्येव केवलमवशिष्यन्ते ।'

अध्यक्ष — 'आनय तावत्तान्यतिप्रयोजनीयान्यावश्यकानि च त्वरितप्रेषणीयानि खलु वर्तन्ते । श्वोवा परश्वो वा मन्त्रिमहोदयस्यागमनमप्यत्र सम्भाव्यते ।'

विपिन — 'महोदय ! कोऽसौमाननीयोमन्त्रिप्रवर ?'

अध्यक्ष — 'अये ! किं न जानीषे त्वम् ? त एते सन्ति गुप्तमहोदया !'

विपिनविहारी किलाश्रुपूर्णाभ्यां नेत्राभ्यां तमध्यक्षं निरीक्षमाणः स्तब्धो ।

अश्रुधारा वर्षन्त्याः समस्तनाशमपि कुर्वाणो मन्ये विपिनविहारिण-
मानोऽभवत् । वोचत्—

अन्यः — 'अरे ! त्वं किमर्थमनवरतचिन्तातुरोऽसि ! तव स्वास्थ्यमपि च दिनानु-
दिनमपक्षीयमाणमिव दृश्यते !! मा भैषीः किमपि मा कुरुष्व ! गच्छति
काल सर्वं शामनं भावि । अलं चिन्तया ! आश्वस्तो भव ।'

दीनः — महोदय ! निर्दोषोऽप्यहं भाग्यविपर्ययवशाद् दण्डभागभूवम् ।'

अन्यः — अवश्यंभाविनो भावा भवन्ति महतामपि' तदत्र मा शुच !!'

विपिन — श्रीमन् ! कथमिवाश्वासयामि तावत्तावत् दण्डभोगेन दुःखमान !
श्वगोऽपि च पुत्राय ! स्वकुटुम्बनिष्ठा जीविकावृत्ति सर्वमपि मे
विनष्टम ! चौर्यकलङ्कश्च मम शिरस्यापतित ! मम गृहिणी, बाल-
काश्च सर्वेऽनाथा क्षुत्क्षामकण्ठा कणत्कणमवसीदन्ति !' (एवम्
वदन स दीर्घमुष्णं च निःश्वस्य सगद्गदकण्ठावरोधं नेत्राभ्यां स्थूल
स्थूला अविरता अश्रुधारा प्रवाहयन्ति)

मध्यगः — 'समाश्वसिहि भो ! 'समय एव करोति बलाबलम् !' अत्र न किं
कष्टम् ? नरकनिर्विशेषेऽप्यत्र कारागारे त्वदर्थं यत्सम्भावितमभूत्तत्सर्वं
मौविध्य मया विहितम् । भूयोऽपि च यथावसरं त्वत्कृते या या सुविधा
भवितु शक्यास्ता सर्वा प्रदास्येऽहं ते । अधुनावधि त्वमन्येभ्यो बन्दि-
भ्य पृथग्भूतो मम कार्यालये निश्चिन्तं कार्यं कुर्वाणोऽसि । अन्यथा
बन्दिनामपेक्षया सुस्वादु स्निग्ध भोजनं घृतदुग्धशाकादिसहितं भुङ्क्षे ।
कठोरश्रमेण दण्डनीयोऽपि त्वमत्राल्पायासमाध्य सुकरमेव कार्यं सम्पा-
दयसि । मासान्तरे वा पक्षान्तरे वा तव पत्नी, बन्धुबान्धवा, सुहृदो,
मित्राणि चात्रागत्य विनैव कमपि प्रतिबन्धं, विनैव समयावधि चिराय
त्वां मिलन्त्यालपन्ति च । एवं सत्यपि किमर्थमतिमात्रं विषीदसि ?
अपि त्वं जानासि नन्वेतत् सर्वमहं किमर्थं करोमीति ? तव पितामहे
स्वदाहमपि च महतो दुःखाद्विमोचितोऽभूवम् तस्मादेव तुभ्यमिमे
नियमपराधीनस्याप्यस्यादस्य महानुभूतिरास्ते ।'

विपिन — कृतज्ञोऽस्म्युपकृतोऽस्म्यनुगृहीतोऽस्मि भगवन् ! सेवकोऽस्मि तेऽहम् ।
भवदुपकारपरम्पराणां तु नास्त्येव मे जीवनपर्यन्तं कापि निष्कृति ।
श्रीमन्तोऽपि दीनहीनेष्वस्मीदृशेषु सकरुणं स्वयमेवोपकाराय प्रयतन्तीति
भवमहत्त्वानुरूपम् पामरोऽहमधम किं ब्रवाणि ! परन्तु दीर्घकाल-

भीतोऽस्मि दण्डभोगस्य समयोऽधुनाप्यवशिष्यत इति मां दुःखीकरोति श्रीमन्! विषमेऽस्मिन् सङ्कटकाले भवन्तमत्रभवन्तं विहाय नान्ये-वान्यः कोऽपि मे सहायः। प्रसीदतु महाभागः। मम हृदयदौर्बल्यं क्षमस्व प्रभो!'

अध्यक्ष — 'जानेऽहं तत्त्वतो यत्त्वं कुलीनोऽसि सुशिक्षितोऽसि, सचेतास्त्वमसि। स्वाभिमानस्य त्यागेन वक्तुमितिमात्रेणाप्यहं जानामि, परन्तु दण्डस्तु तावत् कथमपि भाव्य एव। नान्या गतिः। नास्त्येवोपायान्तरम्।'

विपिन — कुलकलङ्केनानेन प्रमादजन्येन मया सर्वोऽपि परिवारोऽपलाञ्छितः इत्येव मे महद् दुःखमसह्यम्!

अध्यक्ष — 'सत्यमान्य त्वम्! समाश्वसिहि। नाहं तव मुक्तिविषये किमपीदानीं वक्तुं पारये परन्तु मन्ये सम्प्रत्यत्र माननीयमन्त्रिमहोदये कारागार-निरीक्षणार्थमागते त्वद्विषये किमप्यावेदयितुं चिन्तयामि। धैर्यमव-लम्बस्व। नैतत् किमपि कस्मा अपि कथमपि वक्तव्यम्। शान्तचेतसा स्वकार्यनियोगं सावधानं परिपालय।'

(६)

अथैवं वर्षप्रायः समयोऽव्यतीयाय। एकदा सम्वादोऽयमावत्यत यद्धि सम्मा-ननीयो राज्यमन्त्री नगरेऽत्र जिलाधिकारि-कारागृहादीनां सर्वकारस्य कार्यालयानां निरीक्षणायागन्ताऽपरदिने। मण्डलाधीश-कार्यालयतश्चापि प्रामाणिकं सूचना-पत्रमेतद्विषयकं सर्वकार्यालयेषु प्रासार्यत। तिथ्यादिकं च सर्वं सुनिश्चितं तत्र सञ्चारपत्रे विज्ञापितमभूत्। ततोऽन्यान्यकार्यालयेष्विव कारागारेऽपि च तत्सत्कार-सम्भावनानुरूपमातिथ्यायोजनं क्रियमाणमासीत्। मण्डलाधीशप्रमुखाः सर्वेऽपि च वरिष्ठाधिकारिणः स्वयं कारागाराध्यक्षो, नगरपालिकायाः सभापतिः, कर्मचारिणश्च नगरे, कार्यालयेषु च व्यवस्था सुविहिता निरीक्ष्य मन्त्रिमहोदयस्यागमनं प्रतीक्षमाणाः सन्तिष्ठन्ते। बन्दिनश्च सर्वे कारागारप्राङ्गणैकदेशे पङ्क्तिं बद्ध्वा समुपतिष्ठन्ते। स्थानीयेभ्यो नानाकार्यालयेभ्य आसनास्तरणानि, वेत्रासनानि, काष्ठपीठपर्यङ्कादी-न्यानाय्य कारागारस्य भवनप्राङ्गणमध्ये वृक्षलतानां सघनच्छायाकुञ्जमध्ये मण्डपोऽस्ति विरचितः। मुख्यद्वारं सुभव्यं पुष्पपादपानां श्रेण्यो यथाक्रमं सुसज्जिताः शोभन्ते। प्रवेशद्वारे पत्रपुष्पतोरणान्यल्पनाकारादयश्च दीप्यमाना सन्ति।

अथ क्षणादेव मन्त्रिमहोदयस्य महत्तरयानं विमानवत्समाजगाम। तदा-नमनुसरन्ति चापराण्यपि च मोटरयानानि येषु मन्त्रिमहोदयस्य सचिवादयः

सहयात्रिणोऽभवन् । मण्डलाधीशेनान्यैश्च वरिष्ठाधिकारिभिः कारागृहाध्यक्षेण च, सहस्तधूननं मन्त्रिणः स्वागतविधिः सोपचारं साडम्बरं चोपपादि । माल्यार्पण-मकारि । मण्डपाधो मुख्यमञ्चे सुखमुपविष्टे मन्त्रिमहोदये, सर्वजनसमुदाये च कारागृहाध्यक्षो मुद्रिताक्षरं स्वागतभाषणमपाठीत् । ततो मन्त्रिणाऽपि पूर्वनिश्चितम् संक्षिप्तमभिभाषणमकारि । तदनु मन्त्री प्रवरोऽध्यक्षद्वितीयो बन्दिगृहं निरीक्षमाणः वशात् तत्र बभ्राम । व्यवस्थां सर्वां वीक्ष्य मन्त्रिणा सन्तोषभावः प्रकटीकृतः । ततः कार्यालयं गत्वा मन्त्रिमहोदयस्तत्रत्यमन्यं प्रबन्धम्, कार्यपद्धतिं सञ्चालनक्र-मादिकं सर्वमद्राक्षीत् । मन्त्रिसचिवेन निरीक्षण-विवरणं विलिख्य संरक्षितम् । तत्र कारागारे भविष्यति सुधारोन्नतिविषयकाः केचन प्रस्तावा मौखिका लिखित-रूपाश्च । अध्यक्षेण मन्त्रिमहोदयस्य पुरतः समुपस्थापिताः । अन्ते च बन्दिनः सर्वे पृथक् मन्त्रिमहोदयेन दृष्टाः तेषां सुखदुःखादिकं च पृष्टवता मन्त्रिणा तदपराध-विषयेऽपि किमपि पृष्टम् । भविष्यति तद्धृदयपरिवर्तनस्य कृते, सदाचरणाय च बन्दिनः सोपदेशं प्रबोधिताः । एवं कुर्वता तेषां विपिनविहारिणः क्रमप्राप्ते वारे समागते तमुद्दिश्य मन्त्रिमहोदयेन कारागृहाध्यक्षः पृष्टः — 'कोऽसौ ? कश्चास्या-पराधः ? को दण्डः ?'

अध्यक्षः — 'श्रीमन् ! विपिनविहारीति नामासौ बन्दी । बैङ्कधनापहरणकाण्डे स्वनियोगे प्रमादाचरणं, स्वोत्तरदायित्वेऽस्खलनमस्यापराधः । वर्षत्रय भोग्यश्चास्य कठिनकारावासदण्डः । दण्डं भुञ्जानोऽसावर्धवर्षप्रायं समयं व्यतीतवान् ।

मन्त्री — 'अरे ! किन्नामासि त्वम् ? (विपिनमुद्दिश्य)

विपिन — 'विपिनविहारी, महोदय !'

मन्त्री — 'कस्यात्मजस्त्वमसि ? किं च ते पितुर्नाम ?'

विपिन — श्रीमन् ! गगनविहारी मम पितामहोऽध्वविहारी च मे पिता ।'

मन्त्री — क्व ते पिताधुना वर्तते ? पितामहश्च किं कुरुते ?'

विपिन — 'मातापितरौ मे तीर्थाटनयात्रां गतौ स्तः । पितामहश्च मम गार्हस्थ्याद्विरक्तो हरिद्वारमधिवसति ।'

विपिन — 'किमर्थं त्वया बैङ्कधनमपहृतम् ?'

विपिन — स्वामिन् ! नाहमपहृतवान् धनम् । न जाने केनापहृतं तत् ? प्रमादात्

स्वोत्तरदायित्वादपस्खलनादनवधान दोषापराधादेव तमिम दण्डमहमलभे ।'
(अश्रुपूर्णलोचनोऽवाङ्मुख पश्यति)

मन्त्री — 'अपि त्वमसि निर्दोषः ?

विपिन — 'सर्वथा निर्दोषोऽस्मि प्रभो ! हृतभाग्यमेव मे मामपराधिन प्रामाणयत् । वैङ्कसंस्थानस्य धनमरक्षणे मम प्रमाद एवापराध ।'

मन्त्री — 'अवश्यमेव मोक्तव्यो दण्डोऽयंते प्रमादज । अस्तु, भविष्यति मैव कदापि प्रमाद !'

इत्थक्रमेणावशिष्टान बन्दिनोऽन्यान्यानपि चैवमेव किमपि किमपि पृच्छन् मन्त्रिमहोदय पुनर्मण्डपमागत्योपविष्ट । सचायचषकपान स्वल्पाहार फलादिमहितमुपभुज्य ततो राजकीयमतिथिभवन जगाम ।

(७)

अथ रात्री सम्माननीयमन्त्रिमहोदयस्य स्वागत सत्कारार्थं मण्डलाधीशेन विराट् प्रीतिभोजोऽप्यायोजित । तत्र भोजे बहवोऽधिकारिण काग्रेसीया नेतारो गण्या मान्या – प्रतिष्ठिता नागरिका विद्वास प्राध्यापका कवय कलाकारा धनिकाश्चामन्त्रिता सन्ति । यथा समय समागते मन्त्रिमहोदये समारोहस्यास्य कार्यक्रमा प्रारभन्त । सयुक्त सगीताराधन– कविसम्मेलन, पानगोष्ठी च प्रारभेताम् । तत प्रीतिभोजोऽपि च सानन्द व्यवसित्त । समाप्ते हि प्रीतिभोजे यदा मन्त्रि महोदयो दीर्घाया जनपड्क्ति मतिक्राम्यति तदाम प्रस्थानमगलार्थं करबद्ध प्रणामोन्मुख कारागाराध्यक्ष मद्राक्षीत् । तत करसङ्केतेनाहूय वार्तालाप कुर्वाण प्राङ्गणैककोण एकान्ते नीत्वाऽवोचत् —

मन्त्री — 'स बन्दी विपिनविहारी भवन्मते कीदृशोऽस्ति ? अथकारागारे तस्य व्यवहार- वर्तनादिकञ्च किंविधम् ?'

अध्यक्ष — 'नाह किमप्येतद्गत विशेषेण जाने परन्त्वेतदह नून जानामि यत् स कुलीनोऽस्त्येकोनागरिक । दौर्भाग्यात सोऽपराधित्वेन दण्ड भुञ्जानोऽस्ति । कारागारेऽपि स शिष्टजुष्ट व्यवहरति, तत्रत्यान्नियमाश्च सर्वात्मना परिपालयति सानुशासनम् ।'

मन्त्री — 'तद्भवान किमर्थं तत्कृते कमपि मुक्त्युपाय न चिन्तयति ?'

अध्यक्ष — नियमाधीनोऽहं किमिवाहं कर्तुं पारये ? तथापि यावन्मदायत्तं तावत् सहानुभूति पूर्वकं व्यवहरामि। अन्यबन्दिनामपेक्षया सौविध्यं च तस्मै प्रयच्छामि।'

मन्त्री — 'श्रूयताम् ! आगामिनि गणतन्त्रमहोत्सवदिने राज्ये केचन बन्दिनो महामहिमराज्यपालस्याज्ञया मोचयिष्यन्ते। अस्माकं मन्त्रालयाद्राज्यान्तर्गतानां बन्दिनां सर्वेषां सूच्यो नन्वामन्त्रिता सन्ति। यदि च भवानुचितमिवावकल्पयति, तदा विपिनविहारिणोऽपि नाम स्वानुशंसापूर्वकम् सम्प्रेष्यताम्। अहमपि च तत्कृते राज्यपालमहाभाग किमपि निवेदयिष्यामि। अतःपरं तद्भाग्यम्। विषयोऽसावतीव गोपनीयः। सावधानः समर्यादं च रक्षतु भवान् मन्त्रमिमम्।'

अध्यक्ष — 'यथाज्ञापयति मान्योऽभवान् मन्त्रिमहाभाग। तथैव करिष्येऽहम्।'

एवमुक्त्वा मन्त्रिमहोदयो मोटरयानमारुह्य ततः प्रतस्थे।

(८)

अथाद्य गणतन्त्रदिवसस्य महापर्वोत्सवसमारोहो वर्तते। प्रातरारभ्यैव नगरे सर्वत्र लोकाः — विशेषतो राजकीयाः अधिकारिणः कर्मचारिणश्चात्र सर्वसाधारणाश्च तमिमं महोत्सवमुद्यापयितुं हर्षनिर्भरमानसाः सोत्साहाः सोद्योगाः सयत्नाश्च दरीदृश्यन्ते। राजकीयेषु कार्यालयेषु सर्वेषु प्रातर्ध्वजवन्दन, राष्ट्रीयगान, प्रार्थना, भाषणानि च सम्पेदिरे। विद्यालयपाठशालादिषु छात्रेभ्यो मिष्टान्नं व्यतीर्यत। नगरे दीनेभ्योऽनाथेभ्य, कारागारेषु बन्दिभ्यश्च विशिष्टं स्निग्धं मिष्टान्नभोजनमदीयत। अनाथमहायान्धविकलाङ्गेभ्यो वस्त्राच्छादनादीनि व्यतीर्यन्त। सायङ्कालीनेषु वृन्देषु खेलाकूर्दनानां सांस्कृतिकानामायोजनानां, नाट्याभिनयसङ्गीतगोष्ठीनां, कविसम्मेलनानामिन्द्रजालकौतुकप्रदर्शनादीनां, भाषणव्याख्यानानां, दीपावलिदृश्यानां कार्यक्रमाश्च सडिण्डिमघोषं समुद्घोषिताः। सर्वत्रैव हर्षानन्दाह्लादपूर्णमिमपूर्वमेव वायुमण्डलं सर्वजनमानसोल्लासकरमासीत्।

सार्धदशवादनप्राये समये स्थानीये कारागृहे बहुदिनानन्तरं मधुरं स्निग्धं सुस्वादु सरसं च मिष्टान्नमातृप्ति भुक्तवन्तो बन्दिनोऽद्यावकाशदिनमिति स्वकीयेषु कोष्ठकोटजेषु विश्रामसुखमनुभवन्तो निश्चिन्ततया प्रसन्नाः स्वस्थाः सुखिनश्चात्मानं मन्यमाना मोदन्ते। कारागाराध्यक्षः स्वकार्यालये सैवागन्तव्यागमीनोऽस्ति। बन्दी

विपिनविहारी कार्यालयस्य तस्य कक्षकोणे भूमावेवार्द्रं निद्राण स्तिमितलोचनो मुहुर्मुहुर्जृम्भमाणो विमना विषण्णो निषण्णश्च वर्तते । तथा भूत विपिनविहारिणमालोक्याध्यक्षमहाशयो विनोदगर्भया गिरा समन्दस्मित तमवदत्—

अध्यक्ष — 'अये, विपिन ! अपि त्वां निद्रा बाधते ? तत एव त्वं भूयो भूयो जृम्भसे खलु ! मन्ये, ऽद्य यथेच्छम् भूरिभोजनादेव त्वमेवमालस्याभिभूतोऽसि ।'

विपिन — (निर्लक्ष्यमिव पश्यन्) 'नहि श्रीमन् !'

अध्यक्ष — 'अपि सत्यं वदसि ?'

विपिन — 'महोदय ! सत्यं वदामि ।'

तावदेव केनापि भृत्येनाध्यक्षकक्षं प्रविश्य विज्ञापितम्—'श्रीमन् ! मण्डलाधीश महोदया समायान्ति । मोटर ध्वनि श्रूयते ।' अध्यक्षो यावदुत्थाय ससंभ्रमं कारागारस्य प्रवेशद्वारमायाति, तावदेव मण्डलाधीशो गोपुर सम्मुखमाजगाम । अथान्तः प्रविश्य च स वेत्रासनमुपविश्य स्वकञ्चुकादुद्धृतान् पत्रमेकमाकृष्य तत्रापठ्यमानो राजाज्ञामिवाश्रावयत्—

"अद्य तावद् गणतन्त्रदिवसमहोत्सवः स्वाधीनभारतराष्ट्रस्यैतस्यास्माकं वर्तते । केन्द्रिय सर्वकारस्यादेशानुसारं राज्यपालमहाभागो महामहिमोऽस्य राज्यस्य मन्त्रिमण्डलं तत्सम्बद्धं मन्त्रालयं चाज्ञापयति यद्धि स्थानीये कारागारे निगडिताङ्गिनाङ्कितान् पञ्चापराधिनो बन्दिनो मण्डलाधीश स्वयं तत्र गत्वाऽध्यक्षमादिश्य मोचयतु— (१) लीलारामः (२) साधुदासः (३) रामभजनः (४) दुर्गाचरण (५) विपिनविहारी चेति ।"

मण्डलाधीशस्यागमनं ज्ञात्वा सर्वे कर्मचारिणो बन्दिनश्च तत्र कारागारप्राङ्गणे समवेता आसन् । तेषाम् सर्वेषामुपस्थितानामेव मण्डलाधीशसमक्षमेव प्रोक्तास्त इमे पञ्चापि बन्दिनो लोहकारावन्धनानि विच्छिद्य तत्कालमेव निर्मुक्ताः । स्वातन्त्र्यमाप्य ते पञ्चापि जना हर्षनिर्भरमानसा स्वगृहान् ययुः ।

(६)

अथ च गृहं प्राप्तो विपिनविहारी द्वारं प्रविश्य प्राङ्गणमध्ये स्थितः स्वपत्नीं मृणालिनीमुच्चैः स्वरं समबोधयत्— 'अये ! प्रिये !! मृणालिनि !!!

प्रियतमे !!! क्वनुत्वम् वर्तसे ? किं वा कुर्वाणासि ?? इहागच्छ ! पश्य, कारागृहान्निर्मुक्तोऽहं गृहं प्राप्तोऽस्मीदानीम् !! आयाहि ! आयाहि भो ! क्वासि त्वम् कल्याणि ? किं करोषि ??'

आकर्ण्य चिरपरिचित कण्ठ-स्वरं गृहान्तः कक्षतो बहिरागत्य मृणालिनी सहसा किमप्यत्यद्भुत विस्मापकमवितर्कितमसम्भवमिव सम्मुखे साक्षाद्दृश्यमानं प्रत्यक्षं पश्यन्त्यपि स्वनेत्रदर्शने न विशश्वास। केवलं मौनमास्थिता दिङ्मूढा विभ्रान्ता चित्रलिखितेव कामपि विचित्रामेवात्मनो मनो दशां, मानसीं विह्वलतां गोपायितुमपारयन्ती विस्फारितलोचना जडतां गतेव निर्निमेषं ससम्भ्रमं पश्यन्ती तस्थौ। कञ्चित्कालं विपिनं विलोक्य महता काठिन्येन स्वात्मचेतनामुपलभमाना, यथार्थं ज्ञातविश्रामा, लज्जमाना, प्रवेपमानाङ्गयष्टिः, प्रस्वेदक्लिन्ना, मूर्च्छन्तीव, विगलदश्रुधारा सवेगं विपिनसमीपं कयापि मनोवाचामगोचरया प्रेरणया प्रसह्य तथाकर्तुं नियोज्यमानेवागत्य तच्चरणौ ववन्दे। प्रणयाश्रुह्रीसद्धोषगद्गदं चोवाच—

'स्वामिन् ! किमिदं पश्यामि !! स्वागतं ते मम हृदय सर्वस्व !!! स्वागतम् ! जीवितेश्वर !! दयित !!! प्राणनाथ !!! स्वागतं ते !!! कथमिव निर्मुक्तो भवान् बन्दिगृहात् ? दण्डभोग्यात् कालावधेः पूर्वमेव हि कथं प्राप्तो भवानत्र ?? स्वागतं ते प्राणवल्लभ ! स्वागतम् !! धन्योऽद्य दिवसः !!! धन्यश्चासौ क्षणः !!! महत्सौभाग्यस्य विषयोऽयं यदहं प्राणनाथ, स्वामिनं भर्तारं गृहागतं साक्षात् पश्यामि !!!

विपिन – 'प्रिये ! समाश्वसिहि !! प्रकृतिस्था भव !! [महतीयं दीर्घा च मम मुक्तेः कथा। प्राप्तकाले विस्तरेण त्वां कथयिष्यामि ! बाले ! मुग्धे !! गतं माशुच। आनय तावदासनम्, जलं च पातुमिच्छामि। कृतभोजनोऽस्मि सन्तृप्तः। आम्, आनीयन्ताम् तावन्मम क्षौर कर्मसाधनोपकरण-मञ्जूषादर्शादीनि। स्नानार्थं जलं, धौतानि वस्त्राच्छादनानि चोपस्थाप्यन्ताम्।'

मृणालिनी – 'क्षणात् सर्वं साधयामि दासी तेऽहं स्वामिन् ! उपविश्यतामत्र। इदमासनम्। न जाने स्मरमाणापि शीघ्रता कर्तुं न पारये तत्किमर्थम् ? जाग्रदवस्थायामपि च स्वप्नमिवानुभवन्ती स्वकर्तव्यं परिपालयितुं नाऽलम् प्रभवामि।'

एवं वदन्ती मृणालिनी स्वपतेर्विपिनविहारिणः सेवार्थं यथोक्तं कर्तुं व्यवस्यति।

अथ कृतशौच स्नानो विपिनविहारी वस्त्राणि परिधाय गृहीतविश्रामो मध्या-ह्नोत्तर मृणालिन्या प्रणय चाटु पूर्णैः दुर्लभवचोभिः [illegible] विहाय [illegible] च वेत्रासनमध्यासीनोऽस्ति साम्प्रतम्। तत्सम्मुखं भूमावेव मृणालिनी चापि निषण्णा-स्ति। गुप्तगुप्तविदुषोः तयोः परस्परमित्थं सम्भाषण क्रमेण वार्तालापः प्रवर्तते।

100733

मृणालिनी – 'दयित! प्राणपते!!! अतीव दुर्बलगात्रो भवान् [illegible] दृश्यते! मन्ये तत्र कारागारे निर्दयं [illegible] पीडितो भवांस्तत्रत्यैः क्रूरैः कृपाणैः कठोरहृदयैर्निष्ठुरैश्च दण्डिभिर्भवेत्।'

विपिन – 'प्रिये! नाहमेवं सर्वथा गतोऽपि तादृशं किमपि कष्टं चिन्तयामि। तत्राहं तत आरभ्यैतत्कालपर्यन्तम् सर्वं सुखमासिष्ठम्। स्वगृहनिर्विशेषमेवाहं तत्र कालमत्यवाहयम्। वस्तुतस्तव विरहादन्यत् किमपि दुःखं नान्वभवम्। सत्यं ब्रवीमि। आम्, किमपि दौर्बल्यमिवालक्षयसि तत्कारणं त्विदमेव भवितुमर्हति, यदहं सदैवैतच्चिन्तयानोऽभूवं यन्न कदाचिन्मम मृणालिनी स्त्रीहृदयसुलभयाऽबलाजनस्वभावभीरुतया वा रहस्यभेदं कुर्या-दित्याशङ्कयैवाहं मनाग् दुर्बलतां गतः स्याम्। नान्यत्किमपि मम क्षीणत्वे कारणान्तरमास्ते। आश्वस्ता भव। स्वस्थोऽस्मि, तन्दुरुस्तोऽस्मि सानन्दोऽस्मि च प्राणवल्लभे!'

मृणालिनी – 'आश्चर्यं मे भवति नन्वेवंविधं भवद्वचः शृण्वन्त्याः।'

विपिन – 'अयि स्वभावमुग्धे! मृदन्तःकरणे!! भीरो!!! प्रिये मृणालिके! तदिदं द्रव्यापहरणकलाकौशलमपि 'योगः कर्मसु कौशलम्' इतिवद् योगसाधनतपश्चर्ययैव दुःसाध्यं दुष्करञ्च कर्ममन्यताम्। तदद्य मम योगसमाधिश्च-रमां सिद्धिं प्राप्तवान्।'

मृणालिनी – (समन्दस्मितम्) 'कान्त! भवानधुना मम कोऽप्यैन्द्रजालिक इव प्रति-भाति। धन्याहमेकमेवम्! धन्या न मायाविता! मद्दृष्टे वा तव मायामिमामीदृशीमिदमित्थं वेद! परं सम्यगेवैतद्धि त्वयातीवाश्चर्यकरं दुःसाहसिकं दुष्करं च कर्मानुष्ठितम्।'

विपिनः – वस्तुतस्त्वं न जानीषे यथार्थतो जगज्जालप्रपञ्चमधुनातनयुगीनम्। पुन-रिदानीन्तनं स्वराज्याभिधानं दुःशासनमराजकं त्वं सर्वथा न परिचिनुषे। तत एव विकल्पसे। अधुनात्र देशे योजनापञ्चवर्षकालमिव वर्षाकालीन जलमिव सर्वतो धनमपरिमेयं प्रभूतधारासारम् प्रवहद् वर्तते। तच्च

सज्जना सदाचारा परलोकभयाद्बिभ्यतो ह्यास्तिका भोक्तुं न प्रभवन्ति परन्तु मादृशा कपटपटवो धूर्ता वञ्चनाकुशला विदूषकशिरोमणय एव तदुपयोगं कर्तुं सक्षमा भवन्ति । सत्यमेव मन्यस्व मद्वच ।'

मृणालिनी 'अस्तु तावत् । अथाधुनावाभ्यां किमनुष्ठेयम् ? को हि जीवनक्रम स्वीकरणीय ?? केन विधिना च व्यवहर्तव्यम् ??? त मे स्वयोजनानुरूप निरूप्यताम् । तथैवाहमाचरेयम् ।'

विपिन 'इदानीन्तु द्वाभ्यामपिचावाभ्यां दम्पतिभ्या अत्रैव दुःखदग्धाभ्यामकिञ्चनाभ्यां दुर्भाग्यविडम्बनोत्पीडिताभ्यामिहैव नगरे वस्तव्य खलु । मम मुक्ते सम्वाद स्वमाहात्म्यात् स्वत एव सर्वत्राचिरादेव प्रचारमाप्स्यति नाम नूनम् । ततो बन्धुबान्धवा मित्रसुहृद' परिचितास्तथाऽपिता हितैषिण कौटुम्बिका सजातीया प्रतिवेशिनोजनाश्च सर्वेऽस्मद्गृहमना हताश्चाप्यवश्यमागमिष्यन्ति, ते च सर्वे कृतका सहानुभूति, कृत्रिमा समवेदना, गतानुगतिका, मिथ्याचारवचनावलिगर्भा हितैषणा, साडम्बरा बन्धुता च मत्कराथूलील स्वचिकीर्षितैस्तैरभिनाटयिष्यन्ति ध्रुवमिति मम मानवहृदयमनोविज्ञानम् । तदावाभ्यामपि त सामान्य तथैव व्यवहर्तव्यम् । ततोयथेच्छं करिष्याव । (सगम्भीरभावम्) अपि तदशीतिसहस्र मुद्रामित धन त्वया प्रयत्नपूर्वक सुरक्षित तव सकाशम् ?'

मृणालिनी – (समन्दमधुरस्मित विपिनविहारिणो मुखमुद्रां प्रेक्ष्य) अस्त्येव तत्तथैव निगूढ सुरक्षित मानुजारमिव यथा भवान् मे निःशेषरूप समर्पितवान् ।'

विपिन – 'अस्तुतावत्त्वमपि च मेऽर्धाङ्गी नवयुगक्रान्तिकारिणी स्वराज्योत्तर शिक्षा दीक्षासंस्काराचारवती वीरवधू । त्वय्येतन्मम विश्वासानुसारं सर्वथोपपद्यते । अथ पुनरवधीयताम् । अद्य तावद्गणतन्त्र दिवसमहामहोत्सव । नात्र कोऽपिचात्रागमिष्यति । सर्वेऽपि च नागरिका लोकास्तमिममुत्सवमुपायमितु स्रोतसा इव गङ्गाम्बुप्रवाहमनुसरन्तस्तन्मनस्कास्तद्गत प्राणास्तद्वासोच्छ्वासास्तच्चेष्टास्तत्समर्पिताशेषमनोरथास्तत्रैव जीवनसाफल्यं विन्दमाना मोमुद्यन्ते । आवां तावत्स्वगृहमेवाधिवसन्ता अद्य रात्रौ तमिम महोत्सवसमारोह सानन्द समुत्सं च द्विरागमनसमये मधुरजनीमिवोद्यापयाव, यमुन्मर्व निमित्तीकृत्याह कारागारान्निर्मुक्तोऽत्र त्वामुपस्थितोऽस्मि, मृणालिके ! बाले !!!' मुग्धे (एव वदन् विपिनविहारी स्वपत्नीं तां मृणालिकां भुजपाशे सुदृढ गृहीत्वालिलिङ्ग चुचुम्ब च चिरम्)

आत्मवेदना

प्रभाकर शास्त्री

धौकलो जात्या चमकार आसीत्। स सवर्णानां क्षेत्रेषु हलादिपरिचालनेन स्वजीवनं यापयति स्म। परिवारस्येतरे सदस्या अपि श्रमादिकैर्यत्किञ्चिदर्जनम- कुर्वन्। मूलतः ते सर्वे श्रमिका आसन्। प्रातरारभ्य सूर्यास्तं यावत् श्रमं कुर्वन्तोऽपि स्वल्पमेवार्जनं कर्तुं पारयामासुः। सर्वेषां सम्मिलितेन परिश्रमेणापि नोदरपूर्त्तौ क्षमास्ते। वृत्तिरहिते तु दिवसे सर्वे एव उपवासमकुर्वन्। सत्यमेव तेषां निर्वाहः कृच्छ्रतया समपद्यत।

अद्य तु धौकलो विपद्ग्रस्त इव आभासते स्म। काऽपि नव विपद् भृश- मखिन्नयत् तं वराकम्। न केनाऽपि गृहसदस्येन सहाऽऽलप्तुमियेष सः। तदीयाऽन्त र्वेदना तु मुखमुद्रया प्राकट्यमवाप। मन्त्रौषधिभिः मर्दितवीर्यः सर्प इव स मनस्येव कुप्यति स्म एतेनान्तः क्लेशेन तदीयो देहो यदा कदा भृशकम्पत।

प्रातरद्य ग्रामणी स्वयं तदीयोटजद्वारे समागत्याऽगर्जत्— 'ह्यः तवात्मजा राधा कृषिकार्यमसमाप्यैव क्षेत्रात् पलायिता। न च तया किमपि कारणमभिहितम्। एतादृशी वृत्तिर्न खलु क्षम्या। अद्याऽपि न स्थास्यति चेत् साऽस्माकं क्षेत्रे सूर्यास्तं यावत्तदा न स्यातुं शक्ष्यसे स्माकं ग्रामे।"

ईदृशमित्थं तर्जयित्वा निर्जगाम सः। धौकलस्तु मूकः सन् किमपि जगाद। स तु गच्छन्तं तं कुलीनकं स्वदृष्ट्या दग्धुमिव कामयामास। न किमप्युत्तरं प्रायच्छत्स इतिकृत्वा स्वात्मानं बहुशोऽजुगुप्सत। क्षेत्रात् प्रत्यागतया राधया सर्वमेव सभाषित मासीत्। ग्रामाध्यक्षस्य पुत्रेणैकान्ते सदृश्य तामालिङ्गितुं प्रायतितम्, तया च शीघ्रमेव ततः पलायितम्। श्रुत्वैतत् स भृशप्रकुपितः, परं नाऽक्षमत स प्रतिकर्तुम्। न श्रोष्यति ग्रामणी क्षणमात्रमप्येतत्। स तु राधामेव गर्हयिष्यति। तदनुसारं तु राधया एव तमाकर्ष्टं प्रयतितं भवेत् प्रत्याख्याने च कृते सति तेषां मर्चिना स्यात्। सत्यं ज्ञात्वाऽपि ग्रामणी स्वात्मजं नैव गर्हयिष्यति। स खलु न

स्वीकरोति यदन्यजनानामपि काचन प्रतिष्ठा भवति । स तु सदैवोदघोषयति यत् भवगाता स्वर्गमार्गेणाऽप्यजा पावनतामापद्यन्ते ।

चिन्तयितवैतद् धौलो न किमप्युक्तवान् ग्रामणीमं को लाभो निरर्थकेन प्रश्नेन ? अत एव मौनमाश्रितं तेन । परं विपत्तिस्तु न निरस्ता । ग्रामाध्यक्षस्य वचनं त्वादेश इव समाकलनीयं । तदा किं स स्वात्मजां तत्रैव प्रेषयेत् यत्र खलु ग्रामाध्यक्षस्य पुत्र तस्याः शीलं हर्तुं चेष्टिष्यते । न चेत् सा तत्र गच्छेत्, तदा ग्रामणी क्रोत्स्यति । तदा किं कुर्यात् वराकः सः ? एवं चिन्तयता तेनाऽस्मनो भाग्यं बहु विनिन्दितम् ।

किं निर्णीतं त्वया ?" तस्य भार्यापृच्छत् । सा खलु बहुकालेन पूर्णार्भस्थितिनीरक्षमाणाऽभूत् । राधाऽपि तत्रैव स्थिता एकतः । स्थितेगाम्भीर्यं स तत्त्वतरङ्गितमुभयो कृते । तत्प्रतिक्रियास्तु सर्वथाऽवधेय इव प्रतीयन्त स्म । न विद्यते रक्षाना प्रतिष्ठा सुरक्षा वेति निर्णीतं ताभ्याम् । राधा तु निर्मोहेन मातस्य स्वजीवनमेव धिक्चकार । तस्या एव कृते पितरौ विपद्ग्रस्तौ सञ्जातौ । अन्यथा तु न कदाऽप्यसौ दैन्यमनुभूतवन्तौ तावुभौ । विचित्यैतत्, केवलं स्वानि भवितानि निनिन्द सा अपि तु प्रस्तुतयाऽऽपदा सा भृशं विस्मयाञ्चकार ।

'निर्णयस्तु स जान ।" बहुक्षणानन्तरं समुदीरयामासधौलः । 'अपमानेक्षया तु मृत्युर्वरीयान् । अथवाऽग्रेगावेव त्यजेम ग्रामसनम् न कोऽपि रोस्यत्स्मान तमित्याधृत निगीय । युज्यतं किमेतत् ?" प्रापृच्छत् स पलायनमेवम् ।

"परं कुत्र गन्तव्यमस्माभिः ?" कलत्रेण पृष्टम् ।

"कुत्राऽपि । न्यक्ते खलु सर्वस्मिन् पा विचारः नार्हते । साम्प्रतं तु ग्रामाध्यक्षस्य मुखात् बहिर्गमनमेव चिन्तनीयम् । बहिरपि चेद् दुःखोऽस्ति प्रस्तुतो भगयितुमस्मान् । तदा ईश्वर एव रक्षिता ।" प्रत्युत्तरं भाग्यवादिनाधौलेन ।

× × × ×

कालः स अर्धरात्र । निःशब्दाऽपि ग्रामो निद्राया अधीनो दृश्यते । यदा कदा निशाविरहितस्य कुक्कुरस्य कुक्कुरस्य स्वनस्यमेव गौरवतामस्वगतः । कश्चित् सपदि तत्र आगतिं न वेत्ति कथयितुं तु न पार्यते । कथञ्चिद्धौलोऽपि कश्चिज्जन नारकाणि गणयितुं प्रयतते न वेति निर्णेतुमपि न शक्यते । परमेतत् तु स्पष्टं यत् कोऽप्यस्य नेषां निरूपणम् ।

घौंक्लस्य समग्राऽपि गृहसामग्री लघौ खल्वेके प्रसेवे शकुली भूतमासीत्। प्रसेवश्च तस्य स्कन्धमाश्रयति स्म। भारश्चास्य नाऽऽबाधत तदीयां गतिम्। सत्यमेव स अस्खलितया गत्या चलति स्म। तस्य भार्या पुत्री च तदनुसरणमकुरुताम्। परं योजनद्वयेऽतिक्रान्ते सति तेषां गतिः समवरुद्धा। न केवलमेको वृकः प्रत्युत त्रयो भयावहा वृका भुशुण्डिभिः सज्जितास्तत्र मार्गमवरुध्य तिष्ठन्ति स्म। दृष्ट्वैव तान् नरराक्षसान् राधा तदीया जननी च भृशमबिभीताम्। कः खलु त्रायेत तान् सर्वान् सम्प्रति? तत् स्थलं सर्वथैव जनशून्यमासीत्। निःशस्त्राः खलु ते वृकान् रोद्धं कथं क्षमिष्यन्ते?

"किमिच्छसि भवन्तः" साहसमभिधाय पप्रच्छ घौंकलः।

"जीवितुं चेदिच्छसि, तदा प्रतिनिवृत्य ग्रामाध्यक्षसमीपं नयाऽस्मान्। मार्गे न किमपि वक्तव्यं त्वया। कोलाहले कृते सति यमालयमेव प्राप्स्यसीति जानीहि। तद्गृहस्य स्थितिरपि त्वया वर्णनीया। न काऽपि त्रुटिः स्यादस्या वर्णनायाम्। अन्यथा गोलिकैषा तव हृदयस्थलं सद्य एव भेत्स्यति।" वृकस्य कथनं सुस्पष्टं सन्देहातीतं चाऽऽसीत्।

घौंकलो विस्मित आसीत्। तदीयः परिवारोऽपि विगतभय इव प्रतीयते स्म। तेऽनुमितं यदेते वृका ग्रामणीमेव ग्रसितुमभिलषन्ति। प्रतिनिवर्तनं त्ववश्यमेव विधातव्यं तैः सर्वैः। न कोऽपि विकल्प आसीत् तस्मिन् विषये। ग्रामं प्रतिनिवृत्ते सति यद् भविता तद् भविता। न पारयामासुस्ते किमपि प्रतिविधातुम्। विचिन्त्यैतत् घौंकलः स्वपरिवारेण सह ग्रामाभिमुखः सन् प्रययौ। वृकाः खलु तानन्वसरन्।

घौंकलो निश्चिन्त इव मार्गमलङ्घत। राधा तज्जननी च तस्याऽनुसरणमकुरुताम्। परिवृत्तिं तु मनसैव न कामयामासुस्ते सर्वे। को जानीते यत् परिवृत्तिरेषा वृकान् कोपयति। अत एव मौनमाश्रित्य ते मार्गं लङ्घन्ते स्म।

ग्रामं प्राविशन् ते सर्वे। कुक्कुराणां बुक्कनं तैः सम्भावितम्, परं वृकैर्भीतास्ते स्वलाङ्गूलं पादयोर्मध्ये कृत्वा कुत्राऽपि विलीना इव बभूवुः। अतर्कितमेतद् घौंकलस्य कृते। कथमेतद्यत् कुक्कुरा न सोढवन्त्यपरिचितानां प्रवेशमस्मिन् ग्रामे? परं नाऽक्षमत स तन्निर्धारणे।

"तत् खलु ग्रामाध्यक्षस्य गृहम्।" घौंकलेनैकस्यां दिशि इङ्गितमिव कृतम्।

"किं वयं गच्छेम साम्प्रतं स्वगृहम्?" पुनः पृष्टवान् स, परं न किम-

प्युत्तरमासादितवान् । वीतचिन्तोऽपि स पुनरपि स भयग्रस्त समजायत । परिवृत्तिं कुर्यान्न वेति स चिन्तयामास ।

"अत्र तु न कोऽपि विद्यते ।" राघयोद्घोषितमेतत् श्रुत्वैतद् धौकलोऽपि परिवृत्य तान् वृकानन्वेष्टुमियेष, पर सत्यमेव ते नाऽवर्तन्त तत्र । विमूढा इव ते इतस्ततो दृष्टिमक्षिपन्, पर न कोऽपि तेषा दृष्टिपथमायात । वैफल्येनाऽनेन ते दिग्भ्रान्ता इव तत्रैवार्ऽतिष्ठन् । ततश्च स्वमस्तक हस्तेनाऽऽस्फाल्य धौकलो गृह प्रति प्रचचाल । परिवारश्च तमनुससार । ततस्तु प्रभाता खलु रजनी ।

"किं कुर्याम वय साम्प्रतम् ?" स्वपरिवारमप्रच्छद् धौकल । क्रन्दनात् किञ्चिदेव हीनमासीत् तस्य वचनम् । नैराश्येण च पूर्णेन आक्रान्ताऽऽसीदाकृति-स्तदीया । न स्थातु न च गन्तु शक्नुयुस्तदा किं कुर्युस्ते वराका । दौर्भाग्येन समुत्पीडितास्ते परिश्रान्तिवशाद् भूमावेवाऽस्वपन् ।

सूर्योदय सजात, तदनन्तर च मध्याह्न । पर न जाग्रतास्ते । अपराह्णे सजाते काऽपि प्रतिवेशिनी राधाया जननीमाकारयामास । उत्तरमप्राप्य स गृहान्त समविवेश, ददर्श च सुषुप्तावस्थाया समग्र परिवारम् । पोटलिकामपि पार्श्ववर्तिनी दृष्टवती सा । दृष्ट्वैतत् खलु साध्वस गता सा । ततश्च तया प्रातिवेशिका आकारिता । क्षणाऽभ्यन्तर एव तत्र जनसम्मर्द सजात । अनेन कश्चिद् व्याघात इव सजनित तस्य परिवारस्य निद्रायाम् । चक्षुषी समुन्मील्य तेऽपश्यन् सर्वान् खलु परित स्थितान् । दृश्येनानेन समग्र एव परिवार त्रपया समाक्रान्त ।

किमद्य शयनमेव विधीयतेऽपराह्न यावत् ? किमर्थं चैषा पोटलिका ? गमन तु नेष्यते भवद्भि कुत्रापि ? प्रश्नाना वर्षैव कृता पार्श्ववर्तिन्या तया ।

"न जिगमिषाम कुत्राऽपि ।" समुदीरित धौकलेन ।

'परमेषा पोटलिका तु स्वल्पयन सर्वमेव खण्डयति ।" सा स्वनु तर्जनेनाऽ-तर्जयत् सतल्पमिव गृहपतिम् ।

न किमसम्यक्त्याहितमिति कृत्वा प्रातिवेशिकास्तु शनै शनै तत्रतो बहिर्जग्मु, पर सा प्रतिवेशिनी नाऽमुञ्चत तान् सर्वान् । इतस्ततो दृष्टिं निक्षिप्य तया ज्ञात परिवारस्याऽनशनम् । ततस्तु सा सत्वरमेव स्वगृह गत्वाऽन्नचूर्णादिकमानितवा ।

परं यदा सा पाकक्रियायै वह्निमज्वालयितुमारेभे तदा राधया समुत्थाय स्वयमेव पाककार्यं प्रारब्धम् । दृष्ट्वैतत् प्रतिवेशिनी दम्पत्योः पार्श्वं समुपाविशत् ।

"श्रुतं किं भवद्भ्यां यद् ग्रामाध्यक्षस्य पुत्रो व्यापादितः ?" भणितं तया ।

"किम् ? किम् ?" जाग्रताविव बभूवतुर्दम्पती ।

"अर्धबोधे काले केचन दस्यवो ग्रामाध्यक्षस्य गृहे बलात् प्राविशन्, शयानं च तस्य पुत्रं यष्टिकाप्रहारैरघ्नन् । अन्यांश्च न किमपि कथयित्वा गृहाद् बहिर्निर्गत्य कुत्रापि व्यलीयन्त । ततस्तु महान् खलु कोलाहलस्तत्र समजायत । कथं नाऽशृणुत यूयमेनम् ?"

"वयं तु गहननिद्रामसेवामहि । कथं च बुभुक्षिताः खलु जागरणं विदध्युः ?" चातुर्यं प्रकटीचकार धौकलः ।

श्रुत्वैतत् न कोऽपि सन्देहो जनिं लेभे प्रतिवेशिन्या मनसि । सा तु पाककार्ये सम्पन्ने सति कार्यव्याजेन स्वगृहं प्रतस्थे । तस्या निर्गमनेन समग्रः परिवारः समुच्छ्वासमिव लेभे । आहारं समाप्य ते सुखमासत । स्थितिनिर्परिवर्तनमालक्ष्य च तैर्ग्रामपरित्यागस्य निर्णयः सर्वथैव त्यक्तः । न काऽपि बाधा पुनर्जनिष्यते, इत्येव समचिन्तयन् ते ।

कतिपये दिवसा व्यतीताः खलु । न किमप्यसामान्यमजनि तत्र । परमेकदा आरक्षिणः समाययुस्तस्मिन् ग्रामे हत्यायाः सम्बन्धे । सर्वे ग्रामवासिनस्तैराहूताः पृष्टाश्च रहस्योद्घाटनाय । निहतस्य जीवनीमभिलक्ष्याऽपि केचन जना रहसि आकारिताः । आरक्षिभिः समाश्वासनमवाप्य ते खलु मृतस्य कलुषितं जीवनं साकल्येनोद्घाटयामासुः । श्रुत्वैतदारक्षिणः स्तब्धा इव समजायन्त ।

"किं हत्यायाः पूर्वस्मिन् दिवसे किमपि कुचेष्टितमासीत् निहतेन तेन ?" जिज्ञासां कृतवान् कोऽप्यारक्षी ।

तत्तु न जाने । परमेका युवतिस्तेनोत्पीडितेव सम्भाव्यते । यतो हि सा कार्यं मध्य एव परित्यज्य स्वगेहं गतवती । न च सा प्रत्यागता तत्र श्रमकार्याय ।" स्मृतं खलु केनाऽपि प्रेक्षकेण ।

ततश्च राधा समाहूता पृच्छार्थम् । आरक्षिवर्गं दृष्ट्वा तु सा भृशमवेपत ।

पितृभ्यां निर्दिष्टा सा सत्यमुद्घाटयितुं प्रस्तुता नाऽऽसीत् परमारक्षिणां चातुर्येण तर्जनेन च विवशेव सा समग्रमेव घटनाचक्रं न शशाक गोप्तुम्। श्रुत्वैतत् आरक्षिणस्तेऽभिनवायां दिशि स्वकीयमन्वेषणमारेभुः। परं न साफल्यमापुस्ते। राधाया कथनं पितृभ्यां सम्पुष्टमासीत्। अत एव न खलु तदविश्वसनीयमारक्षिणा कृते।

अधुनाऽपि हन्तृणामन्वेषणं क्रियते परं तेषामभिज्ञानमद्याप्य- विज्ञातमेव वर्तते। हताशा इव दृश्यन्ते समस्ता आरक्षिणः। सपरिवारं धौंकलोऽपि न जानात्य- द्यापि घातकानां नामानि न च स्मरति तेषामाकृतिविशेषम्। परं कृतोपकारस्त्वा- सीदेव सः, यतो हि तैरेव विवशीकृतः स परिवारेण सह स्वगेहं प्रत्यागन्तुमक्षमत। आशास्तेऽधुना सः —

'गुप्तं रक्षेद्धि गुप्तता।"

भाटकभवनम्

विश्वनाथ मिश्र

दिल्लीनगर्यां भाटकस्य यस्मिन् भवने मे निवासस्तस्य महिमा अनिर्वचनीयः । अत्यन्तं कठिनो परिवर्तनस्य स्वरूपम् । वस्तुतो न भवनमिदं तादृशं भवति जलबिन्दुना यत्र पदे पदे स्खलनं पतनं च स्वाभाविकम् । शीतकाले तु किञ्चित्ताजन्यशैत्यादिविधानं प्रचुरमाच्छादने सत्यपि दन्तानां कटकटायमानता पाकशैत्यवशक्या । ग्रीष्मकालस्य तु कथैवान्या । महता यत्नेन कथं कथमपि क्षणमिह विश्रम्यताम् क्षणानन्तरं तु कथमिह स्थातुमिति चिन्तनीयो विषयः ।

देहल्यां स्थानप्राप्तिः कठिनेति उपलब्धेऽस्मिन् भवने आसीन्मे महती प्रसन्नता । विचारितं मयाऽस्मि- न् श्रेष्ठस्थाने । अत्रैवायास्यति मे गृहिणी । गृहस्य सर्वाण्युपकरणान्यानीतान्यमुनेन वनिता । किन्तु अत्रागमनादेव भवनाद् उद्विग्न सर्वाणि वस्तूनि निरीक्षमाणस्तु गतोऽस्मि ।

मम गृहस्वामी नाम्ना मायापतिः । यथा नाम तथा गुण इत्याभाणकस्य सत्यापनमोदीयान् । प्राक् गमस्थानसमाधाने प्रपञ्च उपाश्रीयत तेन । न च समाधीयते किमपि कदापि । स मम द्वितीय दिनाङ्के भाटकं ग्रहीतुमागते तस्मिन्, भवति मे वाग्युद्धं तेनसह । मयोच्यते द्वितीयदिनाङ्कस्यागमन एव विलम्बो ननु भवतामागमनेऽपि । यदि कथञ्चित् भवान् स्थाने भाटकदाता तदा त्वयाऽनुभूतं स्यात् भवनस्वामित्वस्य निरर्थकत्वमस्य गृहस्य कष्टम् । श्रुत्वा मदीयं वच स्मयमानोऽसौ कथयति– अहो बलीयसी भगवन्माया यथा भूतोऽहं गृहस्वामी, भवांश्च भाटकदाता । उक्त्वा चैवं निर्गतोऽसौ । वस्तुतो गृहमिदं भवति जलविहीनमित्युक्ते सति तदुत्तरं भवति इदं तु अतीव समीचीनं यत् तदानीं जलाहरणस्य कष्टमपि त्वया सोढव्यं न भवति ।

इदानीमेतया युवत्या सह चलति मे प्रणयसम्बन्धः । साचोत्कण्ठिता मया सह परिणेतुम् । तत् पूर्वं वाञ्छति चासौ दर्शनं मदीयभवनस्य । तदीयसमीहा-

पुरतोऽहं सर्वथैवासमर्थः । न ज्ञातवान् मम भवनम् । दृष्ट्वा चैतद् किं कथयि-ष्यन्ति जनाः ? कन्याया अपि विवाहो सुन्दरया कन्याया विमलतायमानया स्वामिनी दृष्ट्वा मदीयं भवनम् । एवं प्रकारिकया विभीषिकया ग्रस्तोऽहं तया वारम्वारं कथ्यमानोऽपि नायमवसरो मम भवनदर्शनाय । अन्यस्मिन् दर्शयिष्यामि तद्दिनं यथावसरम् ।

एकस्मिन् दिने प्रातरेव गृहस्वामिनः सकाशं गतोऽहम् । स चासन्दिकामासीनः समाचारपत्रं पठन्नासीत् । अवलोकयन्नपि मामसौ मामपश्यन्तमिव प्रत्यपादयत् । तस्यैवमभिनयं दृष्ट्वा मयोक्तम्—

अहमागतोऽस्मि

वादम् । आगम्यतामित्युक्तं तेन ।

ममास्त्येको विक्षेपः ।

कथ्यताम्

भवतो गृहं नैतादृशं यत्राहं स्थातुं शक्नुयाम् ।

एवञ्च तर्हि अन्यत्र गम्यताम् ।

अन्यत्र गमनस्य वार्ता नास्ति किन्तु समस्या त्वियमस्ति यत् मम विवाहं सम्पादयमानो वर्ते ।

ममापि विवाहोऽनेनैवाभूत् ।

तस्मिन् समये मन्ये न स्यात् एतादृशी स्थितिरस्य गृहस्य ।

स्नोऽपि दयनीया ।

अनेनैव न स्यात् सम्पन्नः त्वदीयो विवाहः ।

श्रुत्वा चेदं मदीयं वाक्यं नेत्रे विस्फार्य अवलोकयन् माम्, उत्थायोक्तं तेन— किमुच्यते त्वया ? तव वयः समानवयस्का तु मदीया कन्या वर्तते । सौदामिनि ! सौदामिनि ? इत आगम्यताम् ? इत आगम्यताम् ? इति शब्दायितं तेन । क्षणान्तरमवायाता सौदामिनी । दृश्यताम् ? इयमस्ति मे कन्या सौदामिनी । स्थितो वास्या वयः व्यतीतं त्वया यत् तव विवाहो न सम्पन्न इति ?

अहञ्च तूष्णीं स्थितः सौदामिनीं विद्युत् निरीक्षमाणः एवाहम् । तदनु तामवलोकयन्तं मां प्रत्युवाच हे—सौदामिनि ! गन्तुमनीषस्त्वम् अधुना

सौदामिनी । अट्टहासं स्वस्य कुर्वन्नवोचम्– नातिदूरं तद्दिनं यदा मे विवाहः सम्पत्ता ।

तेन किम्? अस्मिन्नेव गृहे सम्पन्ना नैके विवाहा मया? इत्युक्तं तेन ।

यदि भवता अस्य गृहस्य परिष्कारः क्रियेत तदा वरम् ।
किम्? परिष्कारेण गृहमिदं स्वर्गतां यास्यति? ।

अत्र विवादेनानेन सहनि विचार्याहमुपायागतः ।

अष्टौ दिनानि व्यतीतानि । । मम भाविन्या पत्न्या समीहृग बधमानं-चासीत् यत् दर्शनमदनं ममत्वनोऽस्य शीघ्रतया सम्पादनीयो विवाहः । इदानीं सभैधत मे दैन्यम् । कथमिव कृतामया मिथ्या स्वप्रशंसा? 'सर्वसाधनसम्पन्नं भव्यं सदनं मे निवासः' । तत्र विराजन्ते नैके गवाक्षाः । वातायनं बहुलं परिलसितं शीत ताप-निवारणं मे भवनं सर्वं सुखदं प्रियदर्शनञ्चास्ते' । श्रुत्वा च प्रशंसां ममगृहस्य स्मेराननां मे भाविनीदयिता । गृहस्य चास्य रहितमेव परिज्ञानं यत् मया सह प्रणय-सम्बन्धात् प्राक् आसीदसौ अन्यासक्ता । तेन सह तस्याः विवाहोऽपि निश्चितः । युवकोऽसौ कस्मिंश्चिद् कार्यालये कार्यं कुर्वाणो वर्तते । अनुपलब्धभवनो कस्यचिन्मि-त्रस्य गृहे कृतवसतिर्गतो निरन्तरमितस्ततो भाटकगृहान्वेषणपरायणोऽपि यदा न शशाक भवनमुपलब्धुं तदा तेन सह सम्बन्धस्तस्याः प्रणयसम्बन्धः । सा प्रत्यनुरागार्द्रे समय-कालमेव जिज्ञासितं तया यन्मम सकाशे किमपि गृहमस्ति न वेति? प्रश्नमिम-मुत्तरयता मया विहितो स्वभवनस्याकृतिमेव व्याख्येयं तस्याः प्रसन्नता स्वाभाविकी ।

ममगृहस्य दर्शनमिव मम प्रेयस्याः साहसमप्यपूर्वम् । एकस्मिन् दिनेऽ-कस्मात् समायाताऽसौ मदीयभवनम् । तस्मिन् समयेऽहं तत्र गृहे सद्यो जायमानस्य नवीन-गर्तस्य मूषकमन्वेषणं कुर्वन्नासम् । इदं तस्याः अतर्कितागमनं जातं मे काकतालीय-न्यायप्रयोजकम् । उक्तं तया–अस्मिन्नेव गृहे निवससि? श्रुत्वा चेमं प्रश्नं मम सन्त्रासात्स्वेदबिन्दवोऽजायन्त कुसुमेदीनं शरीरम् । जिह्वा च शुष्कतामगात् । गिरश्च स्खलिता । उत्तरणीयं किमपीति विचार्य स्खलद्गिरा मयोक्तम्— नोपलभ्यते कुत्रापि समीचीनं भवनम् । यद्युपलभ्यतेऽपि किमप्यन्यद् गृहं चेत् तद्दिनोऽपि भ्रष्टम् । स्याद्यदि कथञ्चित् परिष्कारोऽस्य तदेदमेव भवनमनुपमं स्यात् । श्रुत्वा चैतन्नोक्तं तया किमपि । परं तस्याः मनसि सञ्जातं उत्कण्ठा इत्यनुभूतं मया । सा यावदन्तरति मध्येकक्षं तावदेकः स्थूलो मूषको प्रधावन् समागतः पादयोः प्रणिपातमिवाचरन् स्पृष्ट्वा तदीयौ पादौ अपलायितश्च । सा चोच्चैः शब्दायमाना

कम्पमाना च वचः कथमप्यवदत्। मया विहस्योक्तम् इमे मूषका एवैतावन्तो मे सहचराः। तव गृहे ईदृशाः स्थूलाः सन्त्याखवः ? एवमुक्तवा यावत्तया निहितो हस्तो भित्तौ तावत् भित्तेरेव स्थूलास्तरस्ततः पृथग् भूत्वा भूमौ पतितः। अयञ्चापरो विस्फोटो मम नवजीवनस्य कृते।

तत्रैवैवंविपरीतं पश्यामि यथा चित्रितं गृहस्थस्य त्वयेत्यवोचत् सा। लज्जया दीनतया व्यग्रतया च गृहीतवाग् नीतोऽहं दीर्घकालिकं मौनव्रतमपहायावोचम्— मा भैषीः प्रिये ? विवाहात् पूर्वमेव परिष्कृतमिदं भवनं मनोज्ञनिवासकल्पमवलोकयिष्यसि। सर्वसाधनसम्पन्ननिःशङ्केऽत्र भवने मूषकाः प्रेतामानोऽपि नावलोकयिष्यन्ते का खलु कथा वराकानामाखूनाम्। श्रुत्वा मदीयं वचः किमपि हृदयमनुनयदिव भृशं विश्वास्यायितमिति व्याहृत्य तडिदिवापगता सा।

गृहस्वामिनं मायापतेरिच्छा परिवर्तयितुं सर्वो मे प्रयासो विफलः। एकदा तु भृङ्गारोऽप्यस्य मद्गृहात् बहिः सारितः। फलस्वरूपं कतिपयदिवसव्यापिनी खञ्जता मामितरामपदत्।

एकस्मिन् दिने तस्य कन्या सौदामिनी प्रसन्नमना लघु लघु गच्छन्ती मध्येमार्गं सम्मिलिता। प्रगल्भप्रश्नेन तया कारणं पृष्टा सा अकथयत् यदस्याः विवाहः शीघ्रमेव सम्पत्स्यमानो वर्तते। वरश्च ममाभिरोपितः। मया च तस्य युवकस्य नाम सङ्केतादिकं सर्वं ततः परिज्ञातम्। सागृता मे मनसि प्रतिशोधभावना। सौदामिन्याः भाविनः पत्युः सकाशं लिखितानि मया पत्राणि यत् यो विवाहस्त्वयास्वीकृतः कन्यायाः पितरमपि भास्करनामकं जानास्यम्। तव श्वशुरो यथा नाम तथा गुणतोऽस्ति। सौभाग्यं तु तस्य पराकाष्ठैव नाम्ने। सर्वाणि च तस्य गृहाणि बन्धकरूपेण दत्तानि वर्तन्ते। ये च भाटकदातारो यत्र कुत्रापि तस्य गृहेषु निवसन्ति, तैः सार्धं तस्य दैनन्दिनं कलहः। एवमपि श्रूयते यदसौ सर्वाणि विक्रीय तव शिरसि स्थास्यति। अहमस्मि तवैव शुभेच्छुः। पत्राणि विलिख्य नूनं मत्र यास्यति कश्चन चमत्कार इति स्वस्थमना अहमतिष्ठम्।

इतो मम प्रेयस्या सह मे सम्मेलनं पत्रपर्यन्तमेवावशिष्टम्। अन्तिमपत्रे मयालिखितं यत् मनस्कोपरि, मम मारकभवनोपरि च त्वया ध्यानं न दत्तम्। किन्तु ध्यानं तु त्वया केवलं मदापर्यैव दत्तम्। कृपा विधेया मयि। दयस्व, दयस्व, यतो यथा परिणयो निर्विघ्नं सम्पद्येत। एवं ज्योतिर्विदा कथितं यत् मम ग्रहाः शनैः शनैरनुकूलतामुपयान्ति। किञ्चित् मासानन्तरं द्विभूमे प्रासादे मेलनं निश्चितम्।

पञ्चदशदिनान्यतीतानि। मम गृहस्वामिनो गृहे आसीत् महान् जनसम्मर्दः। मया विचारितं स्यादेतत् कौतुकं मम पत्राणाम्। परं ममानुचिन्तनं वैपरीत्यमनुगतम्। आसीत् सा तत्परता सौदामिन्या विवाहस्य। अहमस्मिन्नेव तर्कवितर्के यावदवर्ते तावत् पत्रवाहकः पत्रमेकं प्रायच्छन्मे हस्ते। पत्रमासीन् मम प्रेयस्या। किमत्र निहितं स्यादिति शङ्कमानहृदयः पत्रं पर्यपठम्। तत्रलिखितमासीत्—तव नाटकभवनदर्शनानन्तरं त्वया सह वैवाहिको विचारः सर्वथैव त्यक्तः। क्षम्यताम्। प्रपठ्य पत्रमहं भूमौ न्यपीपतम्।

पङ्गुः

श्रीमती मञ्जु शर्मा एम. ए.

चिकित्सालयस्यैकः कक्षः । तदीये कस्मिंश्चित् कोणे काऽप्येका शय्या । तामधिशेते कश्चिदातुरः । न कोऽपि वरीवर्ति तत्पार्श्वे । अर्धं दाऽनीतः स शल्यचिकित्सार्थं । दूरस्थास्तत्सम्बन्धिनः । श्वः परश्वो वा समागच्छेयुस्ते । साम्प्रतं तु स एकान्तमेव भजते । बहुकालतस्तदीया दृष्टिः पाददिशि प्रसरति । नयनकोणात् प्रवहन्त्यश्रूणि यानि स न शिक्षते रोद्धुम् । नैव च स प्रयतते तानि प्रमार्ष्टुम् ।

अद्य प्रातः किमप्यचिन्तयत् सः । स्वानि भाग्यानि निर्णेतुं दृढप्रतिज्ञातमासीत् तेन । निर्णयस्तु सञ्जातः । परं सर्वथाऽनपेक्षितः खलु । नाऽज्ञासीत् स यत्तदीया प्रणयिनी न तोक्ष्यति तमधिकृत्य । कियन्तमनुरोधं कुर्यात् वराकः सः । परं सा नाऽतुष्यत् ।

"लक्ष्मि ! किं त्वया कोऽप्यन्योऽनुकम्पनीयः प्रणयो ना ?"
पृष्टमासीत् तेन ।

"न कोऽपि ।" सहजभावेन समुदीरितं तया । नासीत् प्रवञ्चनालेशोऽपि वचसि तस्याः ।

"ततो मां परिणेतुं कथं न समुत्सहसे ?"

"कारणानि तु नैव विद्यन्ते । परं मम बान्धवैरेष उद्वाहो नैवाऽनुमन्यते । अतः प्रतीक्षणीयमस्माभ्याम् ।"

"कीदृशी प्रतीक्षा ? द्वौ वर्षौ तु समतीतावस्यां प्रतीक्षायाम् न साम्प्रतमपि परिवर्तनं सन्दृश्यते तेषां विचार-सरण्याम् ।"

"किं करवाणि तावदहम् ? यथा मया, तथा त्वयाऽपि प्रतीक्षैव करणीया ? कियत्कालं यावत् ते मामनूढामेव द्रक्ष्यन्ति ?"

अनन्तराले यावत् क्षमा स्युश्च नं तत्परमम् । ९न्तु गुणत समाप्य
नग्य प्री कश रणा नर च कन्याना पतितनम । तीव्र स्वर कटुत्वमामिश्रित
मासीत् ।

अत्रैव तद् मान भज मा । समुद्दीत मा ? प्रणयिन सम्बन्धिषु वा ?
गति प्रणय नो नयममहिष्णुताया कृते । नाम्या तु भरयर महगाना शुभेच्छा ।
तस्मादे वीरेव समुद्वाह । कीदृश वामापि दाम्पत्यम् । पुत्रास्तु नव स्त्री
कुर्वति त यमनन त्वरामव भजन्त मत्रविधार्येपू न । मदर धावन्ति ता वार्यं
समभिलष्य प्रतिनिवर्तन्ते च त समाप्तौ क्षणमेव । पर किमथमया त्वया ? यौवन
तु न स्थास्यति चिरकालाय । किञ्चिन्मात्रं तु विचारणायमतन ।

'किमथ समुद्विग्नेव सजाता ? पप्रच्छ स ।

नव तु । पर चिन्तयामि यत क परित्याज्य ? पितरौ त्वं वा ?
उभावपि क्लिश्लौ मन्यना घत्त । एवनस्तु पितृस्नेह स्पृहा मामनैव गृहस्थ च
तत्राप प्रम भगमानयति मा त्वदिशि । नैकतरस्याऽपि चयन सम्भवम । उभयोरेकतर
स्यापि पक्षस्य परित्याग तास्यति मा सततं मे । एतदेव चिन्तित मया । तास्मात
मर माग पदिश ।

अधुना तास्यायमरो निर्देशस्य समाश्रयस्य धा कन । अह न व म स्वय
मव वामय । नैव स्थास्यति च्व ग य प्रस्तावमद्य न्न । अपूर्ण
मवावमन नस्य वाक्यम् ।

तदा किम् ? वदनया राशिनात्मासीत तस्य वच ।

न यत किमपि । रेलयानाग्रे प्रपत्य प्राणान् त्यक्ष्यामि ।

ततात स्तब्ध समजायन सा । क्षण यावत् किमपि न निगदितं तया ।
प्रश्नमेव नाऽभ मे सा तदावरणाय । इत्थंमेव मरणवमाथ स्पृधा स कुमान
पृष्टवान ।

किमत तत्र निश्चयो परिवर्तनीय ? पृष्ट तया ।

आम् । उद्वाहाथ नैव प्रस्तुता सि चत्वम् ।

तया आत्मघात कृत्वा सति किं वर्धयिष्यति ? जना त्वा मां वा स्मरि
ष्यन्ति ? धिक्त्वं च त्वा प्रतीयते तस्या प्रश्न ।

"किमपि ब्रूयुस्ते । न चिन्तयामि तत् सर्वथैव । अन्यच्च न जनैरुदीरितं किमपि वचः स्प्रक्ष्यति मृतं जनम् । अतः त्यजैनं प्रश्नम् ।" तस्य कथने कोऽपि निश्चय आभासते स्म ।

"परं मत्कृते तु चिन्तय तावत्" पीडितेवाऽदृश्यत सा ।

"तत्खलु त्वयैव चिन्तनीयम् ।"

तदनन्तरं न किमपि निगदितं लक्ष्म्या । क्षणं यावत् प्रतीक्ष्य उत्तस्थौ सः । तदापि सा मूकत्वं नाऽत्यजत् । न च निरुद्धवती तथा निष्क्रमणतः प्रियस्य मार्गं । अश्रूणि तु सततं प्रवहन्ति स्म तस्याः नयनाभ्याम् ।

निराकृतमात्मानमनुभूय स शोकाकुल इव समजायत । बहिरागत्य द्विचक्रिकामारुह्य च वाष्पयानमार्गं प्रतिप्राऽचलत् स । दृष्ट्वा तु तस्य गतिविस्खलनं तदीयोद्भ्रान्तता समुद्घाटितेवासीत् । मार्गे च नैवोपलक्षितास्तेन नमस्कारं कुर्वन्तो जनाः । आत्महननाय कृतसंकल्पः स विचारशून्य इवाऽभाति स्म ।

शनैः शनैर्द्विचक्रिकां प्रचालयन् स समग्रमेव नगरं समुल्लङ्घयामास । ततश्च स एतादृशे स्थले आजगाम यत्र लौहमार्गं किञ्चित् परिभ्रमति । तत् स्थलं सर्वथा निर्जनमासीत् । वर्जनार्थं न कोऽप्यवर्तत तत्र । तदीयो विवेकस्तु पूर्वमेव तत्याज तम् ।

इतस्ततो दृष्टिपातं विधाय स द्विचक्रिकामेकतः पर्यत्यजत् । ततश्च स शनैः शनैर्दूरतरं पदयात्रैर्लौहमार्गस्यान्तिके समागत्य अवातिष्ठत । अधुना वाष्पयानस्य न कोऽपि ध्वनिस्तत्राऽश्रूयत परं तत्प्रचलनजनितं किमपि प्रकम्पनं तु स्पष्टमेवानुभूयते स्म । तदनुसारं नाऽधिको विलम्ब आसीत् तदागमने । प्रतीक्षमाणः किं कुर्यादिति विचिन्तयन्नेव स चोलस्य कोषाद् रिक्तमेकं पत्रं लेखनीं च समुद्धृत्यैतल्लिलेख —

"एतदात्मघातकृते न कोऽप्यन्य उत्तरदायी । जीवनात् सर्वथा निराशोऽहं स्वेच्छया प्राणान् त्यजामि । एतच्च सर्वथा सज्ञ एव लिखामि । सुरेश"

तत्पत्रं चोलस्य कोषे विन्यस्य स एकतः स्थित्वा एकाग्रतया वाष्पयानागमनं प्रतीक्षयामास । किञ्चित्कालानन्तरं धरा-प्रकम्पनं ववृधे । साधनं ध्वनिश्च मुखरतामादधौ । श्रुत्वाऽप्येतत् सर्वं न स स्वस्थानात् परिचचाल । बिभीषिकया भावान्वितोऽपि नाऽदृश्यत स । स्पष्टमेव स मृत्योरङ्गीकाराय प्रस्तुत आसीत् ।

साम्प्रतं यानागमनं निरन्तरमाभाति स्म । धराप्रकम्पनेनैको भयावहो विरावः तत्र कर्णास्फोटनमिव सञ्जनयति स्म । परं सुरेशस्य मुखमुद्रया न प्रतीयते स्मैतदपि विरोधिता तद् विचारवीथी । तेन प्रक्षिप्ता स्वीया दृष्टिर्यानागमनदिशि । विज्ञाय च तदागमनक्षणं स सत्वरमेव लोहमार्गं शय्यामिव विधाय तदुपरि स्वदेहमतनिष्ट । भयविमुक्तये च स निमीलयामास स्वनेत्रे । एवं स्थितेन तेन शवसाम्यमिवादधौ ।

मार्गपरिभ्रममालक्ष्य वाहकेन पौनःपुन्येन शीघ्रं ध्वनिरुत्पादिता । न सम्प्रधारितं पूर्वं तस्तेन यत् कोऽपि मुमूर्षुर्जनस्तत्र वाष्पयानस्य मार्गे शलाकयोरुपरि शेते परं क्षणाभ्यन्तर एव स निभालयामास व्यक्तिमेकां तत्स्थिताम् । तत्क्षणमेव स यानगतिं भृशमरोत्सीत् परं वेगबाहुल्यवशादकस्मात् तदवरोधोऽशक्य आसीत् ।

तदैव 'आः' इत्युच्चैराक्रन्दनमश्रूयत । दुर्घटना तु नैव निवारितेति सम्प्रधार्य वाहकेन यानस्य गतिः सर्वथैवावरुद्धा । ततश्च सद्य एव स नीचैरवततार । केचन यात्रिणोऽप्यौत्सुक्यवशाद् निजासनानि परित्यज्य दुर्घटनास्थले आजग्मुः । दृष्टं च तैः सर्वं दुर्घटनास्थलं रक्तेनाऽऽप्लावितम् ।

सुरेशस्तु सप्राण एवासीत् । परं यानाग्रभागस्य तीव्रेण प्रहारेण तदीयावुभावपि पादौ छिन्नावास्ताम् । छिन्नस्थलाभ्यामसृक् प्रवहति स्म सातत्येन । वेदनया समाक्रान्तोऽपि सुरेशो मन्दं मन्दमवाक्रन्दत् । तदैव यानस्य रक्षिता तत्राऽऽजगाम । तेन प्राथमिकोपचारपेटिकाऽपि सहैवानीता । परं दुर्घटनाया गाम्भीर्यं दृष्ट्वा नैवोद्घाटिता सा पेटिका तेन । छिन्नस्थानयोरावेष्टनं त्ववश्यमेव कृतवान् स प्रभूताभिर्वस्त्रपट्टिकाभिः ।

'सत्वरमानयैनं शकटस्याभ्यन्तरे । त्वरस्व च वाष्पयानम् । यानस्तम्भस्थले कोऽपि चिकित्सक उपलभ्यः । तदधीनं चास्य समुचिता चिकित्सा ।' इति निर्दिदेश यानवाहकः सः ।

चिकित्सकेनाऽपि स्थितेर्गाम्भीर्यं सद्य एवाकलितम् । सत्वरमेव स मुख्यचिकित्सालयं नियतमातुरम् । एतदभ्यन्तरेऽजस्रं क्षरता प्रवाहेण सुरेशो निस्तेजस्तामाप । सत्राणमवाप्य तु स आसीत् तस्मिन् कक्षे प्राणरक्षायाः शय्यायां प्रनष्टमानमवैक्षत । 'प्राणान्तस्तु न बभूव' इत्यवधार्य स भृशमस्पन्दत् । स्वानि भाग्यान्यपि बहुशो गर्हयत स । तेन तु मृत्युर्वृताऽऽसीत् परं मृत्युसमभिशप्तमिव जनं नावृणोत् ।

अधुना किं कुर्यात् वराकः सः ? कथमेषा दुर्घटना व्याख्येया सुहृज्जनानां बान्धवानां च समक्षम् ? लक्ष्मीश्च । नहि, नहि, तस्यास्तु स्मृतिरपि भृशमरुन्तुदा । अधुना तु तस्याः कथैव समाप्तिमगमत् ।

एवं चिन्तयतः सुरेशस्य समवधानं कर्णेजपस्य ध्वनिना आकृष्टम् । अक्ष्णी समुन्मील्य स तद्दिशि दृष्टिं चिक्षेप । तदीया ससज्ञता विज्ञायैक आरक्षिजनस्तदन्तिकमागच्छत् ।

"ससंज्ञोऽसि किम् ?" तेन पृष्टम् ।

"आम् ।"

"किमभिधानं भवतः ?"

"सुरेशः ।"

"कस्मिन् विभागे व्यापृतोऽसि ?"

" विभागे राजपत्रितं मम पदम् ।"

"ब्रूहि तावत् किमर्थमेष आत्मघातस्य प्रयासः ?"

आरक्षिणः स्वरे किमपि मार्दवमागतम् ।

"जिजीविषा मां परित्यक्तवती, इत्येव जानीहि ।"

"न जानासि किं दण्डनीयोऽसि प्रयासायैतादृशे ।"

"नाऽविज्ञानमेतत् परं नाऽज्ञानाग्रहः प्रदेयः प्रयासः विफलतामेष्यति । साम्प्रतं तवाधीनोऽस्मि । यदिच्छसि तत् कुरु । प्रयतस्व तावद् मदर्थं प्राणदण्डाय । अधुना तु मृत्युरेव समधिकं काम्या ।"

"सुरेशस्य मनःस्थितिमनुमीय नाधिकं पृष्टं तेनाऽऽरक्षिणा । पुनरागमिष्यामि" इति कथयित्वा क्षणो बहिर्गतः सः । सुरेशश्च पुनरेकान्तमेव सिषेवे । समग्रं जीवनं पङ्गुभावेनैव यापनीयमिति विचिन्त्य स दारुणं दशमनुबभूव । जीवनं तु सर्वथैव पराश्रितं भविष्यति, दयनीयता चाऽवहिष्यति । एतया विचारणया स भृशमपीडत । आजीविकाऽपि गतैव प्रतीयते । मित्राणि किमर्थमागमिष्यन्ति ? बान्धवास्तु सत्वरमेव परित्यक्ष्यन्ति माम् । तदा किं भिक्षावृत्तिराचरणीया ? अन्तिमेनानेन चिन्तनेन स न केवलं मनसा, अपि तु देहेनापि कम्पननृत्यमिव समाचरत् ।

आतुरालये नियमशः तेन त्रयो मासाः यापिताः । अस्मिन्नवधौ प्रायः

सर्वे बान्धवाः सुहृदश्च तं दृष्टुं समाययुस्तत्र। वार्द्धक्येन जर्जरीभूतौ पितरावपि पुत्रस्नेहेनागच्छताम्। सुतस्य छिन्नौ पादौ दृष्ट्वा तु तौ मूर्च्छिताविव सञ्जातौ। परं किं कुर्यातां तौ वराकौ। बहुशः प्रवाहितानि ताभ्यामश्रूणि। दिवसद्वयानन्तरं च पुनः स्वभाग्यायत्तं परित्यज्य स्वनिलयं परावर्तितावुभावपि तौ।

सुरेशोऽपि पित्रोर्वेदनां सोढुं न पारयामास। तयोः समक्षं स आत्मनो मौढ्यं स्वीचकार। वृद्धावस्थायां तयोः सेवार्थं न कोऽप्यविद्यत साम्प्रतमिति परितापेनाऽपि स भृशं प्रपीडितः। आत्मघातार्थं विहितस्य प्रयासस्य वास्तविकं कारणं तु तेन नैवो-द्घाटितं तयोः पुरतः। एतादृशे प्रसङ्गे समुपस्थिते सति भृशमत्रपत सः। सत्यमेव तस्याः स्मरणमात्रेण स क्रन्दितुमैच्छत्। यस्याः कृते स प्राणानपि तृणमिवाऽमन्यत सा खल्वेकवारमपि तत्सन्निधौ नागतवती। सम्भवं किं यदेनां दुर्घटनां नाऽशृणोत् सा? श्रवणानन्तरमपि या न समागच्छेत्, सा किं प्रेम्णोऽधिकारिणी? किं तस्याः कृते प्राणान्तं विधातुमैच्छत् सः?

सुरेशस्त्वेतैः प्रश्नैर्वारम्वारं व्यथते स्म। निद्राऽपि पलायितेव। तदभावे-ऽङ्गान्यपि बहुशोऽशुष्यन्। कृशत्वं गतस्तदीयो देहः सततमवेपत। परं स चिन्तितो नासीदस्मिन् विषये। देहविषयको मोहस्तु पूर्वमेव तस्याऽत्रुटत् अमनः किमवशिष्ट-मस्मिन् जीवने यत्कृते स देहध्वंसं रुन्ध्यात्? अस्यां दुरवस्थायां तु देहत्यागः वरीय इत्यचिन्तयत् सः।

श्वः चिकित्सालयान्मुक्तिर्भविष्यति इति विचिन्त्य सुरेशः स्वकार्यक्रमं चिन्तयति स्म। सुहृदां प्रयासैरात्मघातविषये न कोऽप्यभियोगः प्रस्तुतीकृतः आरक्षि-भिरिति कृत्वा स स्वकीयं पदं पुनर्ग्रहीतुं सक्षम आसीत्। गमनागमने किञ्चिद-सौकर्यं भविता, परं तत्खलु कथमप्यतिक्रमणीयम्, इति विचिन्त्य स समाश्वस्त इव बभूव।

अधुना स चिकित्सकस्यागमनं प्रतीक्षते स्म। कार्यभारं पुनर्ग्रहीतुं सक्षम इत्येतत् प्रमाणपत्रं तु चिकित्सक एव प्रदास्यति। तदवाप्त्यनन्तरं स वाहनमानेतुं प्रार्थयिष्यति कमपि सेवकम्। गृहं गत्वा च यथाकथञ्चिज्जीवनं तु यापनीयमेवेति निर्धारितं तेन।

चिकित्सकः शनैः शनैरागच्छति स्म दृष्टिपथि। परमेश्वरी नाम्नी तु सा। काचन युवतिरपि तमन्वसरत्। साक्षाल्लक्ष्मीरिवाऽभाति स्म। आम्, सत्यमेवाऽभाति। ज्ञात्वैवैतत् स पार्श्वं परिवर्तितवान्। तां द्रष्टुं नेच्छति स।

"पश्य सुरेशमहाशय ! का आपत्तिर्यामानतुम् ?" चिकित्सक उवाच ।

"न शृणोषि किम् ? जाग्रतोऽसि न वा ?" पुनः पप्रच्छ सः ।

"न स्वपिमि ।" शनैरुक्तवान् सः ।

"शृणु तावत् । गृहगमनायाऽनुमतोऽसि त्वं मया । कार्यभारं पुनर्ग्रहीतुं सक्षमोऽस्मीति प्रमाणपत्रमपि गृहाण । एषा लक्ष्मीश्च त्वां कस्मिंश्चिद् वाहने गृहं नेष्यति । शुभास्ते पन्थानः सन्तु ।" इत्युक्त्वैतत् चिकित्सकस्तु प्रचलितः ।

"भगवन् महाभाग !" आकारयामास सुरेशः ।

"किं वक्तुकामोऽसि ?" पुनरागत्य चिकित्सकेन पृष्टम् ।

"एतया सह न जिगमिषामि ।" आक्रोशमिव प्रकटीचकार सः ।

"किमर्थमेषा आपत्तिः ? या खलु मासत्रयं यावत् प्रतिदिनमत्र समाजगाम त्वत्स्वास्थ्यसूचनामधिगन्तुम्, या च त्वयि सुप्ते सति त्वच्छय्याप्रान्तं स्वेच्छया न तत्याज, सैव त्वया तिरस्करणीया ? धन्योऽसि त्वम् । न प्रत्यक्षीकृतैतादृशी कृतघ्नता पूर्वं मया । बाढम्, कुरु यथेप्सितम् ।"

निर्भर्त्स्य तमेव चिकित्सकस्तु निष्क्रान्तः तस्मात् कक्षात् ।

सुरेशः पार्श्वपरिवर्तनं विधाय लक्ष्मीं प्रत्यभिज्ञातुमिवारेभे । सा तु मूकभावेनाश्रूणि विमुञ्चति स्म । दृष्ट्वैतत् सुरेशस्य समग्रोऽप्याक्रोशः सर्वथैव विगलितः । अश्रुबिन्दवश्च राजन्ते तदक्षिणोः ।

"अत्राऽऽगच्छ लक्ष्मि !" स्वरं मार्दवमिवाऽऽनीय प्रावोचत् सः ।

".. . . "

"नैवागमिष्यसि किम् ?"

"क्षम्यतां मां सुरेश !" कथयन्ती नतमस्तकैव सा तत्पार्श्वं समागच्छत् ।

तदनन्तरं च तया स्वमस्तकं तदीयोरःस्थले विन्यस्तम् । सगद्गदं रुदनमेव कृतवती सा बहुकालं यावत् । सुरेशस्तु मौनमाश्रित्य तस्याः मस्तकं स्वहस्ताभ्यामालिलिङ्ग ।

"आयाहि, गृहं यावः ।" कथमपि विमुच्यात्मानं तदीयात् परिरम्भणाज्जगाद सा । तमन्वेव सेवकमुपानेतुं प्रार्थयामास सा । उपलभ्य चानीत

अति तदुपरि सुरेशं समुपस्थाप्य सर्वेते चिकित्सालयस्य द्वारभागे समाययुः । वहिरमेकः पूर्वतोऽविद्यत तत्र । तमारुह्य सुरेशस्याऽऽवासं प्रति प्रातिष्ठेतामुभौ तौ ।

यदा सुरेशः स्वगृहाऽभ्यन्तरे प्राविशत्, तदा स विस्मित इवाऽजायत । समग्रं गृहं स्वच्छं सुसज्जितं चासीत् । बहुमूल्यानि कानिचिदभिनवानि वस्तून्यप्यविद्यन्त तत्र । एतद् दृष्ट्वा स्तम्भ इव सम्प्राप्ता तस्य वाक् । स तु स्वगृहं धूलिधूसरितमनुमीय लक्ष्मीं नाऽनेतुमैच्छत् तदन्त । परमेतत्त्वतर्कितमेव सदृश्यते स्म ।

'किमेतत् ?" विस्मयं प्रकटीचकार सुरेशः ।

'नहि किमपि । नवदम्पत्योरावयोर्योग्यं तु विधेयमेव गृहम् ।"

"नवदम्पत्योः ! किमावयोरुद्वाहः सम्पन्नः ?" वराकः स अप्रतिभ इवासीत्

"मया वृतोऽसि पतिरूपेण त्वम् । सन्ध्याकाले मम पितरौ पुरोहितादिना सह समागन्तारौ । तदैव प्रदेयाऽस्मि ताभ्याम् ।"

एतदुक्त्वा सा नवोढेव सलज्जता दधौ । सुरेशश्च केनाऽप्यनिर्वचनीयेन प्रहर्षेणाऽऽक्रान्तः सन् न किमपि वक्तुं पारयामास । स तु निर्निमेषदृष्ट्या प्रियतमामुखमेव प्रेक्षते स्म ।

स्मारकम्

चन्द्रमौलि

अद्य गान्धिजयन्ती पर्वास्ति । देशे विभिन्नरचनात्मकसमायोजनं सम्पाद्यमानमस्ति । समाजसेविसंस्थाः रोचककार्यक्रमाणां विनियोजनं कुर्वन्ति । स्वच्छताभियानमपि प्रचलन्ति । रामपुरग्रामे विशेषसज्जा वर्तते । तत्र प्रान्तीयदलितसंघस्याध्यक्षस्यागमनं निश्चितं वर्तते । सामाजिककार्यकर्तारः सर्वोदयविचारधारायाः प्रचारप्रसारयोः कृते समुदिता भवन्ति । ग्रामसभासमितौ चाग्रिमयोजनायाः रूपरेखा विधीयते । विशेषसाहाय्यवातावरणे अध्यक्षमहोदयस्यागमनं जातम् । स्वागतसत्कारयोरौपचारिकतायाः पश्चात् सभाकार्यवाही प्रारब्धा । अध्यक्षो जनतां सम्बोधयन्नवोचत् । 'कतिपयदशकेभ्यः वयं समाजसुधारस्य कार्ये संलग्नाः स्म, किन्तु तत्रांशिकसफलतैव लब्धा । अस्माकं गन्तव्यस्थानं दवीयो विभाति । पूज्यबापूः मार्गमदर्शयत् । तेनैव पथा अस्माभिः सर्वैः कार्यम् । सर्वं ज्ञातमस्ति यदस्मिन्नादर्शग्रामेऽद्यापि सवर्णानां हृदयपरिवर्तनं नो जातमस्ति । कूपे दलितास्पृश्यानामारोहणं निषिद्धम् । भेदभावस्य नीतिर्निरन्तरमवर्तत । सर्वेऽपि मार्गं अनिवार्यतानामुपयोगं कर्तुं शक्नुवन्ति । तत्र कस्यापि वर्गविशेषस्य नास्ति कोऽप्यधिकारः । इदं सत्यमस्ति, किन्तु सर्वाणि कार्याणि विधेयकद्वारा एव भवितुं नार्हन्ति । आवश्यकतास्ति यद्वयं समयस्य गतिं पश्येम । तदनुसारं च व्यवहरेम । अस्पृश्यतानिवारणं परमावश्यकं विधेयमस्ति । कूपं सवर्णाः महापवर्णाः अपि प्रभवेयुरारोढुम् । यदि साधारणेऽस्मिन्-विषये एव रूढिगतिकाः भवामः नहि राष्ट्रस्याग्रिमप्रगतौ कथं सहयोगं दातुं क्षमाः सम्भवेमहि । भवन्तः प्रतिज्ञां कुर्वन्तु । अस्य पावनपर्वणि शपथं कृत्वात्मशुद्धेः सङ्कल्पमपि विदधतु । "वयं परस्परभेदभावनां त्यक्ष्यामः । अस्मासु सवर्णासवर्णयोर्वा विभाजिकारेखा नो स्थास्यति ।"

१००९२३

सभापतेरोजःपूर्णभाषणस्योपस्थितजनतायामैन्द्रजालिकः प्रभावः पतितः । सर्वेऽस्मिन्नुत्थाय प्रतिज्ञातवन्तः । जनप्रतिनिधिः पं० कृष्णचन्द्रः आश्वासनं ददौ । वयमस्पृश्यतामवश्यमपनेष्यामः । त्रिवर्षान्ते तु ग्रामेऽस्मिन् कोऽपि अस्पृश्यो नाम नावशिष्यति ।

पूज्यबापूरूपां सत्यअहिंसाविजयनिमुपाहरिष्यामि। भवता कृपास्थान्। क एतादृशो विपरीतभाग्यो भविष्यति यो देशस्य प्रगतिं बाधिष्यते। वयं भवद्भिः सह देशसेवायां निशि वासितुं सदा सन्नद्धा स्मः।' प्रतिनिधिश्यामसैन्याध्यक्षस्य स तोषो जातः। सप्ताभ्यो न्यवादानुवितनार। 'महाभागाः श्री विजयसेनराम। भारतमाता जयतात्' हिजयनाम विजयतां प्रभृतिघोषैः सभा विसर्जिता।

ग्राम गोष्ठ्यां पं० कृष्णचन्द्रस्य प्रगतिविचारस्य चर्चा चलिता। तस्य साहसिककार्यस्यास्य प्रशंसा जनतारब्धा। पण्डितस्समति पदिस्फूर्तो विजयगता। चतुष्टरीग चतगामो वदन।

सत्यमिदमेव ज्ञायते। अस्मात्कथयन्ति ग्रामस्य स्पृश्यास्पृश्यव्यवस्थास्ति। कुत्र हरिजना आरोढुं नोत्सहन्ति। आलोचनास्वरेण ठा० हिम्मतसिंहस्तत्र लवण-मपोरयत।

जगतीदृशी अस्ति। कथयन्ति मिथ्याचरन्ति किमपि। इति मिर्जागिरः स्वमतिं प्राचीकटत्।

अद्यवधिरिप्त्वं प्रत्यक्षम्। किमत्र रहस्यम्? यदा कोऽपि नेता बहिरत्र आयाति तदा तस्य कथनमनुमोदते। चाटुकारितां च विदधाति। निर्द्वन्द्व स कथनो वदति— मह्यं धर्मं न रक्ष्याम नानाशयासश्च। किमपि मनाश्च चतुधुरीण आह्वानस्वरेऽचकथयत।

वाद निर्णयोऽवश्यमेव भविष्यति ठाकुरमान्य स्वराय भानयन् अस्थापयत्। मुरा एव जानाति समनुमतो न किमप्याचरति पण्डितस्य माया स एव जानाति। इति मिश्रा विशयहावभावेन स्व पुराकरोत।

सभाकार्यवाही सफलतया प्रमुदितः कृष्णचन्द्रोऽपि तत्रैवागतः। सर्वे वार्त्तालापे सन्नद्धाः। नैषनवीनास्थितिः पण्डितोऽदिवसं समितिकारान् इव स्वभावेन सहन्। अवसराव शान्तगम्भीरमुद्रया वक्तुमारभत।

भवन्तो न जानन्ति। सर्वस्य परिवर्तनं जातम्। अस्मिन्युगेऽपि एव गमनागमनस्यति य गीमानिर्देश मदु स्थानं। कुसङ्गीया साम्प्रदायिका भवति। चारित्रिकता प्रतारणा च धमनीषु सहोदिता सत्वेन स एव जीवितुं प्रभवति। मम भ्रातर! आगतेषु नवनृप तस्या एव सफलस्वकीयनीतं प्रयोगमाचरामि यथा न कश्च प्रतीदाति। ग्रामीणजनो ध चित्तमुपकम्पयति। त एवधनस्य

स्वामिन्। देशस्य सर्वथा सशक्ता कर्णधाराः। तं सत्कर्विरोधं कर्त्तुं न पार्यते, किन्तु तेषां प्रकारणः कर्त्तुं शक्यन्ते। तेषामसकालिकमरिष्यग्राह इवायन्ति सन्ति च। तत्र निमज्जनं नोचितकरम्, उन्मज्जनमेववरम्। विद्यालयभवनस्य, गोचरभूमेः, कूपजीर्णोद्धारस्य, पञ्चायतनभवनस्य कृते आर्थिकमहायता त एव ददति। तान्देवानांप्रियान् विहाय प्रवञ्चनं कृष्णचन्द्रस्यैवकार्यमास्ते। यदि भवन्तः साहाय्यमाचरिष्यन्ति, तदा तेषामत्र चरणाधानमेव नो सम्पत्स्यते। द्विदलञ्चलोपक्ष्यते। अस्पृश्यास्तु अस्पृश्या एवोत्पन्ना तथैवाजन्म भविष्यन्ति। अस्माकं स्वधर्मः प्राणप्रियः। तं केनापि मूल्येन विक्रेतुं नाभिलषाम। शास्त्रपुराणानामाज्ञा शिरोधार्यावर्तते। तेषामुद्धारं कदापि नाचरिष्याम। प्रतिज्ञास्तुकर्त्तुमेव भवन्ति। तथैवनियन्ते। कर्त्तुं तदेव भविष्यति यद्वयमभिलषाम। इमेनराका विश्वसन्ति यन्समाजसुधारो भवति। अयम् कर्णलाश्वो धावन्नागच्छति, सदाग्रेगमिष्यति।"

कृष्णचन्द्रस्यस्पष्टीकरणेन सर्वेप्रमोदमापुः। तस्य प्रत्युत्पन्नमतित्वं च प्रशमन्ति स्म। वृद्धनीतेर्लोहमन्यन्त। इमे चत्वारः पुरुषा एव ग्रामस्यप्रधानपुरुषा अभवन्। तेषामेव करणेन ग्रामस्य सर्वं कार्यंप्रचलति। ते प्रत्यजानन्। वयङ्कदापि-धर्मविरुद्धं कार्यंनाचरिष्याम। इत्थं सदेव पलाशस्य पत्त्रत्रयमवस्थितम्।

कृष्णचन्द्रः स्वकीयमेकाकिनं पुत्रं दयाराम पाठयितुं कामपिन्यूनतां नोचितवान्। यत्किमपि पञ्चायतनकर्मणापि बकवृत्त्योपार्जितं तत्सर्वं तदध्ययने विनियोजितम्। हस्तलाघवक्रियायामासीत्सपटुतमः। आयः पूर्णः आसीत्। दयारामस्य विद्याभ्यासः पूर्णतामगतोऽभवत्। तेन समाजशास्त्रे स्नातकोत्तर प्रमाणपत्रमासादितम्। तस्य विचारे परमोग्रतासीत्। स पितुः विरुद्धमेव विचारसरक्षन् तत्र समाजवादि विचारधारायां गभीरं रतः आरूढः। अत्रविषये पाश्चात्यविदुषां विचारमपि स आत्मसात् कृतवानासीत्। तद् विषये शोध प्रबन्धं विधाय "विद्यावाचस्पति" विद्यामुपाधिमासादितवान्। कृष्णचन्द्रस्यमहती चाशासीत् यद्राजकीयसेवामुरीकृत्य मम वार्धक्यस्यावलम्बनं भविष्यति। तेन तदर्थं देवतादेव्योपि मानिताः व्रतमाचरितम्। परमानवानां सर्वा मनःकामना कुत्र पूर्यन्ते।

दयारामः सत्यसमाजसेवको भूत्वा पितृकृतस्य पापस्य प्रायश्चित्तं कर्त्तुमिच्छति। नगरेस्थितः स समाजसुधारदिशि पूर्णरूपेण प्रसिद्धः जातः, किन्तु ग्रामीणाः तत्स्वरूपं नाजानन्। कृष्णचन्द्रस्यापि ज्ञानं नासीत् यत्तदाशायाः एकमात्र केन्द्रीभूतोदयारामः तस्मिन् दया नो करिष्यते।

मेघसिंहो दलितवर्गस्य महामन्त्री आसीत्। तस्मिन् समयसमाजसेवाया अग्रणी आसीत्। स च मेघसिंहस्तु कृष्णचन्द्रवत् प्रदर्शनं नेच्छति। अस्पृश्य आसीद्, स्वमस्पृश्यवर्गसमभ्यत। परिगणितजनजातयस्तं प्राणाधिकममन्यन्त। स स्वसमलीमास्थित रात्रौ भजनमगायत्। दुराचरणदुर्व्यसनत्यागायोपदेशमददात्। तस्य प्रयासस्य फलमिदं जातम्, यत् मेघवंशीया मद्यपानं मृतपशुमांसं भक्षणं तत्यजुः। सुरापानमपि शनैः शनैः पर्यहरन्। स्वच्छतामपि यथाशक्ति परिगृहीतवन्तः। मेघसिंहस्यैव द्वाजाग नव चरितमाप्ते। रात्रिपाठशालायामधीयते। प्रौढशिक्षा ग्रहणायोत्सुका जाता। शिक्षा तेषां जीवनस्याभिन्नमङ्गमजनि। ते स्वकीयश्रमदानेन रात्रिविद्यालयस्य भवनं निर्मितवन्तः। यो ग्रामः कदापि अस्वच्छतायाः पदं व्याधीनामालयं चाभवत् स एवाद्य स्वच्छताप्रधानः परिशोभते। इदमेव मेघसिंहस्य संघटनस्य फलमासीत्।

ग्रामस्य दक्षिणतोऽस्पृश्यानां वसतिरस्ति। अद्यापि गृहाणि कच्चानि च लिम्पितानि शोभमानानि दृश्यन्ते। तेषामाकृतिः कीटगृहमिव परन्तु जीविता प्राणिनो वर्तन्ते। अवकरस्य नामापि नासीत्। मृतपशूनामधुना कृते ग्रामाद्दूरे नियतस्थानम् सुरक्षितम्। तेषां चर्माणि उत्कृत्य तु पृथक्स्थानमानीयन्ते। सम्प्रति दुर्गन्धिभिः ग्रामस्य वातावरणं दूषितं नो जायते। ग्रामस्य मध्ये रामदेवस्य स्वच्छमन्दिरं विराजते। पूजारी तं पूजयति। आगतेभ्यो भक्तेभ्यो वितरति प्रसादम्। यत्र ते प्रसीदन्ति। बालकानां सम्मर्दः तत्र सदैव तिष्ठति। पूजारी अस्पृश्यजातीयोऽस्ति। स साक्षरोऽस्ति। यथावसरं बालकानध्यापयति। मन्दिरे प्रेरणाप्रदानि चित्राणि लम्बमानानि सन्ति। यानि दृष्ट्वा जीवनविषये सदाशा परिगृह्यते। मेघसिंहस्य स्वप्नं साकारं परिलक्ष्यते।

ग्रामेऽस्मिन्नेक एव कूपो राजकीयो विभाति। सर्वे ग्राम्याः तस्मादेव जीवनं लभन्ते। स्वपशूनपि जलं पाययन्ति। जलादानविषये यदाकदा संघर्षस्थितिर्जायते। परं मेघसिंहस्य कारणात् कदाप्यप्रियघटना नाजनिष्ट। असवर्णा इच्छन्ति यत् मेघसिंहस्याज्ञा भवेत्तर्हि वयं सर्वे कूपमाकृष्य जलमादातुं प्रभवामः। परन्तु मेघसिंहः सत्याग्रहमयो पुजारी अस्ति। हिंसायां विश्वासं नो करोति। अतः स्वजनान् संघर्षात् सदा दूरे स्थापयति। नवयुवकेषु सत्याग्रहः परन्तु विचारशीलता न भवति।

एकदिने युद्धस्य वातावरणं जातम्। संघर्षस्य स्थितिरागता। तदैव मेघसिंह आगत्य संघर्षमशामयत्।

कृष्णचन्द्रस्य निष्कृष्टनीतिज्ञतायाः अभिमानमासीत्। स परवचनमेव सफलतां मन्यते स्म। समाजसुधारस्य नाम्ना विपुलधनं शासनाद् आनीयते। चतुर्णाम् सहयोगेन तदात्मसात्करोति। तद्विपरीतं वक्तुं कस्य क्षमता? यदा मेघसिंहो विरोधमाचरति, तदा तस्य मारणस्य गुप्तपत्रं प्रेष्यते। परं सत्याग्रही कस्माद् बिभेति? मेघसिंहः स्वसिद्धान्ते दृढमान आसीत्। येन कृष्णचन्द्रः स्वापमानं निश्चिनोति। विरुद्धास्पृश्यानां कृते जलनिषेधाय तस्य रोषोऽजायत। यदा पापस्य घटः पूर्यते, तदाऽवसरेऽत्र स मेघसिंहं पराजेतुमियेष। ग्रामस्य सर्वे सवर्णाः तत्पक्षपातिन आसन्। केवलो दयारामस्तस्यानुयायी नासीत। तथापि प्रयत्नो जातः। सफलता न साधिता। स सिद्धान्तवादी सामाजिकः कार्यकर्त्ता अभवत्। स मेघसिंहस्य पक्षं जग्राह। तत्र दृश्यं नवीनमभवत्। नवीनमङ्कुरमागतम्। दयारामस्य निर्देशानुसारं कूपाज्जलमादातुं निश्चयो जातोऽस्पृश्यानाम्। म्रियमाणः किं न करोति? ते सपर्याय सन्नद्धा अजायन्त। मेघसिंहदयारामयोर्नेतृत्वे तत्समुदायः कूपे समुपस्थितः। परं पूर्वं तत्रैव कृष्णचन्द्रस्य मल्ला आयुधैः परिवारिता विद्यमाना आसन्। असयः कुन्ताः यष्टयः सर्वाणि अस्त्रशस्त्राणि तदन्तिके व्यराजन्त। मन्ये तस्यापि भयानकं युद्धस्य पूर्वाभ्यासोऽभवत्।

विलोक्य दयारामो वस्तुस्थितिं पर्यचिनोत्। सगर्जनमवोचत्— "भवतामयमन्यायोऽनुनीतो न चलिष्यति। युगपरिवर्तनं जातम्। समयानुसारं भवतामपि परिवर्तनमपेक्षितमास्ते। सावधाना भवन्तु। अत्याचारस्य युगमयं क्षयं स्पृहयति। पापस्य युगस्य प्रयोगेनासद्व्ययमेव जनिष्यते। सर्वोऽपि ग्रामो रक्तविषादं गमिष्यति। अस्माकं प्रगतिः सर्वथावरुद्धा जनिष्यते। वायुस्वप्नं साकारो नो सम्पत्स्यते। अन्यत्र क्षिपतास्त्राणि। कूपमुद्घाटयत सर्वासवर्णेभ्यः। पशुता नैव श्रेयस्करी भवति। अन्यथा विनाशकारिणी चान्तःपरम्परा प्रवर्तिष्यते।"

स्वर्गमान्तरिक्षं चकम्पे। मन्ये मेदिनी चचाल। दयारामस्य निवेदनं व्यर्थं जातम्। धर्मध्वजिनः प्रलयं कर्तुं कटिबद्धाः कृष्णचन्द्रस्य मौनं सङ्केतमाप्य तज्जना निर्दयं प्रहर्तुं तत्परा जाताः। अनवरुद्धो यष्टिप्रहारो नर्तते। नृशंसतायाः नग्नताण्डवं प्रवृत्तम्। एकत्र हिंसा परत्राहिंसा। एकत्रास्त्राणि परत्र रिक्तहस्तता। अस्ति कीदृशं वैपरीत्यम्?? पश्यतामेव तामसी वृत्तिरारूढा। सर्वे परस्परं रुधिरस्य पिपासवो जाताः। मिथो हस्ताहस्ति, दण्डादण्डि, केशाकेशि, कुन्ताकुन्ति प्रहरणं प्रवृत्तम्। दयाराममेघसिंहयोः साघातिकाऽऽहतिर्जाता। अन्येऽपि बहव आहताः। दूरस्थितः कृष्णचन्द्रः स्वनीत्या स्मयमान आसीत्। आजानिनोऽत्याचारिणः यत् किमपि कुर्युः तत्सर्वं स्वल्पमेव। सत्याग्रहिणामुपरि चेत्थं शस्त्राक्रमणमतिनिशंसिक-

पुनरावृत्तिरासीत् । यो यो कूपमारोहत् तस्य तस्य कपालक्रिया विहिता । पश्यतामेव कूपप्रकोष्ठशीतलजलं तप्तरक्तरञ्जितं जातम् ।

यदानुयायिनोदयाराम मेघसिंह च न्यभालयन्, तदा तयोर्जीवशुकः कायपिञ्जरादुदपतत् तयोर्निर्ममबलिदानं जातमिति सर्वं निरीक्षितम् । सहसा चीत्कारोऽजनि । आशङ्काभयचपलताया साम्राज्यं व्याप्तम् । दलद्वयस्याश्रुधाराभि तत्र त्रिवेणीदृश्यमुपस्थितम् । अघटितघटनापटीयसी प्रकृतिरिति जनैरनुभूतम् । यस्यावधि यन्न भूतं तदेव जातम् ।

पुत्रशोकेन कृष्णचन्द्रस्यापि हृदयगतिरवरुद्धा । तथा सोऽपि पञ्चत्वमगात् । त्रयाणामेकस्यां चितायां दाहसंस्कारो ग्राम्यैः कृतः । सर्वेषां नेत्राणि सजलान्यासन् । वसतिनिवासिभिस्तेषां स्मारकं निर्मितम् यत्कूपाद् जलमानेतुमागतान् बलिदानस्य मूककथा कथयति । इति दिक् ।

दिग्-भ्रमः

कलानाथ शास्त्री निदेशक भाषा विभाग, जयपुर

धूमशकटि[1] प्रतीक्षागले[2] शीत समधिकमासीत् गिरीशेन सकृत् प्रकोष्ठ-बद्धा[3] घटिका दिदृक्षिता, किन्तु नातिज्योमे तमसि न सा दृष्टिगोचरा भवत्। निशीथस्य समयोऽस्ति लघुतरं चेदं धूमशकटिस्थलम्, विद्युत्प्रकाशस्य तावती व्यापक व्यवस्था कथं सुलभा स्यादत्र ? गिरीशेन चिन्तितम। तथापि समग्र दृश्य विलोक्य तेनाऽनुमित यद्धूमशकटेरागमने न्यूनान्यूनम् एकाहोरा त्ववशिष्यत एव। तदैव तु निर्माक्षिकमिव दृश्यते। यदाकदा कर्मकराणा धृतकाचदीपिकाना पादत्राणध्वनि सुदूर श्रूयते विलीयते च। द्वित्रा यात्रिणो धूमशकटिं प्रतीक्षमाणा प्रतीक्षागृहेण सहैव संश्लिष्टे यात्रिविश्रामकक्षे[4] गिरीशेन सहैव वेत्रासन्दीषु[5] समुपविष्टा ।

अवकाशदिनेषु स्वगृहान् प्रत्यागतस्य गिरीशस्य सर्वोऽपि समय कियत् त्वरित व्यतियात !! श्व पुनरपि विश्वविद्यालये कक्षासु गन्तव्य स्यात्। तान्येव पुस्तकानि, काव्यप्रकाश, तुलनात्मक भाषाविज्ञानम्, भारतीयदर्शनम् भवभूति, मृच्छकटिकम् । संस्कृतविभागस्य प्राध्यापका:, केचन प्राचीनपद्धत्यनुयायिन, अपरे नितरामाधुनिका, एवमेव छात्रा, कतिपये पुराणपद्धतिप्रिया, धौतवस्त्रसाधारणकंचुकनिचिता, अपरे तु पाश्चात्य वस्त्रवेष्टिता आधुनिका। संस्कृतविषयस्य स्नातकोत्तरकक्षा एव विधा एव भवन्ति संमिश्रा। यथा हि छात्राध्यापकादीनामाचार विचारेषु संमिश्रता दृश्यते तथा कक्षास्वपि संमिश्रता प्रकटा-युवकाश्च युवत्यश्च सर्वे स्नातकोत्तरकक्षासु अधीयते। स्नातककक्षासु पुरुष-महिलाना पृथक् पृथक् महाविद्यालया भवन्तु नाम। भगवत्कृपया छात्रावासा नात्र भवन्ति संमिश्रा। कन्याछात्रावास पृथगस्ति, काम भवतु स विश्वविद्यालय-परिसरे

---

१ धूमशकटि ट्रेन इत्याङ्गलभाषायाम्। २. प्लेटफार्म, (रेलवे प्लेटफार्म) इत्याङ्गलभाषानाम्। ३ प्रकोष्ठे बद्धा घटिका रिस्ट वाच इत्याङ्गलभाषायाम्। ४. मुसाफिरखाना इति भाषायाम्। ५. बेंच इत्याङ्गलभाषायाम्।

एव । गिरीशेन चिन्तितं यद्यदि विदेशेष्विव मिथश्छात्रावासा अभविष्यंस्तर्हि मनोज-नवनीतभट्टशास्तस्य रसिका सहपाठिनस्तु सर्वमपि दिवसं सहपाठिनीनां कक्षेष्वेव व्यतियापयितुमचेष्टिष्यन्त । नायं प्रयत्यापि बोद्धुमपारयद् यत् स्वाध्याये समयं न प्रदाय किमिति मनोजो नवनीतश्च कन्याछात्रावासस्याधो भ्रमणे प्रभूतं समयं यापयतः ? किमिति तावदवकाशदिवसेषु नूतनानि वस्त्राणि परिधाय स्वकीयाभ्यास-पुस्तिकानामादानप्रदानमिषेण[1] कदाचिद्वनितायाः, कदाचिच्च सुधायाः प्रकोष्ठे यातु कन्याछात्रावासप्रतीहारेण सह सख्यमापादयतः ?

तस्य तु मनसि न कदापि तादृशी समुदिताऽऽकाङ्क्षा । सोऽयं सुरुचिरदर्शनो, युवा, बुद्धिमान्, विश्वविद्यालय प्राप्तप्रगमोऽप्यस्ति उच्चश्रेण्या सर्वदैवोत्तीर्णो भवतीति सर्वे तस्मै स्निह्यन्त्यपि, किन्तु न तेन कदाप्यभीष्टं यदेवंविधेषु रसिकोचितेषु निरर्थकेषु व्यासङ्गेषु समयं व्यतियापयेदिति । कुतो न स्यादेवम् ? तस्य परिवार एव तादृशः सदाचारपरम्परानुयायी, लब्धप्रतिष्ठश्च । भवतु स नाम ग्रामवासी, किन्तु किं ग्रामे तस्य परिवारो न सुशिक्षितो न वा मूर्धन्य स्थानमधितिष्ठति ? ग्रामवासित्वे सत्यपि किं स निर्धनोऽथवा नागरिकसभ्यताऽनभिज्ञः ? किं स न जानात्याङ्गलीं भाषाम् ? अथवा किं स न वेत्त्याधुनिकानाचारान् ? छात्रावासे, यत्र हि स समादृतं स्थानं धारयति, स बहुधा कार्यपालकपदेषु निर्वाचितोऽपि । किन्तु न तेन कदाऽपि स्वाध्यायमतिरिच्यान्यस्मिन् कस्मिंश्चन व्यतिकरेऽधिकः समयो यापितः । इतस्ततस्त्वेव छात्रावासस्याऽस्वामिनस्तस्य सहाध्यायिनो मनोज नवनीतावुभावध्ययने स्वल्पं, सामाजिकसम्बन्धस्थापने च समधिकं समयं प्रददतः ।

अस्मिन्नेव शीतावकाशे गृहान् प्रत्यागतः स धर्मभीरुणा पित्रा सगाम्भीर्यं पृष्टोऽभूदिति सहसा तस्य स्मृतावागच्छत् । सप्ताहोऽपि तु नातीतः, किमिति न स्मरेत्सर्वं सुस्पष्टम् ?

"गिरीश किं चिन्तितं त्वया कदापि विवाहविषये ? अचिरादेव त्वं स्नातकोत्तरपरीक्षोत्तीर्णो भवितासि । तदनन्तरं तु विवाहो न भवेत्कालिकः ? किन्तु कश्चन समशील परिवारस्तु पूर्वमेव निर्धारितो भवाच्चत्यनर्थं मया दृष्टचर एव परिवारः । कन्यका सुशीला, सुशिक्षिता च । स्नातिका तु पूर्वमेवा-ऽस्ति, सुदर्शना सेयं कन्या न तिष्ठेदविवाहिता चिरकालाय । अतो यावदन्य कश्चन वरो निर्वाच्यते तं तत्पूर्वमेव यदि वयं स्वीकृतिं दद्याम तर्हि ते वरारा निश्चिता।

---

१ नोट बुक इत्याङ्गलभाषायाम् ।

स्युः । कतिधा तु पत्राणि तैः प्रेषितानि । त्वन्माता तु कन्यां दृष्टवत्यपि । त्वं वाञ्छसि तर्हि पश्य तां त्वमपि !" उक्तं पित्रा ।

"नैव तादृशं किमपि । पञ्चवर्षाणि तु चर्चाऽपि न विवाहस्य ।"
तेन साटोपं त्वरितमुत्तरितमासीत्

"मध्य एव मातोक्तवती" किन्तु पूर्वं निश्चयो, वाग्दानं वा भवत्विन्यत्र का ते विप्रतिपत्तिः ? भवतु विवाहः पञ्चवर्षानन्तरमेव । कन्यापक्षीया अपि न त्वरन्ते तावत्तु ।"

'भवतु न किमपि, किन्तु वाग्दानादेरपि चर्चा ममाध्ययने विघ्नायेत । लिख्यतां कन्यापक्षीयेभ्यो यदन्यं कञ्चन वरं मृगयन्तु ते ।" सधाष्टर्यमनेन पुनरुत्तरितम् । एतदुपरि विद्यावता, प्रकाममनुभववता च पित्रा भूयान् वैचारिको विमर्शस्तेन सह कृतोऽभूत् । पाश्चात्यमनस्तत्त्वज्ञ फ्रायड-एडलरप्रभृतयोऽपि मध्ये समानीता, याज्ञवल्क्य मन्वादयोऽपि, वर्णाश्रमव्यवस्थाऽपि सुभृशं विचारिता, समधिकं समयमविवाहितस्तिष्ठन् न किञ्चन विशिष्टं प्रयोजनं साधयति कश्चिदिति जनकेन साधयितुमिष्टं तद्विपरीतं गिरीशस्तु ब्रह्मचर्याश्रमस्याधारं सतर्कं प्रतिष्ठापयन्नवदद्यावत्को, मानसिकं शारीरश्च विकासो न भवति पूर्णो, यावच्चापि विद्याध्ययनं न समाप्येत, तावत्तादृशी चर्चाऽप्यहितकरी स्यादित्यादि सहेतुकं प्रतिपादयितुमैच्छत् । सुतस्य तार्किकाभिव्यक्तिकौशलं मनस्येव प्रशंसताऽपि पित्रा प्रकटं केवलमिदमेवोक्तं "सर्वं तदहमपि मन्ये, किन्तु प्राचीनानामाश्रमाणां युगं तद्व्यतियातम् । चलचित्राणामिदं युगम् । अद्य हि प्राप्तकैशोर्याः, प्राप्तयौवना वा बालका ऋष्यशृङ्गा इव तिष्ठेयुरित्यसम्भवम् । बह्व्यो मेनका विश्वामित्राणां कृतेऽभिनयन्ते । किन्तु त्वं नाधुना तां चर्चां रोचयसि चेत्तिष्ठतु तदिदमग्रिमग्रीष्मावकाशं यावत् ।"

सहसैव तीव्रो धूमशकटिशृङ्गप्रकाशो[1] गिरीशस्य स्मृतिसमाधिं भग्नमकरोत् । परिधानपिटकमादाय[2] त्वरितमसावुदतिष्ठत् । आयाता धूमशकटि ।

x x x x x

(२)

'शाकुन्तल'- नाटकमञ्चनस्य पूर्वाभ्यासानां दशमोऽद्य दिवसः । किन्त्वद्य यावान् विलम्बः समजायत, न तावान् पूर्वं कदाऽप्यभूत् । रात्रिरेव शकुन्ता ।

---

१. हैडलाइट । २ सूटकेस इत्याङ्गलभाषायाम् ।

प्रतीक्षयैव घटिका वीक्ष्य समवेक्षत गिरीश । साश्चर्य्यवादनम् कथं समयस्य निरर्थको नाशः । समयनाशस्य नैरर्थक्यमिदं तेन तदाऽनुभूतमासीद् यदा 'शाकुन्तलस्य मञ्चनमस्मिन् वार्षिकाधिवेशने भवत्विति विनिश्चित्य विभागाध्यक्षेण नाटकस्यास्य मञ्चोपयुक्तं रूपान्तरणं विधाय तदालेखस्य सम्पादनभारो गिरीशोपरि निक्षिप्त त सहायकत्वेन च सुधा समनुदिष्टा. तत्प्रसङ्गेन च सप्ताहादधिकोऽवधिः शाकुन्तलस्याऽऽलेखसम्पादने व्यतीत किन्तु न जानात्यसौ किं तत्कारणमभूद्येन प्रेरितोऽयं सप्ताहावधि भृशं परिश्रम्य आलेखममुं पूर्णमकरोदेव । सुधायाऽपि तु भूयान् परिश्रमो विहित । सा वराकी सङ्कोचं विहाय बालकानां छात्रावासे, तस्य कक्षे प्रत्यहं समागत्य दिवसं होरापर्यन्तमस्थात्, तस्य च श्रुतिलेखमलिखत्, त्वरितं लिखित्वाऽपि मौक्तिकवत्सुन्दरैरक्षरैः सर्वोऽप्यालेखस्तया सम्पादित इति दृष्ट्वा चकितोऽभवद् गिरीश । निभृतमलज्जत स, तेन हि पुरुषदम्भाभिभूतेन न कदाप्यनुमितमासीद् यन्महिला अपि तावत्सुन्दरं, त्वरितं च लिखितुं क्षमाः स्युः । न केवलं सुन्दरमेव, शुद्धमपि । सुधाया व्याकरणज्ञानमवबुध्यापि तु गिरीशश्चकित एवाऽभूत् ॥ असकृत्तया, विनम्रतापूर्वकं गिरीशः प्रतिबोधितः पाणिनीयव्याकरणानुरूपं प्रयोगं परिवर्तयितुम् । कालिदासीयानां समस्तानां[1] प्राचीनपरिवेशोपयुक्तानां च वाक्यानां नवीनेषु साम्प्रतिकपरिवेशोपयुक्तेषु च वाक्येषु रूपान्तरणं कार्यमित्यस्येच्छाऽभूत् । किन्तु स्वल्पमपि व्याकरणस्खलनं सुधा त्वरितमेव सूचयतीति पश्यता तेन शनैः शनैः कालीदासीयशब्दानामेवाधिकाधिकं तथैव स्थापनं समारब्धमभूत् ।

किन्तु न कदापि दम्भस्य, घमण्डस्य वा लेशमपि सुधा प्रदर्शितवतीति स साश्चर्यमस्मरत् कथं सलज्जया तया प्रोक्तमासीदेकदा— "भवांस्तु कन्याछात्रावासं नाऽऽगच्छेदेवेत्यहं जानामि । अत एव सङ्कोचं विहायाहमेव भवच्छात्रावासे समागच्छमेतावन्ति दिनानि । अन्यथा लेखो नाऽभविष्यत पूर्णः, प्राध्यापकमहोदयाश्च मामेवापराधिनीं प्रासेधयिष्यन् 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा', इत्यादिना वयं महिला एवाऽज्ञानदोषभाजः । किन्तु अद्याऽऽलेखस्य समय-परीक्षणाय । यदि भवान् मत्प्रकोष्ठे समायातुं कष्टं विदध्यात्तर्हि महत्सौविध्यं मे भवेत् । आलेखो मन्ये होरात्रयं ग्रहीष्यति, एतावन्तं च समयं नाऽहं परत्र स्थातुं शक्ष्यामि ।"

लज्जया, पश्चात्तापेन च गिरीशस्तारत्यमनुभूय विलय इव संवृत्तः । सक्षमाप्रार्थनमेष त्वरितं कन्याछात्रावासं गन्तुमन्वमन्यत । सुधायाः शालीन्य, सुशीलं

---

१. समासघटितानामित्यर्थः ।

बुद्धिं, विनयं च दृष्ट्वा विहस्तोऽसौ सवृत्त । मन्ये तदिदमेव कारणमभूद् यदनेन नाट्यप्रयोगे दुष्यन्तस्य भूमिकामपि कर्तुमनुमत, यदाऽसावज्ञानात् यच्छकु त लाया भूमिका सुधा निर्वहेदिति । ततश्च पूर्वाभ्यासेषु भूयस्त समयमलिशाह्य सर्वेष्वासौ समयनाशपश्चात्तापाकुलो भवति स्म, किन्तु नायमजानात्कीदृशी सा प्रेरणाऽभूद्यया साय पचवादनसमकालमेवास्य पादौ विश्वविद्यालयप्रेक्षागृह प्रति स्वत एव जिगमिषु स्म भवताम् । वार्षिकोत्सवानन्तरमथ सर्वं तदिद नाटकमचनादिक विहाय केवलमध्ययने एव ममय प्रदास्यतीति सुदृढ निश्चितमनेन । मनोज-नवनीतादयस्तु नाटक पूर्वाभ्यासेषु कियन्त रसमगृह्णन्निति स पश्यति स्म उपहसति स्म च तान् मनस्येव । एवविधास्तथाकथित-सामाजिकाश्छात्रा सर्वदैव तेनोपहसिता अभूवन् । ते त्वसकृदमु श्रययो धयन् 'सखे गिरीश, तपोवनस्य ऋषिकुलस्य वा पुस्तककीटायितश्छात्रस्त्व कि जानीया जीवने कीदृशो रसो भवतीति । अरे कुमारसभवस्य भामिनीविलासस्य च पाठका भूत्वाऽपि यदि वय खदिरवृक्षवद्रूक्षा स्याम तर्हि धिगस्माक साहित्यपठनम् ॥' एव च सर्वदैवैतान् समुपादिशत्-'दन्धव स्वपित्रो समधिक द्रव्य स्ववस्त्रपुटकेष्वादाय छात्रावासाना जीवन रसयन्तो वय न जानीमो यदाधुनिकजीवने कियत्य प्रतियोगिता अस्माभिर्योदव्या इति । अद्य हि प्रतियोगितायुगम । विश्वविद्यालये प्राथम्य वा, समधिकानकान् वा यदि वय न लभामहे, भृत्यर्थं च द्वाराद्द्वारमाहिण्डन कर्तव्य भवेत्तदा कुमारसभवो, भामिनीविलासश्च न भोजनमस्मभ्य प्रदास्यत । अस्माक नियोक्ता नेद प्रक्ष्यति यद् भवता सभ्य कतिकन्याभि सहास्ति, स भवतामकतालिकामेव द्रक्ष्यति ।" इत्यादि ।

वर्षान्तु प्राथम्य लब्धवान् गभीर समादरणीयश्च छात्रोऽयमभूदिति सर्वे तस्य गौरव रक्षन्ति स्म । ततश्च तथाविधा रसिका सहपाठिनो नैन प्रकटमुपाहसन्, किन्त्वनेन ज्ञातमासीद् यत्तैस्तस्य नाम "नैयायिक" इति रक्षितमभूत । पर्यन्ते तदिदमपि तेन ज्ञातमासीद्यन्नैयायिकस्त्व तस्मिन् केन कारणेनाऽऽरोपितमभूत् । यथा नाट्यगृहे सहृदयास्तु रसनिष्पत्तिमधिगच्छन्ति, 'नैयायिकस्तु रगालवेश्मकुड्यास्म-सन्ति भा" न निश्चिन्वन्ति, तथैवाय जीवनरगमचे 'नैयायिक" एवाऽभूदिति तस्यौचित्यमेभिर्दत्तमभूत् । सर्वमिद ज्ञात्वा विनोदमेवाऽऽनव भवत, न कदाप्यकुप्यत्, यतो न तेनाऽऽत्मनि सहृदयत्वभाव कदाप्यनुभूत ।

किन्तु नाटकस्य पूर्वाभ्यासेरस्य मानसेऽज्ञात किंचनाऽऽन्तरिक परिवर्तनमिव

१. आलेख वाचयित्वा, कियन्त समयमय ग्रहीष्यतीति समयनिर्धारणमिति यावत् ।

विजीयन्ते इत्याशङ्कते स्मायम् । क्षणेनैव चाऽऽशङ्कामिमां दूरमक्षिपदसौ । कथं तदिदं सम्भवति ? शाकुन्तलोऽसौ व्यासङ्गः, सुदीर्घपरिश्रमानन्तरं विश्रामवन्मनोविनोदोऽयं कां वा हानिं सम्पादयेत् ? नाऽस्य तत्र कामपि हानिरन्वभवत् । तथापि तु प्रथमं श्रेणिका छात्रैवाऽभूत् । साऽपि तु नाटकेऽस्मिन् भूयांसं समयं यापयति । साऽपि गभीरा, समादृता च छात्राऽस्ति । द्वयोस्तायाविधं साम्यं सुस्पष्टमेव । तर्हि सायङ्कालीने होराद्वये पूर्वाभ्यासैर्व्यतियापिते को वा दोषः समापतति ? सर्वमिदमन्तर्द्वन्द्वं निरन्तरमन्वभवदसौ । किन्तु स्वकीये व्यवहारे पि तु ईषत्परिवर्तनमयमनुभवति किमिदम् ? यो हि गिरीशः अनितया, ऋचया, अन्यया वा कयाचन सहपाठिन्याऽभ्यास-पुस्तिकां प्रदातुं, कस्यचन पुस्तकस्य नाम लेखितुं वा पृष्टोऽपि वाक्येनैकेनैवोत्तरमदात् सोऽधुना पूर्वाभ्याससमयेऽनितया, माधुर्या चाभिवादितः किमिति सस्मितमुत्तरं प्रददाति ? अनिता माधुरी च अनसूया-प्रियंवदयोर्भूमिके अस्मिन् नाटके निर्वहतः । किमिति सर्वा एताः स्वं स्वं भूमिकां शिक्षयन्त्यपि स प्रमोदमनुभवति । वयःपूर्वे श्रीनरस्य पादत्राणयुगस्य प्राचीनतां दृष्ट्वा किमित्यनेन नूतनोपानद्द्वयमिष्यते ? न केवलमिष्यते एव, पूर्वाभ्यासस्य तृतीये एव दिवसे क्रीतमप्यनेनोपानद्युगम् ।

नाटकेऽस्मिन् नवनीतोऽप्येकां भूमिकां वहति, मनोजोऽपि । द्वावपि सुपुष्टगात्रौ युवकौ । सामाजिकौ, लोकप्रियौ चाऽपि । कन्याछात्रावासस्य सोपाने सह तयोर्यावान् परिचयस्तावान् नान्यस्य भवेत् । किन्तु द्वयोरप्यनयोर्वाणी न तावती गभीरा, उच्चारणं च न तावत्स्फुटमिति विभागाचार्येण गिरीश एव दुष्यन्तस्य भूमिकायै वृतोऽभूत् । पूर्वाभ्यासानां सञ्चालनस्य प्रभूतो भारोऽपि तेन गिरीशस्यैवोपरि प्रक्षिप्तः आलेखोऽपि तेनैव लिखितोऽभूदिति कृत्वा । नवयुगीना अनिता माधुरीप्रभृतयश्छात्राः प्राचीनपरिपाटीरतो पुस्तककीटस्येवाऽस्य दुष्यन्तत्वेन चयने मन्ये निराशामनुभविष्यन्तीत्याशङ्कितमनेन । किन्तु किमिदं विपरीतं सञ्जातम् ? तं दुष्यन्तत्वेन वृतं वीक्ष्य यथा मुग्धाः प्राऽभवन्, तत्तु प्रत्याशितमेवाभूत्, किन्तु नवयुगीनाः कन्यका अपि चयनेनानेन प्रासीदन्नेवेति तेन न ज्ञातम् । तदेव न जाने केन कारणेन, गिरीशः प्रस्तावितवान् यन्नवनीतः कण्वस्य, मनोजश्च विदूषकस्य भूमिकां निर्वहेदिति । त्वरितमेवेदं समनुमतमाचार्येण । किन्तु प्रस्तावस्यास्यान्तः काचनेर्ष्या तु नाऽभूत् ? नैव, नैव । किमिति स्यादेवम् ?

× × × × ×

(३)

माघीयशीतस्य निशीथे यदा प्रेक्षागृहाद् दर्शकाः शाकुन्तलस्य मञ्चनं प्रत्यक्षी

कृष प्रत्यावर्तमाना समूहस्तदा सर्वेषां मुखादेकैव वाणी निरसरत् । 'दुष्यन्त-शकुन्तलयोर्भूमिके निर्वहता कलाकार-द्वयेन तु चमत्कार एव कृतः । सजीव इव तत्रविहित कालिदास ।' दर्शकेषु कुलपति, प्राध्यापका, सभावितानागरिकाः वरिष्ठा प्रशासका, पत्रकारा कलाकारा सर्वेऽप्यासन् । कुलपतिना, प्रशासकैश्च विभागीयाचार्यैः स्वप्रशंसा कलाकारयोः सकाशं प्रापयितुमनुरुद्धं किन्तु पत्रकारास्तु नेपथ्यान्तरेव प्राविशन् । सहस्तपीडनं तैर्गिरीशोऽभिनन्दित । तदिदमनुमातु सुशकमासीद्यत् श्वस्तनेषु समाचारपत्रेषु गिरीशस्य मुक्तकण्ठं प्रशंसाना स्तम्भा दृश्यन्ते । केयूरमण्डित बाहुरयं तस्मिन् सविनयं चाभिनन्दनानि स्वीकुर्वन्नासीत्, एकवेणीधरा, शुभ्रवस्त्रावृत स्वकीयमभिनन्द्य सौन्दर्यं द्विगुणमिव कृत्वा प्रसारयन्ती सुधाऽपि तेषामभिनन्दनानि विनयावनता भूत्वा स्वीकुर्वाणाऽभूत् । विभागीयाचार्यो हर्षगद्गदो भूत्वा समभ्यनन्द द्वावपि । तदैव शैत्यापनोदनिपुणा चेतस्यपर्णी[1] उष्णपेया समायाता । आचार्येण, प्राध्यापकै, कलाकारैश्च तस्या रसास्वादो गृहीतः । न ज्ञान, कतिवार सतडित्कचक्रय छायाचित्रग्राहकैस्तयो[2] चित्राणि गृहीतानि, कतिपयैश्छात्रैस्तु तस्य स्मृतिहस्ताक्षराण्यपि[3] जिघृक्षितानि ।

अपूर्वं कश्चिदयमनुभवोऽभूद् गिरीशस्य । कतिशः विश्वविद्यालयीयपरीक्षास्वनेन प्राथम्यं लब्धमभूत् तदाऽपि जनानामभिनन्दनान्यसौ स्वीचकार, वादविवादप्रतियोगितासु प्राथम्यं लब्ध्वाऽप्यभिनन्दनान्यनेनाऽर्जितान्यभूवन्, किन्त्वस्या रात्रेरभिनन्दनेषु कीदृशमभूद् वैलक्षण्यं यदनेन चायचषकं सीधुचषकमिवानुभूतम् । केन कारणेनाद्यतनं साफल्यमियद् गरिमास्पदमनुभूयत इति विचिन्तयितुमवसरोऽप्यनेन न लब्धो यदा केनचन सूचितं यन्मस्तारवन्टि[4] कलाकारान् स्व-स्वगृहान् प्रापयितुं प्रतीक्षते । चाय-पानं समाप्य नगरस्थैश्छात्रावासीयैश्छात्रैर्गमनानुमतिर्याचिता । छात्राबाला सर्वे निकटस्था एवाऽभूवन् । अत सुधा विहाय माधुरी, अनितादयोऽन्याश्छात्राश्च तस्यामेव शकट्यां प्रयाता । आचार्यादयोऽपि निरगमन् । मनोज-नवनीतादय स्वकीयैर्द्विचक्रैर्निर्गता भवेयुरिति सर्वे जानन्ति स्म । दुष्यन्त शकुन्तलादिनायकयो कृतेऽभिनन्दनानां पूर इयानभूद्यत् ताभ्यां स्ववेषावतारणाय समय एव न लब्धोऽभूत् । अत शीघ्रं नाट्यवेषावतारणमाभ्यामारब्धम् । स्व-स्व परिधानानि परिधाय यदा तौ बहिरागतौ तदा मञ्चप्रबन्धका विद्युत्प्रबन्धादुपसंहारे संलग्ना अभूवन् । प्रेक्षागृहाद् बहिरागत्य द्वाभ्यामपि परस्परं दृष्टिपानं कृत-

---

१ चाय इति भाषा । २ फोटोग्राफर इत्याङ्गलभाषायाम् ।
३ आटोग्राफ इत्याङ्गलभाषायाम् ४. मोटर वन इत्याङ्गलभाषायाम् ।

किन्तु नैकेनाप्यपरोऽभिनन्दितः । मनसि परस्परमभिनन्दनप्रदानस्य सत्यामपि तीव्रायामाकाङ्क्षायां किमित्येनयोर्वैखरी नाम प्रसृतेति नैकोऽप्यजानात् विचित्रा समभवद् द्वयोरपि मनःस्थिति । गिरीशेन स्पष्टमनुभूतं यत्साफल्येऽस्मिन् सुधाया माहुर्यस्यापि वर्तते कश्चन भागः । किं तदिदमेव साऽप्यनु भवति ?

"सर्वे गताः । शीतं च प्रबलम् । अहं भवतीं छात्रावासं प्रापयामि, ततः परावर्तिष्ये ।" गिरीशेनोक्तम् । गिरीशस्य छात्रावासः पूर्वमागच्छति स्म, तदनन्तरं कन्याछात्रावासोऽभूत् ।

"चायपानमेतावदभूद् यत्तत्र गत्वा निद्राऽऽगमिष्यति इत्यत्र सन्देह एव ।" स्वगमनमनुवादयन्त्या सुधयोक्तम् । द्वावपि स्फुटमहसतामेतदुपरि ।

"अद्यतनी सफलता भवतीमेवाधारीकुरुते इत्यहमनुभवामि । सर्वोऽप्यासीद्धि भवत्या नायिकाया प्रमुखा भूमिका भवत्या..." गिरीशेन वक्तुमारब्धम् ।

"अहो विनय । आलेखे किममून्मदीयम् ? भवता तु सर्वं लेखितमासीत् ।"

"समग्रमपि नगरं श्वो भवत्याः प्रशंसायां व्यापृतं स्यात् । पत्रकाराणां प्रतिक्रियया किं भवती नानुमानि ?" गिरीशेन किञ्चिन्निकटमागत्य कर्णान्तिकमिव जल्पितम् ।

"प्रथमं तु प्रशंसा भवत एव स्यात् । भवतामभिनयं वीक्ष्य तु सर्वाऽप्यहमा विस्मृताऽभूत् । यदि मदीया काचन प्रशंसाऽपि भवेत्तर्हि तस्यामपि भावत्कीमेव प्रशंसामहं द्रक्ष्यामि ।"

"किमिति ?"

"यतो हि मदीयायां भूमिकायामपि प्रतिवाक्यं भवतामेव तु मार्गदर्शनमासीत् ।

द्वाभ्यामप्यनुभूतं यत्स्वल्पीयानपि छात्रावासपर्यन्तो मार्गः कियान् प्रलम्बः समभूद्यतयोर्वार्तालापः समाप्तिमेव नायाति स्म । वार्तालापेऽस्मिन्ननुभूतपूर्वो मधुरिमा कथमनुभूयते स्मेति द्वाभ्यामपि ज्ञातं न वेत्ति न वक्तुं पार्यते ।

कन्याछात्रावासस्य प्रमुखद्वाराद् बहिर्वर्तमानो पतिताऽभूत । किञ्चन कालमेव गिरीशस्तदुपरि निषण्णोऽभूत् । "किं भवानत्रोपवेक्ष्यति ?" सुधया साश्चर्यं पृष्टम् ।

"क्षणमत्रोपविश्य चिन्तयितुं वाञ्छामि कथं तदिदं सर्वं सञ्जातम् ?"

"किं सर्वम् ?"

"मा पृच्छ तत्। क्षणं चिन्तयामि तदा वक्ष्यामि, न जाने किमिति तादृशमद्भुतमुत्तरं गिरीशः प्रादात्।

"चिन्तय, तदा वदे। अहमप्यत्रैव तिष्ठामि तावत्" परिहासपूर्वकं सर्वदा सहज-गाम्भीर्यान्वितया छात्रया समुत्तरितम् तत्रैव च स्थितवती। किमिदमभूद् येन निशीथे तस्मिन् शीतस्य प्रकोपे नैनयोः कतरोऽप्यन्वभवत् ? मन्ये तदिदमपि कतिपयक्षणानन्तरं ताभ्यां नानुभूतं स्याद्यन्तौ विशालपट इति। तस्मिन् परिवेशे तदिदं तु कथमनुभूतं भवेद् यत्कश्चन तौ तत्र स्थितौ पश्यन्नपि स्यात्॥ किन्तु हन्त। किमिदम् ? होरार्धानन्तरं ताभ्यामनुभूतं यत्समुपेक्षत प्रलम्बतरपङ्क्ते पृष्ठतोऽन्धकारे कश्चन जनः शनैः शनैरपसरति। द्वाभ्यामपि सावधानं दृष्टं प्रयतितमनेकैः, न द्वावपि तु त्रयो जना अनुमिताः। गिरीशेन शनिशर्मेत्या, गात्रयष्ट्या चानुमितं यत्तेषामेको नवनीतः स्यात्, अपरो मनोजः तृतीयश्च राजपाल इवानुमितः। छात्रावासस्यैमे छात्रा निशीथेऽस्मिन्नत्र किं कुर्वन्ति ? अस्मिन् शीतेऽत्र किमिति समायाताः। किन्तु तावता कालेन सुदूरं प्रयातास्ते सर्वेऽपि। ततश्च किमिदम् ? सुदूरादेशात् सम्मिलितस्याट्टहासस्य ध्वनिः कथं श्रूयते ? पुनरप्येकोऽट्ट-हासः॥ अधुना तु सुनिश्चितमेव यदेते त एव छात्रावासीयाश्छात्राः। ध्वनिरपि तस्य सुपरिचितः। तेन न ज्ञातं कदा छात्राश्चैतान् सुधा समुत्थाय, केन द्वारेण कन्याछात्रावासं प्रविष्टा भवेत् ? किं किञ्चिद् द्वारं तदाऽप्युद्घाटितं भवेत् ? मन्ये किञ्चित्-समयं पूर्वमपाऽऽयाताभिश्छात्राभिर्द्वारमुद्घाटितं रक्षितं स्यात्।

अट्टहासैर्भग्नसमाधिर्गिरीशः कदा समुदतिष्ठत्, कदा कुत्र प्रचलितः कुत्र च प्राप्तः, इति नायमजानात्। अपर इव कश्चनायं समाधिर्भवेत्।

× × × × ×

(४)

छात्रावासीय-घटिकया यथैव नव वादितानि तथैव गिरीशः स्वपरिधान-पुटकमादाय निभृतं छात्रावासाद् बहिरसरत्। सोऽजानात् यत् छात्रावासीयानां कृते नैशभोजनस्यायं समयोऽभूत्। ततश्च सर्वेऽपि भोजनकक्षे पृष्ठतो भोजनव्यापृता भवेयुः। किन्तु किमिदम् ? रणवीरः कुतश्चन समागच्छन् छात्रावासस्य प्रमुख-प्रवेशद्वारि दृष्टस्तेन।

'कथं गिरीश ? कुत्रचन गच्छसि किम् ? किमिदं वस्त्रपेटकम् ?' तेन पृष्टम् ।

'आम भ्रातः । कतिपयदिवसानां कृते गृहं गच्छामि । तूर्णमेव प्रत्यावर्तिष्ये ।" उत्तरितं गिरीशेन ।

गृहम् ? एषु अवकाशदिवसेषु न गतः किं स्व गृहम् ? अधुना त्ववकाशोऽपि नास्ति । वार्षिकोत्सवसमाप्त्यनन्तरं सम्प्रति पठनस्य श्रमसनीयतरो भवेत् । त्वं कथमस्मिन् काले पठनं त्यक्त्वा गच्छसि ? किं तत्र किञ्चन विशिष्टं कार्यमागतं ? कुशलं तु सर्वमस्ति ?'

"सर्वं कुशलम् किन्तु विशिष्टं कार्यमेकमागतम् । तदर्थं पित्रा सह कश्चन विमर्शो विधेयोऽस्ति । तं विधाय पुनः प्रत्यावर्तिष्ये । शृणु द्रव्यमिदं गृहाण । इदं छात्रावासभोजनालये मासिकशुल्कं देयं स्यात् । मया पूर्वमस्य निधानं विस्मृतम् । त्वं मदर्थं तत्र तदिदं विलेखये । अहं सप्ताहादधिकं समयं न प्रतीक्षामि परावर्तने । तथापि यथासमयं द्रव्यप्रेषणं भवति इति त्वां कथयामि ।' इति कथयता गिरीशेन रणवीरस्य हस्ते मुद्रा निहिता । 'इदं त्वपरं मदर्थं कुर्याश्चेत्साधु भवेत् । पुस्तकालयस्य पुस्तकद्वयं मया गृहीतमासीत् । तत्प्रत्यावर्तनस्यापि समयः श्व एव निर्गच्छेत् । वार्षिकोत्सवानन्तरं दिनत्रयस्य निरन्तरमवकाशोऽभूत् । तस्मिंश्चावकाशेऽध्ययनव्यापृतेन मया न बहिर्गन्तुमपि पारितम् । तत इदं पुस्तकद्वयमपि पुस्तकालये सत्वरमेव परावर्त्यं । पूर्वं त्वद्गृहे एव तदिदं नेतुमपाकाङ्क्षम् । किन्तु द्वारि त्वं मिलित एव, अतः किमिति न तुभ्यमेव तदिदं प्रददे ? अतस्तदिदमपि त्वया कर्तव्यम्, कृपया,' इति ब्रुवाणेन गिरीशेन तत् पुस्तकद्वयं रणवीराय स्वहस्तपेटकान्निष्कास्य प्रदत्तम् । रणवीरो नाभविष्यच्चेत् स पुस्तकद्वयमिदं गृहानेव नेतुं विवशोऽभविष्यत् ।

रणवीराय 'दिनत्रयावकाशे मया बहिर्गन्तुमपि न पारितम्' इति कथयन्नयं मनस्यजानादयं स सत्यं न वक्ति । निश्चयमिदं न तेन छात्रावासस्थेनाध्ययनव्यापृतमभूत् किन्तु स्वग्रामस्थैकस्य मित्रस्य नगरस्य गृहे यत्र निवसन्नयं तस्य सुहृत् नगरस्य[1] निर्माणशालायामेकस्यां कर्मकरोऽभूत्, निभृतं व्यतिवाहितम । मित्राय पत्रेण कथितमभूत् यत् छात्रावासे भृशं व्यवधानमेषु दिवसेष्वध्ययनस्य स्यादिति नाहं तत्र स्थातुं

१ फैक्टरी इत्याङ्गलभाषायाम् ।

वाञ्छामि । तत्र मदीया अन्ये सहपाठिनः समयं व्यतियापयेयुरित्यवैकान्ते किञ्चन पठिष्यामि ।" सत्यमेव च तेनैषु दिवसेषु नान्यत् कृतम् । अध्ययने, एकाकिचिन्तने, मनने, सिद्धान्तालोचने, निदिध्यासने च दिनत्रयं, दिनचतुष्टयं वा क्व निरगादित्यनेन गणितमपि न । समाचारपत्रेषु कदा किं प्रकाशितमित्यपि द्रष्टुं नास्य वाञ्छा समुदिता । भोजनमप्ययं पार्श्वस्थे पान्थावासे[1] निभृतमसाधारणेषु समयेषु गत्वाऽकरोत् । ग्रामसुहृत्तु एकवर्षेवाऽसीत । स प्रायशः स्वनिर्माणी-भोजनालये एव भोजनं करोति स्म, स्वल्पीयसे एव च समयायाहोरात्रे सकृत्स्वप्रकोष्ठमायाति स्म । अतः प्रकोष्ठस्य तालिका गिरीशस्य सविधे एवाऽतिष्ठत् तेषु दिवसेषु । अद्यैव स तां स्वसुहृदे परावर्त्य निभृतं छात्रावासमागतः, स्ववस्तून्यादातुम् । नायं कञ्चनापि द्रष्टुमवाञ्छत् । इदमपि साध्वेव जातं यद् द्वारि रक्षक एव मिलितः, न मित्रेषु तेषु कश्चन येषामट्टाहासैस्तस्य समाधिस्तस्मिन् निशीथे भग्नोऽभूत् ।

तदैव तेन त्रिचक्रा पण्यशकटिका[2] राजमार्गे यान्ती दृष्टा । न तस्यां कश्चन यात्री स्थितोऽभूत् । द्रुतमेनामाकारयदसौ । तस्यां स्थित्वा निरदिशत् सोऽयम् 'द्रुतं धूमशकटिस्थलं प्रति चल । वाष्पयानस्य समयो निकटागत एव ।'' सरभसं यानमिदं राजमार्गे धावितुं प्रारभत ।

---

१ होटल इत्याङ्ग्लभाषायाम् ।

२ साइकिलरिक्शा इत्याङ्ग्लभाषायाम् ।

मूल्यान्यमूल्यानि

शशि गुप्ता

"मात ! अद्य मम कतिपयानि मित्राण्यागमिष्यन्ति । तेषां कृते किञ्चि-दुष्णपेयं मिष्टान्नं चेष्यते ।" विजयेनोद्घोषणेव कृता । "कथं अद्यापि मित्राणि ? ह्य एव समागच्छन् ते । किमिदम् ? अधुना त्वमर्जनमपि न करोषि । अध्ययनं चाऽसमाप्तमेव । ततः किमर्थमेतदामन्त्रणादिकमायोज्यते त्वया" मात्रा स निर्भर्त्सितः ।

'अम्ब ! त्वं न जानासि । एष खल्वाधुनिको व्यवहारः' । यदि नाम मित्राणि नाऽऽमन्त्र्यन्ते, तदा त्वस्माकं प्रतिष्ठैव नशिष्यति" विजयः स्वमातरं समाश्वासयितुं प्रायतत ।

"कथं तदोपाहारगृहं नैव नयसि सुहृदः ? एतदर्थं रूप्यकाणि तु प्रतिमासमादत्से त्वम् । आवश्यकतैव कुत्र विद्यते स्वगृहं जनसङ्कुलं विधातुम् ?" युक्तिं प्रायच्छत् सा ।

"बाढं बाढम् । अद्य तु समारम्भं विधेहि । न पुनरामन्त्रयिष्ये तानि मित्राणि ।" पराजित इवैनया युक्त्या न्यवेदयत् स ।

अम्बा तु प्रहृष्टा नम्रतामेनामालक्ष्य । जानाति सा पुत्रस्य मुधावचनानि । परं किं कुर्यात् सा ? एक एव तु पुत्रः । न काऽप्यन्या सन्ततिः । तेनैव भोग्यमेतत् खल्वर्जितं धनम् । परं निरर्थको व्ययस्तु निवारणीयः । अन्यच्च सेविका न तिष्ठति गृहे प्रतिमासम् । स्वकीयं च तस्याः स्वास्थ्यं न सुबाधासहम् । अतएव सा पुत्रस्यै-तादृशमुत्साहं शिथिलयति स्म ।

सन्ध्याकाले विजयस्य सुहृद आगन्तुमारेभे । पञ्चसु तेष्वेका युवतिरप्य-विद्यत । हेमेत्यभिधानमासीत् तस्याः । नैसर्गिकं तदीयं सौन्दर्यम् । वेशभूषा चातीव रम्या । युगानुकूलं तस्या नेपथ्यं बलादाकर्षति स्म युवकान् । तैः परिवृता सा मुक्त-भावेन स्मितान्यकिरत् । यदि कोऽपि तस्या हस्तं धर्तुं प्रयतते, तदा सा नैव वारयते ।

परं केनाऽपि व्याजेन हसनं तु शीघ्रमेव प्रत्याजहार सा । स्पष्टतः तदीयोपस्थित्या स्मितेनैव सर्वे एव युवका हसन्ति स्म ।

यदा च भोज्यसामग्री समाऽऽनीता तदा ते हेमां प्रीणयितुं वस्तूनि प्रय-च्छन् पौनःपुन्येन । सत्यं खलु सर्वैव समारब्धा वयः । हेमाऽप्येतादृशमनुनयं दृष्ट्वा कथं न मोदेत । परं भक्षणस्य तु सीमा भवति । सर्वां भोज्यसामग्रीं कथं सा निगिरेदेकाकिनी ? एतत्कृततया धन्यवादा एव प्रदत्तास्तदनन्तरम् । न किमपि स्वी-कर्तुमक्षमत सा । तस्या निषेधमालस्यमालक्ष्य ते स्वयमपि यत्किञ्चिदश्नन्तु माश्नन्तु वा प्रायतन्त । अन्तराले च महाविद्यालयमधिकृत्य वार्ता अपि चालिता स्म ।

"अद्य तु गुप्तमहाशयैः स्वभाषणे न किमप्यभिनवं प्रतिपादनं कृतम् । ते स्वयं भाषणाय प्रस्तुता एव न प्रतीयन्ते स्म ।" एकेन समुच्छ्वसितम् ।

"अहं तु भाषणस्य समाप्तिं यावत् जृम्भणमेव चकार ।" द्वितीयेनोदीरितम् ।

"अरे ! तदीया दृष्टिस्तु हेमामेव निभालयति स्म । वराकः स कथं क्षमेत भाषणाय ?" कथनेनानेन सह हेमाया दिशि नयनं सङ्केतमिव कृतवान् तृतीयो युवकः ।

"नहि, नहि !" विरोधमिव प्रदर्शितवती हेमा । "प्राध्यापकास्तु वीणामेवाऽऽलोकयन्ति । मद्दिशि तु एकवारमपि न दृष्टं तैः ।" प्रहृष्टेव प्रतीयते स्म सा कथयन्त्येवम् । परं सत्यस्य लेशोऽपि नाऽविद्यत तत्कथने, इति तु सर्वे एवाऽजानिषुः । ततश्च तदीयां वचनभङ्गिमामालक्ष्य समग्र एव युवकवर्गोऽट्टहासं कर्तुमारेभे । नैव प्रवञ्चनायाऽस्ति खल्वेवमिति । प्रकटीकृतं तैः सर्वैः । आत्मानं प्रति तेषां निष्ठया हेमाऽपि बहुशोऽलज्जत् । तदनु सा स्वयमपि मुक्तभावेन जहास ।

"आः ! गृहीतैवाऽस्मि !" कथनेनानेन सार्धं सर्वे खलु पुनरप्यट्टहासं चक्रुः ।

एवमेव मोदमानास्ते होराद्वयं यावत्तत्रैवाऽतिष्ठन्त । ततश्चागामिन्यव-काशदिवसे चित्रपटदर्शनाय निर्णीय नक्तं प्रस्थितास्ते । तेषां निर्गमनमालक्ष्य विजयस्य माता दीर्घमुच्छ्वसितम् । साम्प्रतमखिलमेव तदीयं गात्रं पीडया समा-क्रान्तमासीत् । परं वराक्या तया चषकपात्रादीनि प्रक्षालितानि । ततश्च परिश्रान्ता सा क्षणमात्रं शय्यामस्पृशत् । परं तस्या भाग्ये विश्रान्तिरलिखिता आसीत् । अतः

कथं लभेत सा विश्रान्तिं निमेषमात्रमपि विश्रामं प्राप्तवती सा । यतः किंकर्तव्यता वचनं श्रुत्वा न शशाक सा शयितुम् । तयाऽकपाटावुद्घाटितौ । सन्ध्यैव सञ्जाता सा विजयं हेमया सह प्रत्यागतं दृष्ट्वा ।

'किमद्या गृहं न गता ? अस्याः पितरौ चिन्तितौ न भविष्यतः किम् ?' जनन्या जिज्ञासितम् ।

'नैव दूरभाषणे समूचितमनया यदद्य मातः भोजनमत्रैव विधास्यति ।' विजयः प्रत्यभाषत ।

'किं सायम्भोजनमपि मयैव कल्पनीयम् ? न तत् सुकरम् । अहं तु भृशं परिश्रान्ताऽस्मि । नयैना कमपि भोजनालयम् । तत्रैव भोक्तव्यं युवाभ्याम् ।' कथंचिदेवं सा प्रतिवचनम् ।

'बाढम् । परं चिन्त्यं यावत् चाऽऽगमनं तावत् न कार्यं चिन्ता करणीया त्वया । बाह्यकक्षस्य तालकं गृहीत्वा गमिष्याम्यहम् । अतो न जागरणीयं भवत्या मातः ।' मातरं समाश्वासयन्निव विजयः प्रावोचत् ।

माता न प्रत्युत्तरितम् । हेमां प्रति दृष्टिं निक्षिप्य सा गृहं तं प्रविवेश द्वारार्गला च योजयामासाऽभ्यन्तरतः । ततस्तु विजयेन हेमामभिलक्ष्य कोऽपि नयनसङ्केतः प्रहितः । तया च सहासं भ्रूभङ्गेन सङ्केतग्रहणं सूचितम् ततस्तौ प्रस्थितौ ।

× × × × ×

कतिपयहोराऽनन्तरं कपाटोद्घाटनस्य ध्वनिः श्रूयते । अनेन विजयस्य प्रत्यागमनमनुमितं जागरितया जनन्या । आश्वस्तैव सा पुनरपि शयितुमियेष । परं सुतस्य कक्षे कर्णे जप इवाऽऽश्रुयत । गायाम सम्भवमानीता काऽपि हास्यध्वनिरिव तस्कर्णकुहरयोः समागता । ततस्तदनुमीय विमर्श्य तत्रैव वृद्धा मनस्येव चुक्षोभ । परिश्रान्तिवशात् सा न शशाक धैर्यं प्रताडयितुं च नैजं सुतम् । परं निद्राप्यलभ्यैव सञ्जाता । पार्श्वपरिवर्तनान्यपि कियच्चिरं विदध्यात् वराकी सा ? चिन्तनसागरे समाश्रयाऽपि नाऽलभत् सा किमपि स्थिरीकर्तुम् । अवशमानसा विज्ञाय सा सुषुप्तेऽवाऽधिकान्ता । पतिस्मृतिं पूर्वमेव त्यक्तवती एकाकिनी तां स्वगतम् । सामग्रयाऽनन्तरं विजयं जनितमलभत । तथाऽप्यैव सा यथाकथञ्चिज्जीवनं यापयति स्म ।

परं तस्य आधारोऽपि निर्मूल इव सञ्जातः । 'धिगेतादृशं पुत्रम् । न खलु विचारयति स पितृकुलस्य मातृकुलस्य वा प्रतिष्ठाम् ।' तथा निगदितं मनस्येव ।

तदनु कदा खलु निद्रावशं समुपगता सेति तु तया नैव ज्ञातम् । परं कपाटोद्घाटनमुद्रणाभ्यां पुनरपि जागृतिमापन्ना सा । झटित्युत्थाय सा मुख्यद्वारमुद्घाटयामास ददर्श च मन्दमन्दं गच्छन्तीं कामपि युवतिं किञ्चिद्दूरे । पृष्ठाकृत्या परिधानेन च हेलायाः आकृतिं समर्थेन प्रत्यभिज्ञानं तया । एतद्दृष्ट्वा बहुकालं यावत्तत्रैव तस्थौ सा । परं रक्षिणी तु सम्प्रति न किमपि द्रष्टुं पारयामास तु ।

'अम्ब ! किं पश्यसि ?' विजयः पृच्छति स्म । चिरं स पृष्टेन स्थित्वा मातरमवलोकयति स्म । सततमेव रात्रिगतं रहस्यमनावृतमिति तु नैवाज्ञात त इति ।

'पश्यामि स्वकीयं दौर्भाग्यम् ।' समुद्विग्नेन वचसा प्रत्युत्तरं दत्तं प्रयच्छन्त तया ।

'परं न कोऽपि स्वपने निवामाने दौर्भाग्यं दृष्टवा ।" मुखेन वाक्चातुर्यमिव प्रदर्शितम् ।

'गृहान्तः प्रविष्टमतः न निवर्तते मत्करम् । विजय ! वारितश्च त्वम् । न शोभनीयं त्वया विपरीतया सह । सर्वथैवाऽशुभावहा भवन्ति स्वच्छन्दोऽप्येतादृश्यः पुत्राय । अनया ता खलु पितृकुलं भर्तृकुलं नाऽवलम्बितुं क्षमन्ते । अतोऽस्याः साहाय्यं सद्य एव परित्याज्यम् ।' उपदिदेश सा पुत्रमेनम् ।

"अलं भाषणेन मातः । तामहं परिणेतुमिच्छामि । तयाऽपि स्वीकृतो मदीयः प्रस्तावः । अत्रैव तत्पित्रोरनुमतिं सम्प्राप्य वाग्दानस्य घोषणा करिष्यते पक्षद्वयेन । अतस्त्वया न किमप्यन्यत् चिन्तनीयं कथनीयं च ।" विजयस्य कथनं तुष्टि-सम्मिश्रितं समाश्वासनमिवाऽभाति स्म ।

वार्द्धक्येन प्रपीडिता सा तादृशेन पुत्रवचसा किमपि वैकल्यं सम्प्राप्ता । क्षणार्धं यावत् सा तनुजस्याऽऽननमेव निभालयामास । न विश्वसितं तया यदद्यास्य मस्तकं गुणतृणैरेव परिपूर्णम् । न कदापि चिन्तितं तया यत् तस्याः स्वकीयस्तनयः स्वविवाहार्थं मातुरनुज्ञामप्युपेक्षिष्यते । तदीया वार्द्धक्य-तरणी तु साम्प्रतं मध्ये समुद्रं निमज्जति सर्वथेति दृष्टया । न किमप्यवशिष्टं तज्जीवनार्थमिति निश्चित्य सा प्रोवाच-

"यावज्जीवं त्वहं न तां प्रवञ्चनामयीं पुत्रवधूं स्वीकरिष्यामीति जानीहि त्वम् । अपरञ्च न चेत्त्वं त्यजसि स्वगृहं, तदाहं यत्र कुत्रापि यास्यामि, भिक्षावृत्तिं चाश्रित्य अवशिष्टं जीवनं यापयिष्यामि ।"

श्रावयित्वैतत् सा प्रत्युत्तरमश्रुत्वैव स्वकक्षं प्राविशत् । कक्षाभ्यन्तरञ्चा-ऽर्गलामयोऽभवत् । विजयोऽपि क्षणं यावदन्तर्हितया जनन्या स्थितायाः स्थले स्तब्ध इवाऽतिष्ठत् । ततश्च स स्नानादिनित्यकर्माणि कृत्वा गृहान्निरगात् । अहिंसाविषयविचारौ तु तेन तदीयमाताऽधाने निहितौ । एवं ह्यनु स प्रसवित्रीं प्रति वैमनस्यभावेन व्यवहरति स्म ।

× × ×

त्वरितगत्या स श्रीविश्वसुरस्य गृहमाजगाम । परं नाऽरोचत प्रातरेवेदृशो-ऽतिथेरागमनं हैमायाः पित्रे सेनमहाशयाय । रूक्षेणैव स्वरेण तं पृष्टम्—

"किमिष्यते भवता ?"

"हेमां मिलितुमिच्छामि ।" विजयस्य स्वरः धिक्कार इव प्रतीयते स्म ।

"स्वपिति सा । अतोऽपराह्णे समागन्तव्यं भवता ।" सेनमहाशयेन वार्ता-समाप्तिरिव सूचिता ।

"परं तदर्थमाह्नि समागतोऽस्मि । कार्यं चाऽत्यावश्यकम् । पश्यन्तु श्रीमन्त-स्तावज्जागृता न वा सा ।" एवं स दृढमाग्रहं प्रकटीचकार ।

श्रुत्वैतत् सेनमहाशयो भृशं चुकोप । तन्नयनाभ्यामग्निस्फुलिङ्गा इव वर्षितु-मारेभुः । तदीयावोष्ठावपि स्पन्दनबाहुल्यवशान्नर्तनमिव चक्रतुः । नैव स स्वगृहे येन केनाऽपि बालिशेन निर्देष्टव्य आसीत् ।

"निष्क्रमणं विधेहि तावत् । न मां दिदृक्षते कमपि । सद्योगृहात् सद्य एव प्रयाता सा त्वदर्थं न किमपि कथयामास ।" उदीर्यैतत् स परावर्तत ।

"शृणुत यूयम् ।" स्वरं कोमलं नम्रतामानीय निजगाद सः । "हेमायाः सान्निध्यं स्पृहणीयमासीदेतत् परं नैवाऽनुमन्यत तत् खलु भवद्भिः । अत एतत्तु कथ्यते— तद्वार्तैव मया ।"

"अस्तु । त्वरस्व तावत् ।" अपावर्तयत् सेनमहाशयः प्रावोचत् ।

"मया त्वेतदेव निवेदनीयं यत्   ।" तदीयं वाक्यमपूर्णमेवाऽवर्तत ।

"किं तन्निवेदनीयम् ? शीघ्रता विधेहि । मया त्वन्यान्यपि कृत्यानि विधेयानि ।" समयविनाशेन भृशमसन्तुष्टेन सेनमहाशयेन ।

'श्रान्तां त्वेषा , न जाने कुतो न वा परम् ।"
पुनः वाक्यसञ्जननेन तस्य भीतिः स्फुटमायाता ।

'किं त्वं परं पश्यसि वदसि ? कथय किं वक्तुमागतोऽसि । अन्यथाऽशु पुरः स्थास्यामि अहम् ।" विजयं तर्जयन्निव पतीयते स्म सेनमहाशयः । विजयस्त्वेतस्मात् ताडनया समधिकं विस्मयाञ्चकार । हेमानेनैतस्मादभिज्ञाता तदा तु सर्वमेव सुस्पष्टं अभविष्यत । परं सा तु मुग्धा स्वपितीति विचिन्त्य स भृशमशोचत । भीतेन मया न किमपि साधयितुं शक्यते, इत्यपि स विचारयामास । एष अवसरो न पुनरागमिष्यतीति कृत्वा स साहसं सङ्गृह्य समेत्यावदत्— 'उद्वोढुमिच्छामि हेमामहम् । तया चाऽनुमतोऽस्मि प्रेम्णोऽनुमतेन । साम्प्रतं भवतामाशीर्वचांसि याचेऽहम् ।"

"किम् ! किम् ! उद्वोढुमिच्छसि हेमाम् ?" कथयित्वैतत् सेनमहाशय उच्चैर्जहास । 'तत्पूर्वं तु स्वमुखं पश्य कस्मिन्नपि दर्पणे । न जाने कतिसहस्राणि त्वादृशाः पुरुषास्तत्रैव कामयन्ते मदीयां पुत्रीं सम्प्रति गदृश्य ।' नव स उपहसितवान् स प्रश्नोत्तरम् ।

'न कामयेऽहं भवत्सम्पत्तिम् । याचेऽहं केवलं हेमामुद्वाहार्थम् ।' इत्युक्त्वा दुःखेन प्रारोचत् ।

"परं निःस्वस्य गृहे न खलु क्षमते मदीया पुत्री । तस्याः पूर्वे स्वपितृगृहे तु दैनिकाय व्ययायाऽप्यपर्याप्तम् । किं तादृशं वर्तते त्वत्सामर्थ्यम् ?" कथयाऽपि हीनतया विजयं पश्यन्नायान हेमायाः जातः ।

"नहि, न क्षमेऽहं तादृशे व्ययाय । अधुना स्वाधीयानोऽस्मि । परं मत्पिता मम परिवारोऽस्पृश्ये निपति द्रव्यमर्पयित्वा कोषागारे । अध्ययनसमाप्तिं यावत्तावत्सुखेनास्मदीयं जीवनम् ।" विजयेन नम्रतया निवेदितम् ।

"गच्छ तावत् । अध्ययनं समाप्यैवाऽऽगमनीयं त्वया ।" सेनमहाशयेन निगदितम् ।

एतदन्तरे हेमाऽपि तत्राऽऽजगाम । तां दृष्ट्वा विजय समुत्साहित इव जातः । परं तिरश्चीनदृष्टिनिपातनेन तदीय उत्साहः शनैरेवाऽपसृतः ।

'किमर्थं न ब्रवीषि त्वम् ? किमावयोरुद्वाहे व्यवधानमस्ति ?" हेमा प्रपृच्छत ।

"कीदृशो विवाहः ? मया तु नेष्यते किमपि तादृशं कथनम् । परिहाससंजल्पनं तु सर्वथैव विस्मरणीयं त्वया । अस्तु । महाविद्यालये मिलिष्यावः आवाम् ।" इति कथयित्वा निर्गता सा गृहात् ।

हेमाया वचोभिस्तु विजयस्य हृदयं विदीर्णमिव सञ्जातम् । यस्याः कृते स स्वजननीमपि तिरश्चकार, सा तु प्रस्तरप्रतिमेव बाह्यं सौन्दर्यमेव धत्ते । तदन्तस्तु हृन्नाम्ना हृदीकेन स्फुरणमपि न विधीयते इत्येव सम्प्रधारितं भग्नमानसेन विजयेन । किन्तु अद्यैव निर्णयो जात इति कृत्वा स कथमपि किमपि धैर्यमङ्गीचकार । न कोऽपि लाभस्तत्र स्थितेनेति सञ्चिन्त्य स स्वगृहाभिमुखं प्रतस्थे ।

X X X X X

गृहद्वारं तु तथैवाऽनावृतमासीद् यथा तेन त्यक्तम् । एतद् दृष्ट्वा स कयाऽप्य-निष्टाऽऽशङ्कया विचलित इव समजायत । ततश्च स त्वरितगत्या गृहान्तः प्राविशत् । स्वकक्षमधिशयाना जननीं सदृश्य तदीयाः प्राणास्तु प्रतिनिवर्तिता इव सञ्जाताः ।

परं तज्जननी तु निश्चेतनवाऽऽसीत् । पुत्रेणाऽऽकारिताऽपि सा प्रत्युत्तरं नाऽददात् । ततस्तु त्वरमाणेन तेन मातुर्हस्तं नाडिका संस्पृष्टा । किञ्चित्कालं तु स किमपि स्पन्दनं नाऽन्वबभूव, परं शनैः शनैः नाडिकायाः स्पन्दनाऽऽभासं मुख-रतामापेदे । एतेन खलु समाश्वस्तोऽपि स दूरभाषेण पारिवारिकं चिकित्सकमुदा-जहार सद्य एव समागन्तुम् ।

चिकित्सकेन नाऽधिको विलम्बः कृतः परं तदन्तरे विजयस्तु मातृचिन्तया भृशमव्यथत । तदङ्गानि च यदा कदा प्रकम्पनमिवादधुः । निश्चितरूपेण न जीविष्यति स मातरि दिवङ्गतायां मञ्जार्मि । तु स्पष्टमेव प्रतीयते स्म ।

एतदन्तरे चिकित्सकः समाजगाम तत्र । तेन तु हृदयपरीक्षणयन्त्रेण रुग्णहृदयमचिरादेव परीक्षितम् । तदनन्तरं कोऽप्यौषधोपचारस्तेन प्रारब्धः । प्रथमं तु स किमपि द्रवौषधं हस्तनाडिकायां निचिक्षेप । तदनन्तरं च तेन किमपि हृदय-संवाहनं विहितम् । रुग्णायाः प्रतिक्रियां च दृष्ट्वा स नितरामतुष्यत् । ततस्तु विजयं यथोचितं निर्दिश्य निर्गतः सः ।

किञ्चित्कालानन्तरं जनन्या पार्श्वपरिवर्तनं विधाय स्वनयने समुन्मीलिते । स्वपुत्रं च पार्श्वे स्थितं समालोक्य सा प्रमुदितेव सञ्जाता । विजयस्तु मातुश्चरण-योऽवनतः क्षमामेव याचते स्म ।

स्वीकृता

डॉ० नन्दकिशोर गौतम् 'निर्मल'

व्यतीतोऽथ निशीथकाल । विभावरी चन्द्र द्रष्टुं समुत्सुका । निशाकरेण निजकरैः रजनीनायिकायाम्तमावगुण्ठनमपाकृतम् । स्वप्नभावनाभिश्चिन्तितो दामोदर सहसैव जागृत । चन्द्रेण मिलिता रजनी विलोक्य तस्य हृदये स्वप्न साकारं कर्तुं लालसा जाता । "हे निशानाथ ! कदा तद्दिनमागमिष्यति यदा मम निर्धनस्य कन्यापि निजवरेण स्वीकृता भविता ।" उक्तं मनसि तेन । स शय्यामुपतिष्ठन् । मनसि महद्दुःख भारमनुभवन् चिन्ताजालमापतितोऽय पर्याकुलोऽभूत् । निशा धूसरा जाता । उषानागरी समागता । स्नानादिकं कृत्वा, पाथेयं नीत्वा आत्मजायै वरमन्वेष्टुं नगरान्तरं प्राचलत् स ।

देवदासेन पूर्वमेव प्रबोधित स इन्द्रपुरीमवाप्य धनाढ्यं सुरेन्द्रमुपागमत् । भव्य प्रासाद विलोक्य तेन कल्पना कृता "कियत् सौभाग्य मे बालायाराधायाश्चेत् गृहस्यास्य गृहिणी सा स्यात्" किन्तु निर्धनतया तेन चिन्तितं यत् इयं सुकल्पना, न कदापि सत्य भवितुमर्हति । पुनरप्यन्तर्मनसा स साहस कृत्वा अजिरे स्थित्वा सुरेन्द्रमहाभाग ! सुरेन्द्रमहाभाग ! इति वारद्वयमाकारयत् । सुरेन्द्रोऽपि अजिरे भद्रपुरुष विलोक्य नमस्कृत्य पृष्टवान् "कुतः समागता श्रीमन्त ?

दामोदर — उज्जयिनीत ।

सुरेन्द्र — कथ्यतां कथं समागमनं भवताम् ?

दामोदर — श्रेष्ठिवरदेवदासेन प्रेषितोऽयं नन्दनात्मजो दामोदर । श्रीमतां दर्शनार्थं समुपस्थित ।

"अहा ! हा ! हा ! देवदासस्तु अस्माकं परममित्रमस्ति । इति उक्त्वा सोऽजिरमुपगम्य दामोदरस्य वरं करेण गृहीत्वा निजातिथिकक्षं नयति । किञ्चित्-काल वार्तालापानन्तरं दामोदर पृच्छति "श्रीमतां पुत्रस्तु अत्रैव स्यात् ?" "नहि नहि आयुर्विज्ञानशिक्षाप्राप्त्यै स तु भूपालनगरे वर्तते, चित्रं द्रष्टुमर्हन्ति भवन्त ।"

कियत्कालानन्तरं सुन्दरेण उपायनरूपेण दशसहस्रमुद्राणां प्रस्तावः प्रस्तुतः । दामोदरस्यार्थाभावं दीनभावं च विलोक्य सप्तसहस्रमुद्राः स्वीकर्तुं प्रसन्नोऽभूत् । दामोदरस्तु तस्मिन्नेव काले पण्डितवरं समाहूय विवाहार्थं दिनं निश्चितवान् । यद्यपि दामोदरो धनाभावेन ग्रस्त आसीत् किन्तु निजकन्यायाः मङ्गलाय स मनसि निश्चारयामास यत् भवतु नाम मम गृहस्य विक्रयः परन्तु राधायाः विवाहं शोभनं करिष्यामि यतो हि राधैव तु मम एकमात्रसन्ततिः ।

दामोदरो वरयात्रागमनात् पूर्वमेव निजगृहं न्यासीकृत्य पञ्चसहस्रमुद्राः प्राप्तवान्, परं दौर्भाग्येन विवाहदिवसात् पूर्वस्मिन् दिवसे तद् धनं चौरैरपहृतम् । तथापि दामोदरो धैर्यं न त्यक्तवान् तस्य मस्तिष्के विचारोऽयं समुद्भूतम् किन्तु पुनः धैर्य मालम्ब्य तेन निश्चितं यत् विवाहानन्तरं सर्वं समाधास्यामि । वरयात्रा तस्य द्वारं समागता परं तेन न कस्मैं अपि निजदुःखस्य वार्ताभिहिता । वरपक्षजनैः सानन्देन भोजनं कृतम् । सर्वाणि औपचारिकमङ्गलाचाराण्यपि जातानि । सप्तपदीय काले तन्निकटे विलोक्य सुन्दरो दामोदरं जगाद दामोदर महोदय ! स्ववचनं पालय ।'

दामोदर — नूनमेव वचनं परिपालयिष्यामि मङ्गलविधानानन्तरम् ।

सुन्दर — (शान्तदृष्ट्यावलोक्य) दामोदर ! वचनं परिपालय । समयः सञ्जातः ।

दामोदरो दीनवचसा उवाच महोदय ! ह्यो मम गृहात् उपायनराशिश्चौरैरपहृतः इमानि वचांसि श्रुत्वा सुन्दर एव क्रोधान्वितो भूतः यत् वधूं तत्रैव त्यक्त्वा निजावासं प्रयातवन्तः । दामोदरोऽनया घटनया महद् दुःखमनुभूय पञ्चत्वं गतः । दामोदरस्य स्वर्गवासेन राधायास्तस्याः जनन्याश्च हृदये विदीर्णे । किञ्चित् कालानन्तरं उपायनराशिन्यासधारिणा श्रेष्ठिना न्यासीकृतं गृहम् अधिकृतम् । अधुना राधा तस्याः जननी च निजगृहं त्यक्त्वा अपरस्थाने निवसतः स्म । राधाजनन्या एतत्कष्ट-शमनाधारे कस्यचित् श्रेष्ठिनः पाचकवृत्याः कार्यं स्वीकृतम् । एकदा राधाजननी रुग्णा जाता, तदा तया स्वस्थाने निजतनया राधा पाकसेवायै प्रेषिता ।

विवशमनसा राधा श्रेष्ठिगृहं गतवती किन्तु नवयौवनां राधां विलोक्य श्रेष्ठिनः मनसि दुर्विचाराः जाताः । श्रेष्ठी राधामनुचितदृष्ट्या दृष्टवान् परन्तु राधया तद्मर्माभिज्ञातम् । अवसरं च दृष्ट्वा सा मौनमालम्ब्य पराङ्गता । गृहमुपागत्य सर्वं मातुः निवेदितं तया । राधाजनन्या विपत्तिकालं विलोक्य निश्चितवती यत् राधा कतिपयदिनानि श्वसुरगृहे गच्छेदिति । सान्त्वनवाक्यैः सा राधामुक्तवती श्वसुरालये पश्चात् त्वया तत्रैव कथमपि स्थातव्यम् । माता गता सा श्वसुरगृहमुपगतवती परं सुरेन्द्रेण न स्वीकृतवान् । राधाजननी तु कानिचित् दिनानि धनीय अनन

महद्दुःखेन पतिमार्गम् अगमत् ।

इदानीं अस्याः भीषणतरः कालः समागतः । तया जीवनयापनाय स्यूतिकार्यं प्रारब्धम् परन्तु दुष्टयुवकानां दुराचरणात् तस्यास्तत्र निवसनमसम्भवं जातम् । राधा तत् स्थानं विवशतया त्यक्त्वा निराश्रिता च भूत्वा लक्ष्यहीनेव अचलत् । सम्मुखमेव रेलगन्त्रीं प्राप्य विना विचारेणैव सा प्रथमश्रेणिकक्षमुपाविशत् । किञ्चित्-कालानन्तरमेव यात्राप्रमाणपत्र निरीक्षकः समागतः । सः राधां यात्राप्रमाणपत्रं दर्शयितुं पृष्टवान् ।

मृगीव भयभीता राधा अवरुद्धकण्ठेन रुरोद । राधायाः करुणावस्थां दृष्ट्वा सम्मुखासीनस्य युवकस्य हृदयं करुणयाप्लावितम् । दयार्द्रेण तेन तस्यै बालायै शीघ्रमेव यात्राप्रमाणपत्रं निरीक्षकात् । तत परं स तां पृष्टवान् कुतः आयाति भवती ? कुत्र च गमिष्यति ? कथं च यात्राप्रमाणपत्रं न नीतं भवत्या ? परन्तु अबलया तया न किमपि प्रत्युत्तरं दत्तम् अपितु अवरोधानन्तरमपि तस्याः नेत्रयोरबाधाश्रुधारा प्रवहति ।

सहसैव युवकस्य दृष्टिः राधायाः मुद्रिकायामतिष्ठत् । मुद्रिका सा अभिज्ञा-ता । चिन्तितं तेन तदा यत् इयं मुद्रिका तु मया भगिन्यै समर्पितासीत् । साहसं कृत्वा स पृष्टवान् 'अपि भवती राधा ?' रुदन्ती सा चकितवती उवाच' कथं भवद्भिर्ज्ञातं यदहं राधास्मीति ?' युवकोऽपि जगाद 'अङ्गुलीयकमिदं कथयति । कुत्र तव पितरौ ?'

राधा — उभौ तौ स्वर्गं गतौ । अनाथाहमेव दारुणेऽस्मिन् संसारे जीविता ।

शनैः शनैः सा सर्वां कथां तस्मै श्रावयामास ।

युवक — वैक्लव्यं मा स्म गमः इन्द्रपुरीवास्तव्य सुरेन्द्रात्मजोऽहमेव अमरनाथोऽस्मि ।

राधा चकितचकिता भूत्वा लज्जया अवनमिता । सजलनेत्राभ्यां तया पृष्टम्" कस्मात् कारणात् गृहं गच्छति भवान् ?

अमरनाथ — जनकात् पत्रं प्राप्तम् । तेषां स्वास्थ्यं नास्ति समीचीनम् । चल
त्वमपि मया सह पितृपादसेवार्थम् ।

राधया मन्ये पुनर्जीवनं प्राप्तम् । स्वामिनः औदार्यं प्राप्य सा सनाथवती । गृहं गत्वा तया हृदयेन एतादृशी श्वसुरसेवा कृता यया तस्य हृदयमपि परिवर्तितम् । वृद्धावस्थायाः कारणात् सुरेन्द्रः दिवं गतः परम् अमरनाथेन सार्धं राधा तु जगत्य-स्मिन् सुखमनुभवति ।

राष्ट्र निर्माता

ईश्वरानन्द शर्मा

जनार्दनोऽवसरप्राप्ताध्यापकोऽस्ति । जीवनस्य महान् भागः शिक्षणकार्ये एव सोऽतिवाहितवान् । मण्डलस्य क्वापि शिक्षणसंस्था नासीद् यत्र तस्य सहयोगो न अभवत् ।

जीवनस्य सन्ध्यायां वर्तमानस्य तस्य मुखं विनाऽपि सत्कालं प्रति सहानु-भूतिप्रदर्शनमन्तरा क्वाऽपि न तिष्ठत् । ग्रामस्य मुख्यभागे तस्य जीर्णशीर्णं पैतृकमपक्-वगृहमभवत् । जरसाभिभूतोऽवसरप्राप्तवेतनेन स तस्मिन्नेव निवसति । कामना तु तस्येयमासीद् यत्तस्य स्थाने पक्वेष्टकाचितं चतुरस्रं गृहं निर्मितं भवेत् किन्तु कामना कामनैवास्थात् ।

गृहस्य बहिर्वेदिकायां निम्बस्याधस्तात् तस्य मूलपृष्ठं निधाय स आसि-तुमतिष्ठत् । सम्प्रति वायुः परिवर्तितो जातः । यौवने यदा तेन कृष्णमुष्णीषं पर्यधायत, तस्य स्थाने समुज्ज्वलं खादिनिर्मितं तदाऽऽननमासीत् । यत्र तस्य शुक्लश्वेत-शिरःकेशाः स्पष्टं द्रष्टुं पार्यन्ते । धौतवसनपरिधानादिकं तथैवासीत् किन्तु तस्य प्रशान्तस्य मुखं त्वरया नागच्छति । तदर्शनस्य शिक्षकस्य हितभाषणस्य वर्षा पूर्णमासमनु कथमपि नो सङ्कुचति । अत्र ग्रामे तदध्यापिताः बहवः युवानः सन्ति । तेषु कोऽपि गतिमागतिं च कुर्वाणः 'गुरुवर ! प्रणामाः' इति वदति तदा स स्वकीये निमीलिते नेत्रे उन्मील्य आशान्वितेन चक्षुषा पश्यति, किन्तु तदनन्तरमागन्तुकः दूरं एव प्रयाति ।

ग्रामस्य स्थविरो ग्रामणी, यः तस्य बाल्यसहाध्यायी समभवत् यदा कदा तस्य समीपे तिष्ठति । स प्रतिभावना यथवनत्रोच्चपदासीनानां स्वशिष्याणां कथानकं सोत्साहमाख्याति । तत्प्रसङ्गे स सोच्छ्वासं भाषमाणोऽश्रूयत "यद्गुरुर्द्रो-णिष्ठः शिष्यः शक्रतामितः" । किन्तु तत्र स्वनिर्मातारमेव व्यस्मरत् ।

रविरस्तङ्गतः । ग्रामे यातायातमारब्धम् । दिवाकरः समस्तं दूरतः विगतप्रकाशमानाय । शिशिरस्यापरपारं प्रयातुं दृश्यते । यामिनी पश्चिमादाय

मिति ग्राहमागता । 'किमद्यापि स ग्राहकः नायातः' द्वाराभिमुखं पृष्ठं विधाय स्थितं स्वपतिमवलोक्य सावोचत्

जनार्दनस्तिमिरे नेत्रे प्रक्षिप्य न जाने किमन्वेषयन् आसीत् । तेन यामिनी वार्ता न श्रुता भवेत्, यदि श्रुतापि तदा तदुत्तरं दातुमुचितं नामन्यत । तन्मुखं पूर्वतोऽपि भृशं श्यामायमानं जातमासीत् । यामिनी तस्मादपि शुष्का सती कण्टकमिव जाता । सा सन्ध्यायां धूमिलान्धकारे स्वपतिं दिशि करुणापूर्णनिर्निमेषं ध्यानपरायणा सती निरीक्षमाणाऽभवत् । यौवने मुखमिदं कीदृशं प्रभासमानमासीत् । यदाहं परिणीय पत्युः सदनमागताऽभवम् ।' अद्य सर्वं कायं चर्मास्थिपञ्जरात्मक एवावलोक्यते । तस्या ध्यानं पश्चवाद् बहिर्निर्गतहस्तयोरुपरि गतम् । पादौ जानुनी, कपोलौ पूर्वं नवीनविशिष्टौ मांसस्थाने वलितं चर्मैव प्रतिभाति । दह्यमानानि वस्त्राणि केवलान्यस्थीनि गोचरीभवन्ति । तदपि दशदशयामिनीलोचनाभ्यामश्रूणि प्रावहन् धर्मे दिनीपदाञ्चलं सितम् । सा मौनमवलम्ब्यैव प्रतिनिवृत्ता । यष्टिध्वनिना जनार्दनस्य ध्यानं भग्नम् । धर्मपत्नीं दृष्ट्वा नेत्रयोस्तेन गहनं प्रसृतम् । स तां निरीक्ष्य मुद्रितनेत्र एवोचे । त्वया किमपि भणितमासीत् ?

सा वन्ध्या मनो परावृत्य चक्षुर्भ्यां निषेधं विधाय चिन्तितोदासीनमुद्रायामेव शिरोऽकम्पयत् ।

जया नागता किम् ? सो वोचत् भवान् द्वारि तिष्ठति । सा इतएवागमिष्यति । धर्मपत्नी शनैरवदत् ।

धाम विस्मृतम् ? सा कथं नागता ? घनान्धकारे तस्या अनागति चिन्ताया विषय इति पिता जगाद ।

चिन्तामापन्नः स क्षणेक्षणे वर्धमानान्धकारे पश्चिमायां दिशि दत्तदृष्टिरतिष्ठत् । सान्द्रतमसि द्विहस्तदूरस्थमपि वस्तु द्रष्टुं न शक्यते । यामिनी यथागता तथैव निजगाम ।

नागता जयेति विपश्यन् जनार्दनो दीर्घं निश्वासं तत्याज । स्वकीयाऽऽर्थिककष्टया स भृशं विव्यथ । सोऽचिन्तयत्—

समाजं जीवनपर्यन्तं सेवमानस्य मम कृते स किमकरोत् ? मह्यं राष्ट्रनिर्मातुं दीयमानं पदमुपहासास्पदमिव प्रतिभाति । मम शिष्याः सर्वक्षेत्रेषु कर्मसम्पृक्ताः सन्ति । परन्तैरपि किमहं कदापि संस्मृतः ? पुरस्काररूपे अवकाशप्राप्तवेतनं शतमात्रमुपकल्पितमेवाहम् ? समाजस्य दृष्टौ मदीयमूल्यमेतावदेव ।

अतीताध्यापकजीवनस्य स्मृत्या तस्य समग्रं शरीरं रोमाञ्चितं जातम् ।

जीवनसङ्कटं वयं बोध्यमापद्यामहे । सर्वैर्देवाधिकं वृद्धकर्तव्यानुभवा । पितेजीवन
मारब्धम् ततोऽयोगेन च जाता । यद्गृहं पूर्वपुरुषोपार्जितं दायभागे प्राप्तं तस्य
पुनरुद्धारायापि नैव समर्थम् ? तथैव भग्नावशेषं सम्प्रति अत्यन्तैवरक्षाचिन्तन
मयापि न ? ममममध्यापनव्यवसाये कापि सम्मानदृष्ट्या नैवायमस्ति । भूति प्रसङ्गेन
राष्ट्रनिर्माणकर्मणि मत्कर्मणामादृतम् एवादरम । सम्प्रति स्वयमस्मिन् अपरिचित
इव आपतितोऽस्मि । मया सह कस्यापि सहानुभूतिः प्रेमचापि नोदरीदृति ।
विभूक्षा सह प्रवृत्ता यामिनी जीवनस्य यात्राया विशेषेण आर्थिककष्टमवाप्नुवन्ती ।
कदापि बुभुक्षानिवारणाय उदरं नो पूर्णम् । तस्या अश्रूणि नित्यं नेत्रे विलोक्य मम
धैर्यस्य सीमा न तिष्ठति । बालकस्यैव तेषु यथा पीडनं दारुणमवाभवत् ।
भोजनाच्छादनयोरुचितापि व्यवस्था नैव जाता । मन्ये मिश्री भूषापि सा मम आ-
भूषणमनादिसंज्ञामामयी कदापि नाऽयाचत । सा नोऽजानात् स्वादिष्टं मधुरं
भोजनं किं भवति । शोभनानि च परिधानानि कानि भवति । सा मामाल्य वचन
प्रत्य सास्चलन नेत्रवारि प्रमृज्य स्वगृहकार्ये संलग्नाऽतिष्ठत । त्यागस्य तस्मैव
किं फलं जातम् ? इतिमत्वं मा पाकलय स्थिता मती तथा राष्ट्रनिर्माता चास्यैव
निष्क्रियादस्याधस्तात् वदिकाया जीर्णशीर्णास्तरणमासीत मसक्तविस्तृतहरिताभ्या
वनितानि क्षत्राणि निरीक्षमाण एवासीत ।

तस्याध्यापकस्यान्ते वयस्या विविधव्यवहार कुर्वाणा सदाधिक
स्थिताश प्रमोदनाना अवनीरत । नेपागृह धनधान्य सुखसमृद्धिभि परिपूर्णमासी-
जीति । तद्धि शिक्षास्तु कामनया चतुर्दिशनिरीक्षन किन्तु सर्वत्र भयङ्कुर्तवता-
वयत । व्यवसायस्यास्य कारणात् सर्वैः वास्योत्साहशक्ति निष्ट । जीवनस्य थान्त्या,
निष्क्रियतया सह शरीरमपि साहाय्य ना विदधाति । जीवनसन्ध्याया निर्धनतया,
परधीनतया, व्याधिना च पूर्णत प्रतिबद्धोऽस्ति, अत विगृह्य कोऽप्युपायोनो-
दृश्यत । अशक्तविग्रह राष्ट्रनिर्माणकार्य फलाभाव विडम्बनैव प्रतीयत । अस्याम-
वस्थायामपि तत्र स्वकर्तव्य सुचारुरूपेण परिपालितम् । देशनृभि समाचारपत्रं
जननायकैश्च राष्ट्रनिर्माता स्वशक्त्य सर्वोन्नत मानसमुत्तुङ्गमिव जातम्, किन्तु
तस्य तत्र स्वकीय धिक्परान्नस्यध्यानमवापारितमासीत ।

सहसा देहे कम्पानुभूतिरभवत् । जीर्णकम्बल शरीरादपगतम । छिन्न
भिन्नवसनमध्यात् शीतलसमीर बाण इव कायान्त प्रविशति । तदैवजयाऽस्या ती-
क्ष्ण । सैव जीवनस्य सहती तस्याशा । वृद्धतायाः आधार एकान्ततोऽवशिष्टा ।
सा काष्ठभार निरस्य शूचा तस्मिन् त्वरयाऽस्यपार्श्वे विशिष्यन्ती समीपमागतातस्य ।
सयतस्य विधायापि तस्या मुखमवलोकितु नशेके । सैवैकमात्रगन्तानमवशिष्टा ।

मन्त्रिमा तस्य जीवनमेवाऽऽसीत् । तनुजाऽभावग्रस्ता सती यौवन एव वार्धकमनुभवन्ती प्रतिभाति । तस्या पाणिग्रहण कोऽपि युवावरो नो कामयते । कन्यामन्तरेणापर नत्रकिमासादनीय भवेत् ? दायजे किमपि वित्त दातु जनार्दनस्य सामर्थ्यमेव नासीत् । निर्धनस्य कन्या क परिणयेत् ? जया स्वपितु दारिद्र्य परिचिनोति । सा स्वय वनगत्वा छित्वा च काष्ठानि गृह समानयत ।

काष्ठभार प्राङ्गणे धृत्वा बहि स्थितपितर विलोक्य चिन्तामापेदे "यदस्य सेवा कथ कुर्याम् ।" न कोऽपि मम पितर परिचिनोति, किन्तु ममाराध्यदेवस्त्वयमेव । सा प्राङ्गणात् बहिर्वेदिकामागता, यत्र पिताऽर्धमूर्च्छितावस्थायामासीत् । त्वरया त सा कम्बलेनाच्छादितवती । आञ्चलेनाश्रूणि प्रमृज्य साऽवदत् । 'शैत्य तु नो बाधते पितरम्" ? स तामश्रुमुखी चिर स्नेहेन सकरुणमपश्यत् । पितुस्ता दशा द्रष्टु सा नो शशाक । सा तत्कण्ठग्राह तारस्वरेण रोदितुमारब्धवती ।

अन्धकारोघनीभूतोऽभवत् । निम्बतरोर्नीडेष्वौकसणापरायणावभवताम् । मासान्तेविशेषतोदिनत्रयात् भोक्तु किमपि न प्राप्तम् ।

तस्य दृष्टि क्षितिजपारात् परावृत्य पुन पुन मार्गमायाति । सन्ध्याया तिमिर छाया मधूकपादपस्य पार घनीभूताऽभवत् । तस्यागा समजनि । कोऽपि पदस्पर्शोऽश्रावि । क्रमशो मानवाकृति दृशे । निराशासागरनिमग्नस्य वदने आशाप्रचरोऽभूत् । 'तनुजे ! पत्रवाहक गवासी भवेदिति मन्दमवोचत् ।"

अद्यासौ मधनादेशमानेष्यति । धान्याभावेन पाकस्थान शून्य प्रतीक्षते । भणिगापण गत्वा भोज्यसामग्रीमानेष्यामि । अन्यथा विपणि पिधान जनिष्यते । पितु वचासिश्रुत्वा सा पुनर्जीवितेवाभवत् ।

द्विचक्र्या समुत्तीर्य पत्रवाहक सविनयमवोचत् । भवदर्थमेवाकाले तिमिरमध्ये मयागतम् । एकदिवसस्यविलम्बेन गृहव्ययस्य कदाचिदसौविध्य जायेत ।

"धन्योऽसि पुत्र ! धन्योऽसि । यया त्व स्नेहेनपाठित । त्वया मम महती सेवा विधीयते । परेशस्तवमङ्गल विदधातु" जनार्दन आशीर्मुद्रयाऽवदत् ।

अत्र हस्ताक्षराणि । "भगिनिजये ! वेतनद्रव्यगणने त्वया साहाय्य विधेयम्" इति पत्रवाहकोविनयेन शालीनतयाविनिवेद्य तिरोदधे । हन्त ! कीदृशोऽय राष्ट्रनिर्मातु पुरस्कार. ? जनार्दनो व्यथया कम्पमान पश्चाद्ददर्श । जया कस्मिंश्चिद्भावनालोके निमग्ना निम्बमहीरुहस्याश्रये स्थिताऽश्रुप्रवाहमुञ्चन्तीप्रस्तराथितासीत् ।

द्वौ शास्त्रिणौ

मनोहर शर्मा

पण्डितज्ञानचन्द्रशास्त्री कलकत्ता नगरस्य ब्राह्मणभवनात् निर्गत्य शीघ्र गच्छन्नासीत् । अद्य भोजन-निर्माणे तस्य कश्चन विलम्बो जात । श्रेष्ठिन आपणे दैनिक जप कर्तुं तेन दूर गन्तव्यमासीत् । कलकत्तानगरे समागतस्य तस्य अधिकानि दिनानि न व्यतीतानि । तन्नगरस्य विभिन्नमार्गाणा तस्य सम्यक्तया परिज्ञानमपि नासीत् । गन्त्रीभि सह संघट्टनस्यापि भय तस्यासीत् । मार्गेच पर्याप्तो जनसम्मर्द । स कदाचित् केनापि सह संघट्टते चेत् परस्य कस्यापि प्रतिघातो न स्यादिति पर्यालोचयन् त्वरया गच्छन्नासीत् ।

तत्र समागच्छन्नासीत् एको हृष्ट पुष्ट दीर्घश्मश्रुको विशालनेत्र पुरुष । स च मनसो मग्नतया मन्दमन्दमागच्छति स्म । जातस्तस्य घात प्रतिघातश्चपण्डितज्ञान-चन्द्रेण सह । पण्डितस्तेन पतन्निवासीत् । तमनवलोकयन्नेव पण्डितोऽवादीत् "जना साम्प्रत सम्पन्ना अन्धा । न च पश्यन्ति इमे मनुष्यमपि परापतन्तम् ।" श्रुत्वा चैतत् पुरुषोऽसौ समवाप्य उत्तेजनामब्रवीत् दृष्ट्वैवचल । इय कलकत्तानगरी । नाय स्वकीय प्रदेश । कदाचित् देहपातेन सह प्राणपरित्यागोऽपि सम्भाव्यतेऽत्र ।"

ज्ञानचन्द्रेण न श्रुता कदाचिदेतादृशी कठोरवाणी परन्तु किं कुर्यादसौ । भूमिरिय परकीया । तेन दत्ता दृष्टिस्तदुपरि । असावपि विरराम । जाता काचित् विचित्रानुभूति । मनोयोगेनापश्यदसौ त जनमवादीच्च "तव निवासस्थान किम् ?"

अपि नामासि त्व भानु ? "इदानी" तस्यापि जाता प्राचीना स्मृति । "ग्रामस्य नाम पश्चात् वक्ष्यामि । तावत् कथय त्व कदाचित् ज्ञान असि किम् ?" जातेदानीं ज्ञानचन्द्रस्यापि काचित स्मृति । स हि अवोचत् 'अरे भानो ?"

पश्चादुभावालिङ्गितावेवानिष्टताम् । मार्गे गच्छन्तो लोका महता कौतूहलेन दृष्टवन्तो दृश्यमिदम् ।

श्रेष्ठिन आपणगमन विस्मृत ज्ञानचन्द्रेण । स्वबालमित्राय भानो हस्तौ घृतस्तेन । भानुनापि मित्रस्य स्कन्धे हस्त धृत्वा ऊचे "कियान् कालो व्यतीतस्तवा-

आगमनस्य ? कुत्र च निहितो वासस्त्वया ?"

ज्ञानचन्द्रेणोक्तं "मासद्वयमतीतं मेऽत्रागतस्य । ब्राह्मणसदने मे वासः । श्रेष्ठिनः सदाशिवमल्लस्यापणे मन्त्रजपार्थं गच्छन्नस्मि । एतदर्थं लभ्यन्ते त्रिंशत् रूप्यकाणि केवलं, यानि चात्र भोजनव्यये परिसमाप्तानि भवन्ति । नैतदतिरिक्तोऽपरोऽपि सम्बलनाय । न च केनापि परिचय एवास्ति । तव च कीदृशः समाचारः ?"

रामदुर्गपरित्यागादनन्तरमहमत्रैव निवसामि तथा श्रेष्ठिनः प्रतापमल्लस्य गृहे पाकक्रियां करोमीत्युक्तं भानुचन्द्रेण । प्रचलति सुचारुतया मे कार्यम् । सर्वप्रकारेण सानन्दोऽहम् । गुरुणा मदर्थमियमेव विद्या दत्ता, यस्या लभ्यते फलमिदानीम् । एतावदुक्त्वा हसितं भानुचन्द्रेण । प्रत्युत्तरस्वरूपं ज्ञानचन्द्रेणापि हसित्वोच्चरितम् "पाकशास्त्रीति ते नामापि सार्थकम् । ज्ञानशास्त्रीति मदीयं नामाधुना निरर्थकं सम्पन्नम् ।"

"भानुनोक्तं सर्वं साधु भविष्यति । भगवत्याः कालिकायाः क्षेत्रमिदम् । अनाथानां रक्षणमसावेव करोति । धैर्यमवधारय । अवकाशं कल्पयित्वा मेलिष्ये त्वया सह । इदानीं नास्त्यवकाशो मम । तत्रापि च जायते विलम्बः । परश्वः द्विवादने समये ब्राह्मणसदने तदवकाशमायास्यामि, भविष्यति वार्तालापः सर्वस्मिन् विषये ।"

उभौ स्वमार्गमनुसृतौ ।

(२)

रामदुर्गस्य संस्कृत-पाठशालायां सुदूरग्रामाणां विद्यार्थिनः प्रविशन्ति । श्रेष्ठिनः सकाशात् निवासस्य, भोजनस्य, वस्त्रस्य तथा पुस्तकानां कृते समीचीनः प्रबन्धः । बालकास्तत्रैव वासं कुर्वन्ति पठन्ति च संस्कृतम् । ब्राह्मणश्चैकः पाचकस्तत्रासीत् । विद्यार्थिनां कीदृशोऽपि व्ययो न भवति । अध्ययनेन सह तेषां पालनपोषणान्यपि भवन्त्यत्र ।

पाठशालायां विद्यार्थिषु एक आसीत् ज्ञानचन्द्रः अपरश्च भानुचन्द्रः । पृथग्ग्रामवासिनावपि छात्रावासे एकस्मिन्नेव कक्षे निवसन्तौ उभौ घनिष्ठमित्रे आस्ताम् । ज्ञानचन्द्रः पठने यावान् तीव्र आसीत् तदीयो मित्रं भानुस्तावानेव मन्दः । एको नक्तंदिवम् अध्ययने रतश्चेदपरो भोजने शयने च प्रवीण आसीत् । ज्ञानचन्द्रेण भृशं प्रतिबोधितोऽपि तदीयः सुहृत् तथैवासीत् । तेनावगतं यत् भानोः भाग्यमेतादृशमेव । समयानुसारं ज्ञानचन्द्रेणोत्तीर्णा शास्त्रिपरीक्षा किन्तु भानुचन्द्रेण प्रथमायाः पर्वतोल्लङ्घनं नैव कृतम् ।

पाठशालायां वासं कुर्वता भानुचन्द्रेण समवाप्तश्चैको गुणः । नैकवारं पाचकस्याभावे सर्वेषां छात्राणां कृते तेनैव निर्मितं भोजनम् । शनैः शनैस्तस्य विद्यायामसौ

प्रावीण्यमासादितवान् । अस्मिन् कर्मणि तदीय मनोऽतीव रमते स्म । अस्यापरमिद कारण यद् पाचकस्यानुपस्थितौ घृतस्य शर्करायाश्चोपरि भानोरेवैकमात्रमधिकार. । एकान्तेऽसौ अस्यावसरस्य पूर्णं लाभ विन्दति । पाठशालाया पाकशास्त्रीति तदीय नवीन नामकरण विहितम् । श्रुत्वा चैतन्नाम भानुचन्द्रो नान्यथा मनुते ।

अध्ययन परिसमाप्य ज्ञानचन्द्रो रामदुर्गं एव वासमकल्पयत् । विवाहानन्तर पितरावपि अत्रैवानीतौ तेन । श्रेष्ठिना तस्य वासार्थं स्थान दत्तम् । अत्रैव निर्मित तदीय गृहम् । नगरे पूजाया पाठस्य च कार्यारम्भो विहितस्तेन ।

समयो व्यतीत । शास्त्रिण पत्नी क्रमश तिस्र कन्या सुषुवे । तस्य पितरौ पौत्रस्याननमनिरीक्ष्यैव स्वर्गतौ । शास्त्रिण प्रथमकन्या विवाहयोग्या सञ्जाता । तस्या विवाहे शास्त्रिण सम्पूर्णो धनराशिर्व्ययीभूत । यदा द्वितीया कन्या विवाहयोग्या जाता तदा शास्त्रिणावगत यद् अत्रनिवासेन कार्यं न चलिष्यति । यत्रकुत्रापि बहिर्गमनमेव वरम् । अन्ते शुभमुहूर्तं पर्यालोच्य कलकत्तानगरे ज्ञानचन्द्र कालिकाया शरणमवाप्य ब्राह्मण भवन वसतिमकल्पयत ।

(२)

ज्ञानचन्द्रस्य स्वकीय बालमित्रम् भानुचन्द्रो यदाकदा स्मृतिपथमायाति स्म परन्तु अद्य तु क्षणे क्षणे तस्यैव प्रतीक्षा आसीत् । द्विवादनसमय । परन्तु नायात भानुरिदानीमपि । ज्ञानचन्द्र कदाचित् मार्गं परिपश्यति चेत् कदाचित् पञ्चाङ्ग पश्यति । ब्राह्मणभवने जना भोजनानन्तरम् विश्राम कुर्वाणा आसन् । कतिपयजना स्वग्रामचर्चाया लीना आसन् । तावदेव धमधम इति ध्वनिरश्रूयत । ज्ञानचन्द्र पञ्चाङ्ग त्यक्त्वा अग्रे आयात ।

समागतस्तस्य बालसखा भानुचन्द्र । दृष्ट्वा त ज्ञानचन्द्रस्य नयने आनन्दाश्रुपूर्णे जाते । द्वे अपि मित्रे आसने अतिष्ठताम् । भानुना धूम्रवर्तिका प्रज्वाल्य एकवार प्रयोग मित्रस्य पुरस्तान् कृता । ज्ञानचन्द्रस्य नाभ्यासो धूम्रपानस्य तथापि यदाकदा नत्रापि धूम्रपान नियमे एव । धूम्रवर्तिका नीत्वा तेनोक्त यत् अह बहुकालात् प्रतीक्षा कुर्वन्नासम् । मन्ये पाचनक्रियाया कार्याणि न पूरितानि स्यु ।

भानुनोक्तम् 'पाकक्रिया तु समय एव पूर्णता गता परन्तु अह श्रेष्ठिन आपण गतवानास्म् । तत्र त्वदीय कार्यमपि पूर्णं करणीयमासीत् । "श्रुत्वा चैतत् ज्ञानचन्द्र किञ्चिद् विहस्योक्तवान् "नास्यापर मदीयस्त्वदृश्यते । कीदृशो भूत् वार्ता लाप श्रेष्ठिना सह ?"

धूम्रवर्तिका पिबन् भानुरुवाच 'मार्गंऽमिद्दिरे वायनोबयने । श्रेष्ठिनो गृह-

मन्दिरस्य पूजकः भृत्यां त्यक्त्वा स्वगृहं गतवान् । कश्चनापरोऽन्विष्यते तत्स्थाने । मया च तत्समक्षं भवदीयं नाम प्रस्तुतीकृतम् । 'पण्डितं साक्षात् कार्यं' इति तेनोक्तम् । कश्चन सज्जनः विद्वान् अपेक्ष्यते मया । केवलं विद्वत्तया नात्र प्रयोजनं किन्तु सज्जनताया अपि महती आवश्यकता । श्वः द्वादशवादने तस्यापणं चलिष्यावः । त्वया तत्र गन्तुं तत्परेण भाव्यम् ।"

श्रुत्वा चैतत् ज्ञानचन्द्रः पुलकितो जातः किमपि समुचितं उत्तरं तस्य मनसि नायातम् । स्वमित्रस्य भानोः द्वारा स्वकीयभाग्य-भाण्डारं उद्घाटितं इव प्रतीतिपथमागतं । उद्गारं प्रपूर्णं-कर्णांशपात्रमानीय तेन एकवारमेव पीतं तत्सुहृदा ।

"परस्परं मिलितयोरावयोः व्यतीतो युगः । कियन्तः सन्ति बालाः दम्पत्योश्च ते" इत्यपृच्छत् भानुः । ततः ज्ञानचन्द्रः स्वकीयां पूर्णां रामकथां मित्रपुरस्तात् कथितवान् । तेनापि मित्रस्य सम्मुखं स्वकीयं निखिलमितिवृत्तं प्रकाशितम् ।

इदानीं पाकसमयः समापन्नः । अतः भानुः उत्थाय चलितः । तेन सह किञ्चित् दूरं गत्वा ज्ञानचन्द्रः परावृत्तः । अधुना पञ्चाङ्गस्याक्षराणि प्रकाशपूर्णानीव तस्य प्रतीयन्ते, स्वग्रहनक्षत्राणि उच्चस्थानेषु विराजमानानीव अदृश्यन्त । स मनसा कालिकां मातरं अस्मरत्, अवोचच्च– मातः 'इदानीं मम लज्जा तव हस्तेनिहिता ।'

(४)

परेद्युः भानुचन्द्रः स्वमित्रं ज्ञानचन्द्रं सद्वृत्तं विदुषः वेशं धारयित्वा श्रेष्ठिनः प्रतापमल्लस्यापणं प्रापितवान् । ज्ञानचन्द्राय रूपलक्ष्मं भगवती दत्तमासीत् तदुपरि धृतानि दुग्ध-धवलानि वस्त्राणि । तस्य पादयोः काष्ठपादुके, ललाटे चन्दनतिलकं, गले दुकूलम्, शिरसि च केशरवर्णस्य उष्णीषं सुशोभितमासीत् । श्रेष्ठी तु स्वयं अपठितोऽप्यासीत् महानुभवी । तेन पण्डितो ज्ञानचन्द्रः सादरं दृष्टः उच्चासने उपवेशितश्च । भानुनापि इदानीं धृतो विप्रवेशः न प्रतीयते अधुना पाचकः ।

सर्वप्रथमं श्रेष्ठिना ज्ञानचन्द्रस्य पुरस्तात् स्वीया जन्मपत्रिका प्रस्तुतीकृता । तस्य ग्रह-नक्षत्राणि स्वयमेव उच्चस्थानस्थितान्यासन् तथापि पण्डितेन ततोऽप्यधिकं तदीयं फलं प्रकाशितम् । ततः श्रेष्ठिनः प्रफुल्लता स्वाभाविकी तेन पण्डितज्ञानचन्द्रस्य ग्रामस्य गृहस्य च विषये पृष्टाः केचन प्रश्नाः । तदुत्तरं श्रुत्वा ततोऽप्यधिका प्रसन्नता सञ्जाता, यत् श्रेष्ठिनः जन्मस्थानात् नातिदूरमासीत् पण्डितस्य ग्रामः ।

पण्डितवरेण श्राविताः केचन श्लोकाः मधुरस्वरेण, केचन कथा-प्रसङ्गा अपि व्याख्यासहिताः प्रस्तुतीकृताः । सहैवानेन स्वकीयं शास्त्रिपरीक्षाप्रमाणपत्रमपि तत्र प्रस्तुतीकृतम् । श्रेष्ठिनः गृहमन्दिरस्य पूर्व-पूजकः नासीत् परीक्षोत्तीर्णः । वर्तमानपण्डितस्य

तु इव विशेषनासीत ।

श्व आरम्भेव भवता पूजागृहं निभालनीयमिति ज्ञानचन्द्र श्रेष्ठिना प्रोक्तं । वेतनादि विषये तु भानुचन्द्रेण सर्वसूचना पूर्वमेव दत्ता । भानुनोक्तम्– "अन्यानि सर्वाणि कार्याणि पण्डितस्य रोचन्ते । इमे तु स्वकीया एव सन्ति ।" इमे भगवत सेवां कुर्युं , अस्मदस्यमाशीर्वादञ्च दद्युरित्यवोचत श्रेष्ठी । इत्याकर्ण्य पण्डितज्ञानचन्द्रेण तत्क्षणमेव देववाण्यामाशीर्वचनानि मधुरस्वरेण प्रगीय दत्तानि । तेन आह्लादित श्रेष्ठिवर पण्डितप्रवराणां चरणस्पर्शं कृतवान् । तदनन्तर द्वावपि सुहृदौ प्रसन्नचित्तौ भूत्वा परावृत्तौ । मार्गे भानुना कथितम — ' इय भूयान् सत्सम्पर्कस्यैव अस्ति तथा-प्यनेन सह निवास– भोजनादिकस्यापि शोभना व्यवस्था वर्तते । समये समये दान दक्षिणादिकमपि अत्रोपलभ्यते । स्वकन्याया विवाहावसरे इद सर्वं स्वयमेव प्रकाशित भविष्यति ।"

पण्डितज्ञानचन्द्रस्य मुखात् कीदृशोऽपि शब्दो न निसृत किन्तु असौ कृतज्ञतापूर्ण दृष्ट्या मित्रमुखमालोकितवान् ।

(५)

अपरेद्यु पण्डित ज्ञानचन्द्रेण श्रेष्ठिन पूजागृह विधिपूर्वकम व्यवस्था-पितम । सर्वं पूजाविधान यथाविधि सम्पन्नम् । पूजाकाले तन मधुरकण्ठस्वरेण गीता श्लोका सम्पूर्णं श्रेष्ठिभवन गुञ्जायमानमकुर्वन । श्रेष्ठिन महिलावर्गं बाल– समुदायश्च प्रमुदितो जात । अस्मिन्नवसरे भानुमहाराजन समीचीन पूजक आनीत इति सर्वैर्व्याहृतम् श्रेष्ठि परिवारस्य सर्वे सदस्या पूजागृहमागता भगवत-श्चरणामृतञ्च पीत्वा परावृत्ता । तदनन्तर ज्ञानचन्द्र मौन धृत्वा जपकर्मणि निरत ।

दशवादन-समय भोजन सन्नद्धम् । भगवत भोगार्थं भोजनपात्रमादाय भानु पूजागृह प्रविष्ट । अद्यतनी भोजन सामग्री विशिष्टैवासीत् । पाकशालायां यत किमपि निर्मीयते तत्सर्वं भगवते समर्प्यते । भानुनोक्तम्— ' भो शास्त्रिन् ! भगवते समर्प्य पश्चात् भवता भोक्तव्यमिदम् । तदनन्तरमेव श्रेष्ठिवर प्रसादरूपेण भोजन करिष्यति । आपण गमनवेला निकटा वर्तते ।"

दृष्ट्वा भोजनपात्र पण्डितज्ञानचन्द्रेण– तण्डुलम द्विदलम, प्रचुरघृतस्निग्धा करपट्टिका नैकविधा शाका नवा सुरभिणा पूरकस्य मुख जल विनत जातम् । ततानुमान यत् भानो भीमकलेवरत्वस्य इदमेव कारणम् ।

भोजनपात्र समर्प्य भानुनोक्तम्— शास्त्रिन् ! नाहं त्वादृश पठित ।

यदि अहमपि पठित अभवम, तदा त्वादृश एव पण्डितपदं प्राप्तुं शक्नुयाम् । इदानीं मया पाकशालैव सव्यते ।" शास्त्रिणा तत्क्षणमेवोत्तरितम्— "भ्रात ! तव पाकशालैव मां पण्डितमकरोत् अन्यथा मम विद्या व्यर्थैव स्यात् ।"

भानु निगदितवान्— "इदं कालिकाक्षेत्रम्, सैव सर्वान् पालयति । अहमपि तस्या एव शरणं प्रपन्न ।"

●

भग्न त्रिकोणः

मेवाराम कटारा 'पङ्कु'

नैव प्रश्नावलिरियमिदानीमपि पृष्टा । नैषा ह्रिया अपि तु प्रश्नाना दूरितेव । सर्वमिदं दीपकनाम्न कर्णे काष्ठमिव घुणता, कथयतापि सर्वं तत्तेन धैर्येण श्रुतम् । मैत्र्या कण्ठायमानया परिस्फीतनिश्वासविषयनीपाशानलतावद्धाः इवासन् तस्य प्राणाः । पश्चात्कामिना तु तं मार्गं पादमपि नारोढुमैच्छत् । मुहुर्मुहुः तया स्थित एव एव प्रश्नः - 'किमानीतोऽहमत्र" दीपकस्य चेतस्यवैव विचारवीथिं सङ कुरिवाखनति विशति च सन्मथा नीतपथम् । यन्महत्त्वस्तत्प्रेरणो समर्थोऽस्मि भवति पौनःपुन्येन चर्चमवावितनस्य । किञ्चिदपि माहात्म्यं समाहृत्य स चिन्तयति, नाहमिच्छामीदं सर्व-मिदमनिशं निश्चयमहमस्थैव श्रावयिष्यामि यत । स किञ्चिदप्यन्यदुक्तं मामस समाहर्तुं नाशक्नोत् । सम्मुख आसील्लोकापवादकुड्यमलम् । स प्रत्यासन्नप्रकारेण परिवेष्टितमिव पाशघनमसम –शिथिलितेन्द्रियमव प्रकाशमय प्रभात सुखद भविततेव विचिन्त्य स्वनिर्णीतादुद्घापणाद्विरमति । यदैकान्ते तिष्ठति, तदैव विचिन्तयति, 'अपि बालरविस्तदर्थं कृष्णयामिन्या मन्दावसरता वनत एव न तु शुक्लचन्द्रिका-मयी यामिनी विचारणीया । स्वाङ्के या प्रभापुञ्जं सुधाकरमारोढुकामा शुक्लपक्षया-मिनी कथं बालरविमाधातुमसमर्थेति मे सन्देह' इति विचिन्त्य स स्वपिति स्म ।

मन्दायाः दशा मध्ये स्थिता चिरकालेनानुकामा पतिरिव क्रमशः व्यतीता । पश्चात् शुक्लिमत्यग्रामवासिछात्राया स्थित्या स कटुतौषधगण्डूषपानमिवानुभूय स्वकार्यनिलयं गच्छति स्म । तत्रापि पञ्चिका पाने निपीतासु तत्रजनै भूयांश्चपरा-घातविभीषिका प्रताडनैश्च कटुतावरोशिमाविवेशेन सर्वमेव विस्मरति स्म । ततेदमपि विस्मृतं यत्सोऽपि तस्यैव स्वतन्त्रस्य भारतस्य नागरिक यस्यैव सर्वे जना ।

सुदामा कार्यं निश्चयस्य कृपया जानाति तस्य प्रकृतिं तच्छीलं वा सम्यगेव । सोऽपि मृदु शीतलजलपानमानीय समर्पयति पानाय शीघ्रं शमनाय च, प्रतिपानयति च तस्यादेशम् । दीपकस्तु तमादिशति—'आस्यताम् भवान् ।' स सुदाममाद्रियते इत्यन । यत तस्य जनतोऽस्य ग्रामनव कार्यनिलयं प्रवशमासीत्सुदामोऽस्य हस्तैव

भृत्य नियुक्त । स तत्प्रति भूयः कृतज्ञ स्नेह वात्सल्य वा वितरति । येन दीपकस्य किञ्चिल्लघुत्वेनमपि चिन्तनश्नाति चिन्ताशमपि तुदत्यल्पबाधापि बाधते । स तत्सल-यति दीपक पुत्रवत् । दीपकोऽपि यदा कदा तस्मै सर्वमेव गुह्य निवेदयति, तस्माच्च यथोचितपरामर्शमप्यपेक्षते स्म । अद्य पुनरपि दीपक खिन्नउद्विग्नस्तेन पृष्ट —'भाव अद्यतु इति प्रत्युत्तराय प्रतीक्षमाणे स्थिते तस्मिन् दीपकस्यमस्तिष्के एका विचारशृङ्खला चलचित्रमिव क्रमश पुरस्तान्निर्गता ।'

दीपकस्य जनको बाबू कृष्णकान्तोऽद्यत दशाब्दपूर्व स्वात्मजार्यका सुमनो-हरा मञ्जरिनामधीतशास्त्रा मृदुहासिनी, मृदुभाषिणी, काव्यकला सगीतप्रियामुच्च-कुलोत्पन्ना सुकन्या चितवान् । 'न मानवीयत्वप्सरैव स्वर्गस्ये' ति यदोक्तवन्त जनास्तदा रमा दीपकस्य माता थूत्कार करोतिस्म तदशुभदर्शनमपसारयितुम् । न यतः कुदृष्टि कस्यापि पतितस्येति विचिन्त्य सदैव परेषा कुदृष्टिमवरोद्धुम् यततेस्म । दीपकस्य तु तस्याम् ज्योतिशलभयोरिव, चक्रवाकयोरिव, राधाकृष्णयोरिव सीता-रामयो रिव शकुन्तलादुष्यन्तयोरिव च प्रीतिरासीत् । एम ए इत्युपाध्युपेता सा न केवल संस्कृतसाहित्ये प्रवीणैवासीदपितु तस्या व्यवहारेऽपि संस्कृत-साहित्य समा-हितम् । भारतीय-संस्कृते साक्षान्मूर्तिरिवासीत्सा । स्वश्वश्रू मातरमिव भगवन्तमिव भर्तारञ्चामन्यत ।

नूतनोपन्यासास्तथैव तस्मै रोचन्ते यथा प्राचीनग्रन्था । भारतीया प्राचीन सस्कृति प्रन्यासस्योपेनापि सा नासीदन्धहृदियस्ता । दीपकोऽपि गोऽद्य पर्यन्त साहित्य-समागमे नासीदनुरक्त स एवाधुना साहित्यिकी वार्तामारब्धुमैच्छदश्रृणोच्च मनो-योगेन, यथा मधुपोऽमृत बिन्दूनाहरति । ज्योतिर्न केवल हिन्दी भाषाया अनेकान्नु-पन्यासान् तस्य शिर रम्भा स्तम्भनिभसुचिक्कणे सुकोमले पृथुले सुमर्दनीये स्वकीये जघनयुगलेऽवधार्य वाचयित्वा त श्रावयति स्म, प्रत्युत यदाकदा कुमार-सम्भव-मेघदूत सौन्दरनन्दादिमहाकाव्यानि शाकुन्तलादि नाटकानि कादम्बर्यादिगद्यकाव्यानिच वाचयित्वा हिन्दी-भाषायाञ्चानूदितवती । श्रीमदानन्दवर्धनस्योपन्याम 'कुसुमलक्ष्मी तु तस्याकृते प्रियतमा कृतिरासीत् । दीपकायाप्ययमुपन्यासो भृश रोचते स्म । स तु दयितामपि कुसुमलक्ष्मीति नाम्नैव यदा कदा व्यवहरति स्म ।

ज्योतिस्तु वस्तुत सा ज्योतिरेवासीद्दीपकस्य प्रभामयी रूपप्रभया, चञ्चला चलने, चपला वचने, प्रकाशिताज्ञानेन सरला स्वभावेन, संयुक्ता दीपकेन, सरसेन सरसहृदयस्य चरमदारिणति, उज्ज्वलनेनोज्ज्वलाचरणा, सधारका पुण्यकर्मणा वचसा कायेन प्रेम्णा च ।

सन्ध्याकाले कार्यालयस्य कार्यकाले समापन्ने यदा दीपकः श्रमेण श्रान्तः दिवसकार्यभारखेदेन खिन्नः स्वनीडे विहग इव गृहमाप्नोति, ज्योति तम् निर्वापयति शीतवातेन प्रीणयन्ति तोयेन शीतलेन मृदु वचनेन च परिहरति श्रान्ति शीतव्यजनेन । तस्या मृदुहास चन्द्रिकेवासीत्स्वागते प्रेमप्रच्छद भ्रूभङ्गमेव तोरणद्वार, हृदयावासे प्रवेष्टुम् पक्ष्मणोरेवपादत्राणम्, नेत्रोपलश्रेणिरेव मार्गम्, बाहुपाशमेवासीदनङ्गधनुरिव । अधरचारिणीव सा बिम्बाधरा प्रेम्णा स्फटिक-शिलापुत्तलिकेव नृत्यन्त्याह्लादेनाहृतवती ।

भवनोद्याने तयोरेकमेव निश्चित स्थानमासीत् कोविदारस्य वृक्षच्छायायां, तत्रैकास्फटिकशिला सम्मुखे चासीदेकोच्चासन्दी चन्द्रिकाशुभ्रमिव । मध्ये चैको जलप्रणालस्तेन सम्बद्धश्चैकशीकरनिर्झर ऊर्ध्वं प्रवहमानस्तिष्ठति ।

हास-परिहास मध्य एव भृत्य आनयति सवामरूपिकाकषाय-पेयमल्पाहार सुभाससमानेषु साधारिकाचषकेषु स्थालिकायामेकस्या सुसज्य । ज्योतिरवलोकते विविध वर्णानि पुष्पाण्यपि मनोहरान् वृक्षान्, पुष्पितान् पादपान् सुभगान् विहगांश्च । वामरूपिका कषाय पीत्वा सा स्पृशति सुकोमलानि सकण्टकानि सुमनोहराणि सुमन स्तबकानि च । ध्याय ध्याय किमपि सामीनवोद्भ्रमा चेतसि चिन्तिता विचारप्रवाहे प्रवहतिस्म । उपलपुत्तलिकामिवाचलका शिलामधितिष्ठन्तीं दूरगतमानसां चिन्तानिमग्नामवलोक्य तद्विचारतन्तु छेत्तुकाम प्रमबद्ध निष्कामो दीपक पुष्पमेक शिरीषस्य सङ्गृह्य तस्या गौरवर्णं कपोलयो कम्बुवद्ग्रीवायाञ्च परिवर्तते शनैः शनैः । तेन सा किञ्चिद्विहस्य दीपके दृष्टिपात करोति सस्मिता च सपुष्प पुष्प-सदृश तद्धस्त सङ्गृह्णाति सुकोमले कमलनिभे स्वहस्ते ।

'कथमुद्विग्नासि ?' इति तेनैव प्रश्न प्रक्षिप्त' 'अल सन्देहेन' इत्युक्त्वा सा पुनरप्युद्विग्नेव 'सुरभित पुष्पजालमिदं मह्यं न रोचते' इति ब्रुवन्त्या एव तस्या आनने वराङ्गस्यापि स्मिति प्रसृता । दशवर्षाण्यहोरात्राण्यनेनैव क्रमेण व्यतीतानि । दीपकेन स्नेहं तथैव दर्शित । परञ्च रमाया दृष्टि परिवर्तितेवासीत् । सान्निध्यवर्तिनीभि सखीभि सह यदा-यदालपति तदा तदैव स्वकनुपमभाग्योभवति । विमनेनातिमनोहरेण सौन्दर्येण । सा तु वन्ध्यास्मि । न तारयिष्यति मे पुत्र पुन्नाम्न नरकात् । अपुत्रस्य गतिर्नास्ति, इह परत्र वा । परिणीतोऽप्यपरणीतोऽभवन्मे पुनः । पुनर्परिणयार्थमय स नैकवार 'परामृष्ट । परञ्च स तु कर्णमपि न ददाति ।' दीपकेन तत्रमिद निश्चित्य स्वचेतसि ।

'दीपक ! मे पुत्रक ! त्वया बलीवर्द एवाय पालित । किमनेन पालितेन।'

'अम्ब, मा मैवम् । तत्सर्वं जानाम्यहमि' त्युक्त्वावज्ञाभावेन सह स्वाध्याय कक्षे उद्याने वा विशतिस्म । दीपकोऽथापि स्वकार्यं निलयात्पूर्ववदेव सध्याकाले समागते ज्योत्या तत्रैवाहूत । तावेव विलसन्ती रममाणौ वा दृष्टवा रमाना द्वेषभावेनाक्रान्तम् । एतत्सर्वं दीपकेन दृष्ट ज्ञातञ्च तत्कारणम् । सोऽपि खिन्न सन यावदध्ययन कक्ष प्रति याति तावज्ज्योतिरपिपश्चित्य पश्यति । ज्ञायते च अनयास्य कारणम् । श्रान्तेव सा तत्रैव तस्मिन्नेव कोविदार-प्राच्छदे आत्मान शिलाफलके न्यपातयद्धम्मेति शब्देन । जगञ्जनकमीश्वर येनेद सर्व विचित्रविश्व सृष्ट तमाक्षिपन्तीव सा पुष्पाण्यवलोक्य विस्तीर्णे नीलगगने किमपि पश्यति । दीपकोऽप्येकत विचार सागरे निमग्न । ज्योति साहसमाकलय्य त समाश्वासयितुमैच्छन् परन्त्वद्य त्वगाधार्णवे निमग्नेव सा यथा यथा साश्रु-पात बलाद्विहसति तथा तथैव हसितदीप इव आभाति ।

'अयि, किमिदम् इति दीपक चिबुक स्वहस्तेनात्तोलयन्नाह ।

'न किञ्चिद्विशिष्टम्' अवदत्स पूर्ववदेव । परञ्च स तु नाऽभवदनेन सन्तुष्ट । पुनरपि सा पृष्टा कथमद्य नयनारविन्दयोर्हिमपात ?

'नान्यत्, मधुकरेण पातित खलु पुष्पपराग । तेनैवाहसचिन्ताकुलाऽहम् । तान्यवावलोक्यच ।

'तच्चिन्तनमेवाह ज्ञातुमिच्छामि ।' 'अस्मज्जीवनोद्यानेऽप्ययमविघ्यनुचेत सुमनामि 'एकैकमश्रु दूर्वाया पतति भासते च रत्नत्विषा । परञ्च ज्योतय कथ किमपि न रोचत इतितु न ज्ञायते । तथा स्वपादाङ्गुष्ठेन विलीयते । 'कस्मान्नेदमुद्यान पुष्पितमितिमा व्यथयति ।'

'अलम् वाग्विलासेन ! नाहमवजानामिते प्रहेलिकाशब्दजालम् । नैवाह ते साहित्यालङ्कारान्नवगच्छामि, यतोह्यु वाणिज्यकोऽस्मि । मद्विधाना किमनेन व्यङ्ग्याभिव्यञ्जकेन सर्वेण ? सुमरला भाषैव मया ग्राह्या ।

दीपशिखायै दीपसामर्थ्येन बलाधान- सोढु शक्य, न तु तस्य नीरसत्वं निस्नेहत्व वा । पूर्वमेवास्मात्सा स्वमस्तित्व समापयन्ति शाम्यतिवा ।

'अपिनुत भवता यत्किञ्चिन्मामोक्तम् । मे सर्वमेव वृत निवेदित सान्निध्यवासिन्याऽनामिकया कन्यया । भवतोऽपि नास्ति किञ्चिदगुह्य प्रच्छन्नवा । किमिदानी मेवाभिनीत भवता दृष्ट भवेत । भवता स्वव्यथया मद्गोपिता । अन्तश्चिन्तित सन्मे स्मिति जीवयितुमिच्छति भवान् । परञ्च नेद मया द्रष्टु शक्यते । नाहमबोधा

बालिका सर्वमेव मया ज्ञायते। भवता प्रवाहितेन स्नेहरसेनाद्य मे हृदयं 'सरसं' भूत्वा प्रकाशते। मे भर्तासि। पतिरेव परमेश्वरः। भवतो दुःखं मे दुःखं, सुखे च मे सुखम्। अम्बापि गृहे छिन्ना। सुहृद्भिः सह भवताप्यालपन्तं शान्यथवणीयानि कथितानित्युतानि। मातुराक्षेपमपि शृणोति भवान्। हेतुना केनेदं सर्वम्? भवता रागेन उत वा अभय? हृदयेनाद्य मे निवेदनमनुमोदनञ्च कांञ्चिदया सौभाग्यवती-मानेतुम।' 'प्रिये मा मैवम्' अवरुद्धकण्ठेन दीपकेनोक्तम्। ज्योतिस्तु सततमेव निवेदयति। सगु निवेदयिष्यामि नि शङ्काहं यतोऽधिकृता हं निवेदनाय सर्वमेव दृत्तमद्य भवत समक्षे प्रस्तातु महद्भारं चाप्यवतारयितुमिच्छामि नाहमनन्तस्तोकमपि खेदं लप्स्ये। स्वहस्तेनाहं करिष्यामि सर्वाणिमाङ्गलिकानि कार्याणि। स्वहस्तेनैव त्वां वरं विधास्यामि।'

प्राणाधिके! बलिदानस्यास्य निष्क्रयमपि जानासि न वा। एतस्यै नार्यै नास्माद् गुरुतरं किञ्चिद्बलिदानं यत् तद्धस्ते यत्किञ्चिद् वा तत्सर्वमन्याय दीयते। भवता यत्किञ्चिन्मह्यं दत्तं तन्निष्क्रयेणेदं न किञ्चिदपि। महत्तरमपि कर्तुमिच्छा-म्यहं परञ्च किं करोमीति न जानामि।

किमवशिष्यते त्वत्सकाशात्?'

पूर्णात्पूर्णे गते पूर्णमेवावशिष्यते। भवन्मुखेप्रसरन्ती 'स्मिति' परिवारोद्यानं विकसितानि पुष्पाण्येव मे प्रसन्नता विनिरियन्ति। वार्तालाप छिन्नं गृहभृत्येन 'चाय भावेनि ब्रुवता।'

'अत्रैव स्थापय' इत्यनिच्छतापि फलकोपरि दत्तमवतनोक्तम्।
अपि किञ्चिदपदिष्टेन भवन्तौ?'

'नैव न मनस्थितिस्तया गच्छ स्वनियोगमनुपकुरु। गते भृत्ये तावुभौ व्यग्रावास्तां वार्तालापे। कामप्यनिका कपायनेपथ्योपयोग्य आदर्शे गामुत्तरेव भावमेक शीनतरामवस्था दधार। विरम्यालपनात्प्यनुश्वासमपतन्ती।

आपतितः सायं कालः। शनैः शनैः समाहूतमारुणिमानं तिमिराच्छादितञ्च आत्ममग्नं प्रच्छदम्। नगरे प्रज्वालिता विद्युद्दीपकाः तनश्चतावुभावपि भवनं प्रत्युत्सरतः। दीपकः स्वाध्यायकक्षं गतवान्। चतमि चिन्तनाभारमुद्वहन् पर्यङ्के आधातमचिन्तयल्लवापतत्। ज्योतिरपि स्वोद्घाटितस्यात्मिमनिर्णयस्य विधाविलयं यावद्गच्छति तावदेषा प्रति छायामपश्यत। सात्वैव भवेदिति विचिन्त्य सा प्रणमक प्रतिपालयति, परञ्च माता नु तामदृष्ट्वैव निर्गता तत्पुरस्तात्।

'आर्य !'

'कथय ? ज्योति ? किमर्थ ?'

'आर्य किञ्चिदहमिच्छामि । अपि श्रोतुं सक्षमा भवती ? लज्जावनतमुखी सा तत्रैव निश्चला निष्पन्दा च स्थिताऽसीत् ।'

'कथय नाम, कथय नाम भयं विमुच्य ।' 'अद्यान्तमिदं प्राङ्गणं शून्यमेव दृश्यते । कथं नु नाऽऽनीयते कोऽप्यन्यो पुत्रः ? एषा सर्वमिदं ज्योतिर्मुखाच्छ्रुत्वा चकिताऽभवत् ।

'त्वया प्रस्तावितमिदमस्माभिः प्रस्तावनीयमासीत ।' 'आर्ये कुटुम्बस्यास्य सुखमेव मे सुखम् । तन्महत्त्वमप्यसह्यं, यथा खलु भवता मनोव्यथा तथाहं जानामि । परं विचारदोलायां दोलनेन को लाभः ? अतोऽत्र सर्वोत्कृष्टा निर्णयेति मे मतिः । न जानामि कञ्चिदन्यमस्योपायम् ।

वाष्पायमानायाः तस्याः दृष्ट्वा उद्विग्नं मुखं प्रसन्नतायाः श्वेतदुकूलं, क्षणे एव प्रसारितम् । दिवसपश्चनेकं वर्षा च तस्याः मुखे स्मितिः स्पष्टा । विद्युतिव नवीया चलयोऽपि विस्पष्टा । तत्क्षणे एव सा ज्योतिं स्वबाहुपाशाभ्यामालिङ्गितवती ।

ततस्तु दुष्टाचा तस्य वचनानि दैनिकं विचारयितुं समर्था अजायन्त । स तदा व्यङ्ग्य-प्रहारं सोढुमक्षमः विक्षिप्त इवाऽभवत् । व्यजनयन्त्रं वियोज्य विद्युद्दीपं प्रकाशाच्च निर्वाप्य वाङ्मुखस्तत्रैव पर्यङ्के न्यपतत् । त्रिकोणाद्भुतं न किञ्चिदन्यमपश्यत । स्वलघुपरिवारस्यैकस्त्रिकोणः । यस्य शीर्षे स्थितः स्वयमेव बिन्दुसदृशः । ज्योतिरमिता नाभे भार्ये द्वे रेखे शीर्षेण संलग्ने । साक्षात्कार-रूपामुपाद्योभौ बिन्दू संयोक्तुमिच्छति परं दुष्करत्वमाप्नोति । भग्न एव त्रिकोणो लक्ष्यते । तृतीया रेखाऽस्पष्टैव । 'अपि त्रिकोणात्मकं जीवनयापनं सुतरं सरलता वा विधास्यति, पूर्ववदेव स्नेहापेक्षा प्रकाशमाप्स्यति ज्योतिर्नेत्रा । नाहं करिष्याम्येवम् । द्वयोर्विभक्ते स्नेहे एकस्य भागस्य द्वाभ्यामपर्याप्तमेव भविष्यति । तेन त्वेकस्याः अपि पूर्तिरसम्भावनीया ।' अथार्धरात्रस्योपयोगिताहीनं नियमस्तेन मुहुर्मुहुः स्मृतः । 'स्नेहेऽल्पे सति तत्राहस्य वृद्धिमागमिष्यति यस्य पूर्तिरशक्या । पर्याप्त स्नेहप्रदानेऽसमर्थो भविष्यामि । यथा किम्, एकस्मिन्नेव दीपे द्वे वर्तिके ज्वलन्त्यौ सर्वाधिकं प्रकाशं किं न तनिष्यतः ? एकस्मिन्नेवोद्याने द्वे लते स्वम्बालवालं आश्रये वा पुष्पिते पल्लविते किं न भविष्यतः ? उद्यानपालोऽपि समानस्नेहप्रदाने समर्थं भवितुं शक्नोति । किमनेन ? भ्रान्तमिवाहमद्यावधि स्नेहं मौक्तिकपिण्डेभ्यः तोलयितु-मिच्छामि । किं वा न मूर्खोऽस्म्यहमपि । येन गतोऽयम् विषयः येनगर्वानुभूयते तथा विशाल-

हृदयो न तु बाह्यश्यायाम्ण । यथा विस्तीर्णो हृदयस्तथैव प्रासाद विस्तीर्णश्च साह-
र्यं च । तेनैव तव स उद्योग्या हृदयगाम्भीर्यं स्मरति । तस्या त्याग तप स्नेहानां
विविधानि चित्राणि तस्य मनसि सन्धारितानि यत तस्य हृदयान्तवानऽजायन्त भक्तो
भत श्रद्धापादप विशाल नारी हृस्य क्षुद्रबुद्धे प्रश्नोऽपि न जायत । मातृ वेन सा
सदैव वन्मन्यते ।'

खट खट खट इति द्वारपक्षताडनम् ।

क स्वटन्मागयन' इ युक्त्वा यावत्कपाटावुद्घ टयति तावदेव स्वमातर
प्रसन्नवदनामपश्यत ।

पुत्रक ! ज्योतिस्तव्यनी यत् - '

'आम, अम्ब ममापि निर्णीत भवन्त्योरिच्छानुकूलमपि । श्रोतुमिच्छति
भवती ?'

'नाहमिच्छामि श्रोतु वत्स, यतो ह्यवगच्छामि तेऽन्त करणस्थितम् ।'
इति वात्सल्येन लालयति तस्य वक्त्रालम् । ''स्वस्त्यस्तु ते वत्स । वर्धसे, सफला
सन्तु ते प्रजा ।'

'अपि कुशली भवान ?'

ओम भवती ।'

'गाहस्थेन चिन्तितोऽसि उत वा '' ' ज्योतेरपूर्णे मति प्रश्न दीपक
तनोऽगमरत । पलायन प्रादुरभूतस्य चेतसि । तस्य नयनयुगलमप्यार्द्रीभूतम् ।
एतत्कोऽमत्यैव स तत्र मृषा विवाद परिहर्तुकाम स्वकार्यनिलय प्रत्यन्तरमेव
खिन्न मन् पलायितवान् । एवमेव करोति स्म स प्रायश । तत्र कार्यनिलय पञ्जि-
कासु निमग्नत ज्योत्यमितयोर्विवाद-सन्दर्भाणि विस्मृतानि । पञ्जिकानां सन्दर्भाण्येव
तेन स्मृतानि । पत्राचल्गी विजुप्त स निर्विवेच्य स्मरति, गाम्भीर्येणावलोकयति
कार्यं यत लिखितं पुत्रनि कार्यानुक्रमेण । पत्रोत्तराणि प्रेषणपञ्जिकायामुल्लि-
खितानि न च प्रेषितानि । पञ्जिकां परिवृत्य यावत्पश्यति, तावदेकस्य पत्रोत्तरस्य
मूर्ला । परि सप्तनिलिपि सूचीकृता तेन दृष्टा । पश्यन्नेव मुद्रेत्यादिष्टम्- रामा-
सन्देशमाहूयताम् इति । आगत स प्रभूतञ्च गृहीत 'अपि जानाति भवान
वस्तुतस्तिप पृष्ठेव विधेया शीघ्रमवाचित स्यात च प्रेषणीया । उभयोरेतस्मिन्ने-
वस्यानमति किञ्चिद् ' इत्यपूर्वमेवमवगायमूर्ध्नमेव दीपञ्च निवत्य
ग्रामसहोदय ममादिशतत गमताय 'भवता तनु शक्यते, प्रेषणीयञ्च मूलपत्रं

वाञ्छितं स्थानम् ।' इत्यादिशन्नेव स निस्तानिमालाऽभवत् । सन्ना महोदयोऽपि 'यथाज्ञापयति श्रीमानिति निवेद्य स्व-सद्मागमगच्छत् 'सुवन् ? प्रतिलिपि ? सम्पन्न-मवश्यमेव प्रेषणीयम् । प्रतिलिपिरियमस्माभि रक्षणीया ।' स स्वोक्तानि वचनानि मुहुर्मुहुः प्रतिश्रुणोति ।

वर्षाकाल । मेघाच्छादितेऽथाकाशे वारिदा इतस्ततः भ्रमन्त्यनवरतम्' । ज्योति तेषामारोहण पश्यति । सावगता दीपकस्यैव कृते । तस्य हृदयाकाशे एवमेव विचाराम्बारिदा आयान्ति यान्ति च भ्रमण । परिणामतोऽश्रुवर्षापि सञ्जायते । उभयोरपि एवैव परिणतिः । कोविदार तथैव तिष्ठति प्रफुल्ल । परन्तु तस्य छायाया मुक्ता पालिता वर्धिता च माधवी लताद्यापि तमपुष्पिता । द्वितीया च यूथिकापि सद्य आरोपितापि तथैव पुष्प-विहीना वितनोति कोविदार अश्वत्थस्य च पादपयुग्मस्तव सम्ब-धमाना । यूथिका च इन्तु कोविदारो गतो माधवी प्रति । दीपको हि ध्यानस्थ-योगीव बलादाकृष्ट प्रणामुद्र सहस्या सा प्रतीक्षाकुला स्वागत-तत्परा सज्जीभूतामुद्घाटित हृत्कपाटाम युसुवा नवोढा मानिनामिव भूमिदि सगर्वा सुभगा च परित्यज्य तत्रैवो-पासनेपत्र ध्यानावस्थिता ज्योति शिलाफलकमधिष्ठिता आसीत् । स पूर्ववृत्त स्मृत्वा तदैक शिरीषपुष्प नीत्वा तस्याः ग्रीवायां कपोलयोर्वा स्पर्शयति । चाकचक्य ज्योतिरपि व्यनीन युगनाथ नोडितेव नीड' इत्युक्त्वा सा विहस्यैकतोऽपासरत् ।

मध्याह्नेन गगन-मण्डले सर्वत्रैवाश्रमासि प्रसृतानि । शून्यमेव जगच्च दृश्यते सपदयपंपत्रमपि विद्युल्लान सूचयतीव ।

'गेह प्रिये इत इतः' इत्युभौ समालिङ्गितौ लीलयैव निर्गतौ विहर्तुम् । यावदुपगच्छति तावद्दृष्टि प्रागारोपिते पाटलपादपे निपतति । तत्र रक्त-स्निग्ध किसलयान्च दृष्ट्वा प्रसन्नश्च भूत्वा– पश्य, पश्य प्रिये !' इति सांगुलि-संकेतं-शितवान् । ज्योतिरपि नयनयोः लज्जामञ्जनमिव विक्षिप्य, स्मितावनतमुखी 'ननु ननु भवान् एवमेवास्ति किञ्चिदसाजननम् । स तु अज्ञातार्थं जिज्ञासुरिव प्रिया प्रतिपश्यति । साऽपि सर्वमेव निवेदयितुमिच्छति तथैव स्मिया यतोऽन प्रथमारोपितो पाटलगनाव न केवल बाल-किसलयाग्रिता अपितु पुष्पाच्छादितापि भवितुमर्हति । 'इत्युभौ स्वागृह प्राविशताम् ।

दीपेनोद्दीप्ता विद्युद्दीपशलाका किञ्चित्काल लुपलुपायत् प्रसारयति च श्वेत-चन्द्रिकामिव दुग्धसदृश प्रकाश चतुर्दिक्षु । तत्र दुग्धधवले श्वेतप्रकाशे पतितासीदेका पत्रिका दीपकस्य वामहस्तकन्धुकस्य वाहौ द्वितीया च तस्य दक्षिणहस्ते

स्थितासीत् । साश्चर्येण पत्रमुन्मोच्य पठति—

ह्य एव मया स्पष्टीकृतं यदयं व्यवहारस्त्वया प्रियो न इदानीमग-ह्य । अद्य तु त्वया मे हृदयमेव शतधा कृतम् । स्वगौरवोत्पादनाय यन्त्रमिव मत्वा रक्षिताहम् । भवान् स्वव्यवहारं संशोध्य मां प्रति आकृष्टो भविष्यतीति मया चिन्तितं पश्चात्तु मया ज्ञातमिदं यत्स्नेहोऽध्वस्यति । निमीलितज्ञाननेत्रया मयापत्यस्यैवाय स्नेहं कृतं भवत्सकाशम् । यद्यपि मे जनकः सम्बन्धमिदं कदापि नैच्छत् परन्तु । भवतु अधुना मया निर्णीतं यद्भोजनमेव, मयात्र स्थितेन तातपितुर्गृहे एव सुप्राप्यम् । जनकोऽप्यनेनाभिज्ञ आसीत् । यथ्यं मया पितुर्गृहं परित्यक्तं तत्र लब्धमत्र स्तोकमपि । यद्यद्यैव स जनकस्त्वामाहूयति पद तर्हि का भविष्यति ते स्थितिः ? प्रकृतिव्यवहारा-चरणमपि स्व एव यथावश्यकं गतिं यास्यति ।

इत्यलम्

या सदैव ते भीवतु —

शकया,

अमिता

अनागत एव निर्गताद्य तस्य निद्रा । माता नैक-वारं स्मारितनापि नेत्राभिनाभ वेष्ट दूरमपि न व्यवहृतम् । सवत्रैव ग्रामगतं अन्धतमं ज्योतिरिमां वार्तां श्रुत्वास्तीव दुःखिताऽभवत् । यतः सैवासीदस्य सर्वस्य घटितस्य कारणं बीजम् वा । द्वयोः समानान्तरे स्वयोर्मिलनमसम्भवमेव ।

दीपकः वस्त्राणि परिधाय एकमेव विचारबीजं 'सम्मात्रमेवविहाल ' इति स्वमनस्यारोप्य चिन्तनमवगाह्य गृहान्निर्गतः । गोचाधुनैवेमभारमवताये स्मृणा-स्मृतिमिच्छति ज्योतिर्गच्छन्तमपश्यन् यावदशक्नोत् ।'

'दीपक एहि ! मातृश्रेणोक्तं कौशिकेजेन । दीपकः तत्रैव प्रतिभाति तावत् यावत् काटिकाज नामक आदिशति पावेष्टम् ।'

'दीपक अद्याहं वचनद्वयमानीयितुमिच्छामि ।'

अहं तु एतनैव वाचयन निर्गन्तुमिच्छामि ।' इत्युक्त्वा दानेन पत्रमेतत् समर्पि-तम् ।

'अस्माभिर्निरूपणीयं भवतैव निरूपितम् । वादम् । पत्रमुद्घाट्य वाचयित्वा स्थागतमिति न ज्ञातवान् सदत् ।

अपि भवता समीचीनमेवेदं निर्णीतं, त्वरायां वा ?'

'आम, मया सर्वं सम्यगेव निरूपितम् ।'

'अमिताया तु किं ?'

'तया निर्णीतं पूर्वमेव ।'

दीपकस्ततो न जाने कदा कथं वा मार्गं दृश्यान्यपश्यन्नेव स्वं गृहं प्राप्तः । स्ववृत्तं प्रियायै श्रावयितुमैच्छत्, परञ्च न तादृशं सत्वमाप्नोत् । पत्रेण स स्फुटं सन्दर्शयितुकामः यदा पत्रं लिखति, तदैवापश्यदेकां कामपि पत्रिकां ज्योतिहस्तलिखितामुन्मुक्ताम—

प्राणेश,

यद्यप्यहं भवन्तं प्रगाढ स्नेह-पारावारे निमज्य गच्छामि परं दुःखानुभूतिः स्वदवराने भविष्यतीयपरिदृश्यम् । मुद्रासेन सम्पूर्णवृत्तं निवेदितं भवतः पूर्वमेवा-गत्य । सम्पूर्णं परिवारं मत्कारणेन दुःखमाप्नोतु इति मे हृदयं न स्वीकरोति । भवता सम्पदेव मे सम्पदा । अतोऽहमात्मनः प्रसन्नतामपि बलिवर्तुमिच्छामि । भवदारोपिते पाटल-पादपे प्रस्फुटितः पल्लवः मे समीपे सुरक्षितोऽस्ति । पुण्ये जाते सति शीघ्रमेव पुष्पिता भविष्यन्ति भवन्तः । तमहं प्राणपणेनापि पालयिष्यामि । तदेव भविष्यति भवतः प्रतिकृतिः । शाश्वतः सनातनोऽमरः वायं स्नेहः । आवयोः स्नेह वारिधारा सदैव प्रवहिष्यति ।

भवतामेव सदैव दीपस्येव

ज्योति

दीपकः सानोरा 'अम्ब, विनष्टं सर्वं, हा धिक् हा हतोऽस्मि । सर्वनाशः सञ्जातः, अम्ब !' क्रन्दनं निशम्य रमया रामचरितमानस-पठनं मध्य एव परित्यज्य तत्रागतम् तया नेदं ज्ञातं यत्किमेव भविष्यति लङ्का परस्य । दीपकः तत्र पर्यङ्के विगतसंज्ञः पतितः आसीत् पत्रं हस्ते धारयन् । सा त्वरितमेव दूरभाष-यन्त्रेण डाक्टरं सूचयामास । ततश्च सा पत्रं पठितवती । चीत्कारमेकं सहसैव तन्मुखान्निर्गतम् "मया न ज्ञातं यन्ममैव सुमनोहरोद्याने कण्टकाकीर्णोगुल्म उप्तः ।

अश्रौषित्वा दीपकः स्वबुनिमल्पश्रमेणैवाप्नोति च स्वजीवितं निर्बाधं सम्यगेव । स्वमातरं प्रेषयति वृत्तिम् । परञ्च स गृहं नावस्थातुं शक्नोति । भवनतु दूरादेव प्रणमितुमिच्छति । नार्यां शीतोष्णप्रवृत्त्या स प्रवञ्चकान् परिबाधकं कृतं बाल-कान् पाठयति । एतेनाननमजयति कालं यापयति च मुहुर्मुहुः स्वप्रियतमां ज्योतिं तयोक्तान् साहित्यसन्दर्भांश्च स्मरति यदा-कदा-लिखति, काव्यं वा करोति ।

यत्र साहित्य-सन्दर्भ सम्भारस्तं प्रेरयति किञ्चिल्लिखितुम्। स्वानुभूति नवनेनैवाभिव्यनक्ति। नारी चरितस्यारोहावरोहान् स्मरति यं सामान्या जना यथा कालिदास घनानन्दादय महाकवि-पदमारूढा कृता। पवनस्योच्यका हरितै पत्रवितैश्च वृक्षैर्विविधवर्णपुष्प पादपैश्चाच्छादिता। प्रशमाधिकृतमिवासीत सम्पूर्णं वनम्। कस्यापि पुरातन महर्षेराश्रमादून नासीत् तत्र।

दीपको विचार-मग्नो यावद् भ्रमति तावदेका कदली कण्टकाकीर्णे गुल्म समीपे आरोपिता विलपिताञ्च पश्यति। कदली स्वमराप्रकृत्या दर्पिता नृत्यतीव दृश्यत। गुल्मकश्चालिङ्गितुमिच्छति। परञ्च गुल्मकस्तु स्वकण्टकविच्छिद्य द मालि ङ्गनमस्वीकरोति। तथो क्रीडा तस्य गृहस्थस्य सम्पूर्णां कथा पुनरावर्तयति। कापि युवति त सगाम्भीर्यमुद्विग्न चित्तञ्च सम्मुखेस्थि वाप्यातादपकरोति। सोऽविलम्ब मेवाभिजानाति ताम्। परञ्च सा दीपक कूर्चेणाच्छन्नमुख नाभिजानाति। अमिता एषा त्वमसि? आश्चर्यचकिता तत्पाकृत्स्यातङ्किता सा.सलज्जमेवापश्यत्तन्मुखम्। स तु— अलमातङ्कितया। मा भैषी कस्मादत्रागतासि भवनीतिकथ्यताम् ज्ञातुमिच्छामि' विहसन्नेवोक्तवान्।

'को भवान् अपि मया ज्ञातु शक्यत ?

भवती मामभिजानात्येवेत्यावश्यकता न वर्तते।

कथमाशङ्किता भवतीति ज्ञातुमिच्छामि स्फुटम्।

कथमह ते माहात्म्य विदधामि? भय परित्यज्य कथ्यता सम्पूर्ण वृत्तम्। सत्य न दापयितुमर्हति कोऽपि। तस्य फलानि विषमभूमावपि सुमधुराण्येव भवन्ति। य सत्य गोपायति स प्रज्ज्वलितमनलमवाच्छादयति वस्त्रेण। सत्येनासत्य तु रामायनिरवस्त्रमिव दह्यते।''

अमितया वाष्पपर्याकुलेक्षणया हृत्वालुप्य प्रमाजयितुमिव सम्पूर्णा कथा श्राविता। पूर्वोक्ता गर्वोक्तय यदा स्मृतिपटलमभ्यायाति, तदा कृष्णोरगइव दशति। *उद्योगालये महान् विप्लव प्रस्फुटित। आक्रोशिता श्रमिका भवनाट्टालिकामारो ढुमयतन्त। जनक्रोधितदावाग्निरागच्छति। तदैव भवन वहिदाभकस्यापतत। तत्रैव* सहायतदेक श्रमिक। राजपुरुषा अपि तत्क्षणमवापतिता। स पुरुषौरावा पलायितौ निरूपितौ।

किं विलम्बेन शीघ्रमेवाधुना त्वया स्थालया गन्तव्य, तत्र च आत्म समर्पण करणीयम्। एवमेव प्राप्य वस्तु न्याय।'

'यद्याज्ञापयन्ति भवन्तः । भवन्त एव मनाथीकृत्य मां तत्र समर्पयन्तु, येन रक्षणं न्यायं च लभे।' स्वल्पतापेन तप्तं स्वर्णं यथा त्यजति कालुष्यं, तथैव शाल्पसन्तापेनैव संतप्ता मनसः कालुष्यं परित्यज्य विशुद्धा सरलस्वभावा च भूत्वा भासते स्म । सा मानमेव धिक्करोति । त्याज्या खलु मे प्राणा इति सा मनस्यकरोत् । राकेशआरक्षाधीक्षकोऽपि मित्रस्य वचनेन विश्वस्य शीघ्रमेवावधारयद्वस्तुस्थितिम् । सुहृदागमने स्वागताय चायमानेतुमाज्ञापयति । चाय-पेयमानयन्ती परिश्रामवदना कृशोदरी विशोषिताञ्जन नयनामुन्मुक्तदीर्घालिका शुभ्र-वस्त्रावृता च दृष्ट्वामितादीपकौ चकितावभवताम् । तदुपरि दृष्टिं विनिवेश्य यावदपश्यतामुभौ तौ तावत्साऽपि चकितापलक-निस्फारित-नयना तत्र तिष्ठति, स्वसन्तुलनमपि च त्यजति । स्खलन्ती निपतन्तीव सा पादयोः पतति ।

'कस्मात्त्वयैवानीतं चाय पयस, नायातो भृत्यः किम् ?' राकेशेन पृष्टाऽपि तया न प्रत्युक्त एकोऽपि शब्दः । ताम् त्यक्तकामल्पिका कषाय पेयामवाङ्मुखी विह्वला वाष्पायमाणा चालिङ्ग्य स्वाधुभिः तद्वस्त्राणि सिञ्चति ।

राकेशस्तु किं-कर्तव्यविमूढः शिलाखण्डमिव निश्चलः निस्पन्दश्च पश्यतीदं सर्वं वृत्तम् । अमिता स्वपूर्वकृत्वे लज्जितावनता च विलपति । चाय-पात्रन्तु भवन्भञ्जिगितिवाष्पमुत्सृजति स्म ।

'ज्योते !' चकितेन राकेशेनोक्तम् ।

'आम् भ्रात !' इति लज्जायमाना पादाङ्गुष्ठेनधरातलं भेत्तुमिवेच्छति ।

राकेश, नाहं राजेश, दीपकोऽहम् । एषाऽमिता ।' तेनैव सम्पूर्णं वृत्तं निगदितम् ।

अद्य त्रिकोणस्य तिस्रः रेखाः पुनर्मिलनं भेजुः । तेषां बिन्दवः समाविष्टाः परस्परम् । ततोऽवाप्तः शिशुरेकः ।

'बालोऽयं कः ?'

'त्रिकोण-भङ्गमे प्रयासोऽयमिति' परिहासेनामितोक्तवती ।

अद्य कोविदारसमीपे कुसुमाकीर्णं शिला-पट्टमधितिष्ठन्ति सर्वे पाटलपाश्वा पुष्पराच्छादिता । माधवी-लतापि सुतरां पुष्पिता मदृश्यते ? ।

सत्यस्यान्वेषणम्

कुमारी प्रभा

प्रकाशो विशालश्चाभिन्ने मित्रे आस्ताम्, परं ते विचारणायाः स्तरे नितान्तमेव भिन्ने विद्यताम्। विज्ञानस्याध्येता विशालस्तर्कप्रवणो विचक्षणः प्रज्ञया च संयुक्त आसीत्। स सदैव स्वकीयानां जिज्ञासानां तर्कसंगतं बुद्धिग्राह्यं च समाधानमन्वेष्टुं प्रायतत, परं दर्शनसाहित्यादेश्चाऽध्ययनेन स नितान्तमेव संवेदनात्मको भावुकः परमश्च आस्तिकः समजायत। स स्वकीयानां समस्तजिज्ञासानां निदानं सत्यस्याऽन्वेषणेनैव प्राप्तुमियेष। *इमम् एव विगते सप्ताहे स नियमितरूपेण स्वामिनः* सत्यव्रतस्य 'सत्यमेव ब्रह्म' इति विषयमाधृत्य प्रवचनं शुश्राव। रविवासरस्य प्रातः स्वमित्रं प्रकाशं मिलित्वैव ता ममसमप्ताहस्य उपलब्धिर्वर्णिता। प्रकाशेन तद्वक्तव्यं श्रुत्वा विमनस्कतया प्रत्युत्तरितम् –

बन्धो! किमर्थं निरर्थके चिन्तने निमज्य स्वचित्तमशान्तं विदधासि? सत्यस्यान्वेषणे न केवलं त्वमेव प्रत्युताहं स्वामिनः सृष्टेश्च सर्वे प्राणिनोऽनन्तकालात् प्रयतन्ते। परं किं तेष्वेकेनाप्यस्यां दिशि साफल्यमवाप्तम्?

विशालेन प्रत्युत्तरितम्- सुहृत्! अहं तु सत्यमन्विष्यैव शान्तिं प्राप्स्यामि। स्यात्तदर्थं मम किमपि। कथं खलु सहमतो भवेयमहं त्वदीयाभिः धारणाभिर्यत् ज्ञान-विज्ञानदर्शनजीवनादीनां च सत्यमेकमेव विद्यते। वस्तुतस्तु सत्यान्वेषणेनैव सत्यमभिज्ञातुं शक्यते।'

रुष्टेनेव प्रकाशेन कथितम् तर्जयन्। त्वया तु पुनरपि सदैव पारम्परिकं *विवेचनं प्रारब्धम्। अनेन तु निस्सीमं विवादं कृत्वापि न कमपि* निष्कर्षमवाप्तुं शक्नुवः। न स्वीकरोषि किं वैज्ञानिकं तथ्यं त्वम्? न किं विज्ञानस्य सर्वे एव प्रयोगाः तथ्याधारिता भवन्ति? अस्तु, अहमपि प्रयोगेण सिद्धिं विधाय स्वमतं स्वीकृतं कारयिष्यामि।

'सत्यमन्वेष्टुं कीदृशं प्रयोगं चिकीर्षसि त्वम्?' जिज्ञासुना विशालेन पृष्टम्।

'त्वं खलु प्रयोगाय प्रस्तुतो भव। एष प्रयोगस्तु न खलु पारमार्थिकः। वस्तुतस्तु एकं लघुनाटकं मञ्चनीयमस्ति। ततश्च सत्यस्यान्वेषणं भविता।' प्रकाशेन निगदितम्।

विशालेन खिन्न मनसा कथितम्- "अयि भ्रातः! प्रहेलिकां मा पृच्छेः? स्पष्टतो ब्रूहि तदन्मया करणीयम्।" तदनन्तरमुभे मित्रे कस्मिंश्चिद् वैयक्तिके चिकित्सालये प्राविशतां, यत्र खलु नगरस्यैको विशेषज्ञो डा० अविनाश महोदयः स्थितः रुग्णातुराणां परीक्षणं विदधाति स्म। तदैव विशालः स्वोदरं हस्तेन धारयन् हा! मृतोऽस्म्यहमिति क्रन्दन्निव सः चिकित्सकाभिमुखमासन्दयामसीदत। प्रकाशेन च सुहृदुदररुजो भीषणता चिकित्सकाय प्रकटिता। ततस्तु चिकित्सकेनैकाधिकाः प्रश्नाः कृताः ततश्च कतिपयानि गुटिकानि सूच्या च प्रवेष्टव्यं किमपि भेषजद्रवं लिखित्वा शुल्ककृते दश रूप्यकाणि याचितानि। शुल्कं प्रदाय तावुभावापणाद् भेषजं क्रेतुं प्रतिष्ठेताम्। चिकित्सालयाद् बहिरागत्य विशालेन प्रोक्तम् 'प्रकाश! किमेतत् मौढ्यं त्वया प्रदर्शितम्? त्वया तु व्यर्थमेव दश रूप्यकाणि प्रदत्तानि।'

प्रकाशस्त्वेतदेव कथयामास-"सत्यस्यान्वेषणं किं व्ययं विनैव सम्भाव्यते? अधुना तु त्वं मया साकं चिकित्सालयं चल।" ततश्च तौ कमप्यौषधालयमाजग्मतुः, यत्र चातुराणामत्यधिकः सम्मर्दआसीत्। विशालः प्रायः क्रन्दन्निव स्वहस्तं नाडिका-परीक्षार्थं वैद्यस्याभिमुखं प्रससार। वैद्येन च तत्परतया जठर-विकारेण रोगोत्पत्ति निश्चीयोपचारार्थं कतिपय-भेषजानां नामानि लिखितानि। तेन पथ्य-सम्बन्धिन्यो विशेषा निर्देशा अपि कृताः। प्रकाशस्तु वैद्यराजाय पञ्च रूप्यकाणि दत्त्वा आगामि-दिवसे प्रत्यागमनं समूच्य ततः प्रतस्थे। औषधालयाद् बहिरागत्य विशालः पुनरपि प्रकाशं पप्रच्छ डाक्तराणां वैद्यानां च कृते शुल्कं प्रदाय त्वं कीदृशं सत्यमन्वेष्टुमिच्छसि।

अयि भ्रातः! न किं त्वयैकस्यैव रोगस्य पथ्यद्वयेन सह व्याख्या-द्वयं प्रत्यक्षी-कृतम्। एकस्तु पथ्यमेव महत्त्वपूर्णमनुते। अन्यश्च कथयति यत् किमपि भक्षय पिब वा। एकस्यैव रुजो निदानं चिकित्सा च डाक्तरो वैद्यश्च पृथक्तया चिकीर्षतः। प्रकाशः तत्परतया जगाद

खिन्नेन विशालेन पृष्टम्-'साम्प्रतं किमन्यत् विधातव्यम्? तावदस्मिन्द्वन्द्व जाले तु नावगन्तुं शक्यते मया।'

प्रकाशस्तु एतावदेव कथितवान् 'अल्पस्तावदभिनयोऽवशिष्यते।'

ततश्चोभे मित्रे प्रचण्ड—मार्तण्डनाम्न्या ज्योतिर्विज्ञान शालायामाजग्मतुः।

तत्र ज्योतिषाचार्यो महामान्य परमानन्द-महोदयोऽनेकैः शिष्यैः परिवृत निश्चिन्त-मुद्रया समागतानां जनानां हस्तरेखां जन्म लग्नं च दृष्ट्वा भविष्यफलं वर्णयति स्म। विशालेन तत्र गत्वा स्वोदर-विकार सम्बन्धे निवेदितं निदानाय च प्रार्थितम्। ज्योतिषाचार्येण विशालस्य ग्रहनक्षत्राणां गणनां विधाय शनैः सार्धसप्तवर्षं दशामभिधीय केतु मङ्गल नाम्नो पाप ग्रहयोरन्तर्दशायां प्रकोपं च प्रतिपाद्य तयोः शान्त्यर्थमेकमनुष्ठानं प्रस्तावितम्। तदनु आचार्येण प्रतिदिनं पापग्रहाणां जपहवनादिना सह वचनं इतोऽपि दानपुण्यस्योपाया निर्दिष्टाः। अनुष्ठानस्य विधानेनोदर विकारं सदा सर्वदार्थं निवर्तिष्यते, इति स विश्वसिति स्म। अनुष्ठाने त्वनुमानतो व्ययश्चैक पञ्चाशदुत्तर शतरूप्यकात्मको वर्णितस्तेन। श्रुत्वैतत् प्रकाशस्तु ज्योतिषाचार्याय सार्धं पञ्च रूप्यकाणि प्रदायाग्रिममासस्य प्रथमतिथौ प्रत्यागन्तुं निवेदयामास। ततश्च स विशालेन सार्धं बहिराययौ। विशालस्तु साम्प्रतं भृशमेव खिन्न आसीत्: तेनाशोकमये स्वरे कथितम् 'भ्रातः! गच्छन्तु त्वदीय सत्यान्वेषणम्। अहं त्वधुना गृहमेव यामि।'

प्रकाश सानुनयं निजगाद तं -'मित्र! केवलमेक एव प्रयोगोऽवशिष्यते। तदनु सत्यान्वेषणं पूर्णतां यास्यति। अधुना तु मौलवि -महोदयानां पार्श्वेऽपि यास्यामावाभ्याम्।

ततश्च तावुभौ खुदाबख्श नाम्न कस्यापि पीराख्यस्य गृहमयाताम्। तत्र मौलवि महोदय स्वशिष्यैरावृत आपादमस्तक कृष्ण वस्त्रादि धारयन्नसीदत। हस्तयोस्त्वेकमापमर्चिरिद्धं दधार स। तदनु विशालो मौलव्याः समीपमागत्य नमश्चकार। ततश्चानन्दतैव तेन स्वोदर पीडा निवेदिता। श्रुत्वैतत् परमगाम्भीर्येण मौलविना पृष्टम् 'एषु दिवसेषु त्वं कस्यचिज्जीर्णवृक्षस्य पार्श्वंतस्तु नैव गतवान्?' 'विशालेन किञ्चिद् वक्तुमारब्धं, परं मध्य एव प्रकाशेन झटिति कथितम् 'मौलवि महोदय! मम मित्रं तु प्रतिगत्रं प्राचीनवसतौ जीर्णवटवृक्षस्य अधस्तादागत्य विवशोऽस्ति। तथा च ।

प्रकाशेन स्वकीयवचनं न पूरयितुं पारितम्। तत्पूर्वमेव मौलविना प्रोक्तम् अलं, अहमवगतमया सैव ध्वजा धारिणी वृद्धा पिशाचिनी तव मित्रस्य शीर्षमधिरोहं। कीयश्यास्तस्या अपसरणेनैव त्वन्मित्रस्योदरे पीडा समाप्तिमेष्यति।

तदर्थमस्माभि किं विधातव्यम्? 'प्रकाशेन जिज्ञासितम्।

मौलवी कथयामास-'त्वया खलु अज-कुक्कुटयोर्बलिर्देया। अन्यच्च पञ्च-मासमिता कृष्णमाषा तदर्ध- मात्रायां च कर्पूर लवङ्ग-पुष्पादीनि गृहीत्वा-

शुक्र वासरस्य सन्ध्यायामत्रागन्तव्यम् । तदाऽहं सर्वमेवावशिष्टं कार्यं सुष्ठु विधा-स्यामि ।

"बाढं मौलवि- महोदया । आवां शुक्रवासरे सायमेव वस्तून्यादायागमि-ष्याव ।" प्रोच्यैतदुभौ तौ शीघ्रतया प्रयातुमुपक्रमेतु ।

'अयि तिष्ठ तावत् ! आमन्त्रोपहाररूपेण सार्ध-पञ्च-रूप्यकाणि तु प्रयच्छ त्वम् । पीरस्य द्वारान्नेत्थमेव गन्तव्यं त्वया ।' मौलविना आदेशात्मक इव स्वरे प्रोक्तम् ।

'साम्प्रतं तु चतुराणकोत्तर-रूप्यकमेकं दद्व । अवशिष्टं तु शुक्रवासरस्य सायमानेतव्यमावाभ्याम् ।' कथयित्वैतदुभौ कयापि त्वरया प्रतस्थाते । ततश्च तौ प्रकाशस्य प्रकाशपुञ्जे धके समागतौ ।

विशालं सम्बोध्य प्रकाशो जगाद- 'दृष्टं त्वया मित्र । सत्यान्वेषणं खलु दुष्करं विद्यते । डाक्टरो वैद्यो, हकीम पीरश्च सर्वे एवैकं खलु रोगरूपिणं सत्यमभिज्ञातुं कति मार्गानुपायांश्चाज्ञी- कुर्वन्ति । ततोऽपि रुजो मूलं तु कश्चनैव ज्ञातुं पारयते । इत्थमेव स्वामिनः सत्यानन्दमहोदया, अहं त्वं दार्शनिका, विचारका, धर्मगुरव, वैज्ञानिकाश्च सर्वं एव स्व-स्वपद्धत्या सत्यमन्वेषयन्ति । परं वस्तुतस्तु सत्यमनुभूतेर्विषयोऽस्ति । तदन्वेषणं स्वयमन्याश्रयं विनैव स्वकीयेऽभ्यन्तरे विधातुं पार्यते । अथ च प्रयोगसिद्धमपि सत्यमन्वेष्टुं प्रयोगास्तु कतिपये विधेया एव । एतत् खलु समाधिमग्नो भूत्वा केनाऽप्युपायेनान्येन वा साध्यम् । मन्दिरादीनि पण्डितादयश्च सर्वे मार्गस्य उपदेष्टारः सन्ति । गन्तव्यं प्रति तु स्वयमेव गमनीयम् ।'

विशालेन प्रसन्न-मुद्रया निगदितम्- 'प्रकाश ! धन्योऽसि त्वम् । त्वया तु यथार्थमेव सत्यान्वेषिका दृष्टिरवाप्ता । साम्प्रतमहमपि स्वयं सत्यान्वेषको भूत्वा स्वान्तः सत्यमन्विष्यामि निजेनैव प्रयोगेन ।'